

शिक्षाशास्त्रविभागीयप्रथमवर्षीय छात्राः

ISSN-2395-7921

# शिक्षारश्मिः

## शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका

2018



राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः) भारतसर्वकारस्य
मानवसंसाधनविकासमन्त्रालयाधीनम्
क. जे. सोमैयासंस्कृतविद्यापीठम्, विद्याविहारः, मुम्बई-७७

**Peer Reviewed Refereed Journal** **ISSN : 2395-7921**

# शिक्षारश्मिः

## शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका

**(सन्दर्भिता मूल्याङ्किता च शोधपत्रिका)**

**Annual Research Journal of Department of Education**

## 2017 - 18

ख्यातं राष्ट्रियसंस्कृतं सुमहितं संस्थानमद्याखिलं
वाणीवैभवमातनोति नितरां राष्ट्रे चतुर्दिग्भवम्।
तत्रासौ निजगौरवेण महता सारस्वतं भासयन्
सोमय्याभुवि भासते परिसरो विद्याविहारे स्थितः।।

**संरक्षकः**

**आचार्यः परमेश्वरनारायणशास्त्री,**

**कुलपतिः, राष्ट्रियसंस्कृतसंस्थानम् (मा. वि.) नवदेहली**

**प्रधानसम्पादकः**

**आचार्यः सुदेशकुमारशर्मा**

**प्राचार्यः, क. जे. सोमैयासंस्कृतविद्यापीठम्, मुम्बई**

**सम्पादकाः**

**आचार्यः मदनमोहनझाः** **डॉ. वि. यस्. वि. भास्कररेड्डि** **डॉ. देवदत्तसरोदे**

**सह-सम्पादकाः**

**डॉ. कुमारः** **डॉ. विनोदकुमारशर्मा**
**डॉ. सुनीलकुमारशर्मा** **डॉ. सचिनकुमारः**

**राष्ट्रियसंस्कृतसंस्थानम्**

**(मानितविश्वविद्यालयः)**

**भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्**

**क. जे. सोमैयासंस्कृतविद्यापीठम्**

**विद्याविहारः (पूर्वम्) मुम्बई - 400077**

| | | |
|---|---|---|
| पत्रिकानाम | : | शिक्षारश्मिः (शिक्षाशास्त्रविभागीयवार्षिकशोधपत्रिका) |
| प्रकाशकः | : | शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम् ( मा. वि.), मुम्बई - 77 |
| © प्रतिलिप्यधिकारः | : | प्रकाशकाधीनः |
| **ISSN** | **:** | **2395-7921** |
| संरक्षकः | : | आचार्यः परमेश्वरनारायणशास्त्री, कुलपतिः |
| प्रधानसम्पादकः | : | आचार्यः सुदेशकुमारशर्मा, प्राचार्यः |
| सम्पादकाः | : | प्रो. मदनमोहनझाः डॉ. वि. यस्. वि. भास्कररेड्डि<br>डॉ. देवदत्तसरोदे |
| सह-सम्पादकाः | : | डॉ. कुमारः डॉ. विनोदकुमारशर्मा<br>डॉ. सुनीलकुमारशर्मा डॉ. सचिनकुमारः |
| सम्पादकमण्डलसदस्याः | : | आचार्यः मदनमोहनझाः डॉ. देवदत्तसरोदे<br>डॉ. वि. यस्. वि. भास्कररेड्डि डॉ. कुमारः<br>डॉ. विनोदकुमारशर्मा डॉ. सुनीलकुमारशर्मा<br>डॉ सचिनकुमारः सुश्री वैशाली निवडुंगे<br>शुभलक्ष्मी सामल बिनायक बारिकश्च (छात्रसदस्यौ, द्वितीयवर्षम्)<br>प्रियदर्शिनी होता फिरोज साहु (छात्रसदस्यौ, प्रथमवर्षम्) |
| मूल्याङ्कनमण्डलम् | : | प्रो. ए. पी. सच्चिदानन्दः प्रो. प्रकाशचन्द्रः<br>प्रो. लोकमान्यमिश्रः प्रो. गोपीनाथशर्मा<br>प्रो. प्रह्लादजोशी प्रो. वै. एस्. रमेशः<br>प्रो. रजनी रञ्जन प्रो. के. भारतभूषणः |
| प्रकाशनवर्षम् | : | 2018 |
| अनुकृतयः | : | 200 |
| मुखचित्रविन्यासः | : | आचार्यः मदनमोहनझाः |
| अक्षरसंयोजनम् | : | डॉ. वि. एस्. वि. भास्कररेड्डि |
| अवधातव्यम् | : | शोधपत्रिकायाममुष्यां प्रकाशितशोधपत्राणां मौलिकत्वस्य तत्र प्रतिपादितविचारस्य च कृते समग्रमुत्तरदायित्वं शोधपत्रलेखकानामेव भविष्यति, न वा सम्पादकस्य न च प्रकाशकस्य भविष्यतीति विज्ञप्यते। |
| मुद्रणम् | : | Rank Printers, Mulund (W), Mumbai. |

प्रो. पी.एन्. शास्त्री
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)

Prof. P.N. Shastry
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)

RSkS/VC/Msg/2017-18/165

Date 04.03.2018

## शुभाशंसनम्

मार्गद्वयं तत्त्वबोधनाय योग्यम् । एकत्र शास्त्रचर्चा अपरत्र शास्त्रचिन्तनाय अवसरः इति । तस्मिन् एव प्रसङ्गे विविधा आचार्याः सुतरां प्रेरणामुखेन नूतनगवेषणकार्ये लग्नास्सन्तः सततं किमपि साधयितुं प्रयतन्ते, तेषां शोधमुखलेखाः विचारावगाहाः च समाजाय नूतनां गतिं प्रददति । अस्मिन् एव प्रसङ्गे मुम्बईपरिसरस्य **"शिक्षारश्मिः"** इतिनाम्नी पत्रिका यशस्विनां प्राचार्याणां, कार्यकुशलानां विभागाध्याक्षाणां च मार्गदर्शने सततं यशः प्राप्नोतु इति मंगलाशासनं विधीयते, ये केऽपि अस्मिन् साहित्यसर्जनात्मके पूतकार्ये लग्नाः सन्ति तेभ्यः सर्वेभ्यः शुभकामनाः दीयन्ते, भगवती मुम्बादेवी च प्रार्थ्यते इयं पत्रिका विदुषां शोधच्छात्राणां सामाजिकानां च मार्गदर्शनं कुर्यादिति ।

प.ना. शास्त्री

**(प्रो. परमेश्वरनारायणशास्त्री)**

56-57, Institutional Area, Janakpuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995 E.Mail : rskspvc@yahoo.com

आचार्यः ए. पि. सच्चिदानन्दः
प्राचार्यः (प्र)
राष्ट्रियसंस्कृतसंस्थानम्,
(भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनः मानितविश्वविद्यालयः)
राजीवगान्धीपरिसरः, शृङ्गेरी – 577 139

Prof. A. P. Sachidananda
Principal (I/C)
RASHTRIYA SANSKRIT SANSTHAN
(Deemed University under MHRD Govt. of India)
Rajiv Gandhi Campus, Sringeri - 577 139

## समेधतां शिक्षारश्मिः

अस्माकं प्राञ्चो मनीषिणस्तपस्विनो महर्षयो वेदवेद्यान् विचारान् समाकलय्य मानवजन्मनो लक्ष्यावाप्तये शास्त्राणि निर्ममिरे। तेषामध्ययनमन्तरा कथमपि पुरुषार्थाः प्राप्तुं न शक्यन्त इति सर्वविदितोऽयं विषयः।

पाश्चात्त्यसंस्कृतेरन्धानुकरणेन, तत्प्रभावितचिन्तनेन च भारतीयसंस्कृतेर्महत्त्वमजानानो-ऽद्यतनसमाजः असंस्कृतः सन् अनुचिते वर्त्मनि पदं निदधानोऽस्ति। अतः राष्ट्रेण शास्त्राणां समुद्धरणेन समाजे दोषाणामपनोदनं गुणानामाधानं च सेत्स्यतीति बहुपरिसरीयं राष्ट्रियसंस्कृतसंस्थानं प्रतिष्ठापितमस्ति। मुम्बापुर्यां विराजमानं के. जे. सोमय्या संस्कृतविद्यापीठं राष्ट्रियसंस्कृतसंस्थानस्य परिसरेष्वन्यतमः। विद्यापीठमिदं शास्त्राणां संस्कृतस्य संस्कृतेश्च संरक्षणे विकसने च बद्धादरं सत् निष्प्रत्यूहं नानाविधकार्याणि निर्वहति। तत्र विविधशास्त्रनदीष्णैरन्वितेन शिक्षाशास्त्रविभागेन प्रतिवर्षमिवास्मिन्नपि संवत्सरे **"शिक्षारश्मिः"** इति वार्षिकशोधपत्रिकेयमाविष्क्रियत इति प्रमुदिता वयम्। विद्वज्जनलेखभूयिष्ठं पत्रिका समेषामुपकारं तनिष्यतीति मे महान् विश्वासः।

सन्दर्भेऽस्मिन् परिसरप्राचार्यान् विदुषः **आचार्यसुदेशकुमारशर्मवर्यान्,** अभिनन्दामः ये बहुविधकार्येष्वपि दत्तमानसाः कार्यमिदं सम्पादितवन्तः। शिक्षाशास्त्रविभागाध्यक्षान् प्रो. मदनमोहनझावर्यान् विभागीयप्राध्यापकान् सर्वान् पौनःपुन्येन अभिनन्दामः। एतादृशकृतिभिः शिक्षाशास्त्रविभागः वरीवृद्ध्यताम् इत्याशास्महे।

हेमलम्बफाल्गुनशुक्लदशमी

भानुवासरः, २५-०२-२०१८

विद्वज्जनविधेयः

**प्रो. ए. पि. सच्चिदानन्दः**

# राष्ट्रिय-संस्कृत-संस्थानम्

(मानितविश्वविद्यालयः)
क. जे. सोमैया संस्कृतविद्यापीठम्, विद्याविहारः, मुम्बई - 77
Ph. 022-21025482, 21025452,
E-mail: rsksmumbai@yahoo.com www.rsksmumbai.in

**प्रो. सुदेशकुमारशर्मा**
प्राचार्यः


## शुभकामनासन्देशः

संस्कृतसंवर्धनकालः प्रवर्ततेऽधुना । जनानां संस्कृतं प्रति सुतरां प्रीतिम् अवलोक्य मोदते मे मनः । साम्प्रतं जनाः भारतीप्रकाशनमुखेन गौरवपूर्णभावेन च संस्कृतं पश्यन्ति । संस्कृताय दृढनिश्चयाः केचन नूतनान् भावान् पालयितुं विशिष्टं सर्जनात्मकं कार्यं कर्तुं यतमानाः सन्ति । अस्मिन्नेव कर्मणि संस्थानस्य यशस्विकुलपतिवर्याणां मार्गदर्शने सततं प्रेरणादायककार्याणि चलन्ति, यानि सर्वस्य संस्कृतजगतः वर्धनात्मकानि सन्ति । पत्रिकोपनिबद्ध-शोधलेखाः **शिक्षारश्मि** इति पत्रिकायाः जनानां मार्गदर्शनाय प्रेरयिष्यन्ति । अस्मिन्नवसरे कुलपतिभ्यः हार्दं धन्यवादं ज्ञापयामि, ये सततं शैक्षणिककार्याय प्रेरयन्ति । तथा विभागाध्यक्षप्रमुखान्, सम्पादकान्, सहसम्पादकान् सर्वान् आचार्यान्, छात्रान् च प्रति शुभमङ्गलाशासनं कथयामि यतः सर्वैः अस्यै पत्रिकायै उचितं स्वरूपं प्रदत्तमिति ।

फाल्गुनपूर्णिमा, वि. सं. २०७४,
दिनाङ्कः- ०१-०३-२०१८

**(प्रो. सुदेशकुमारशर्मा )**

# राष्ट्रिय-संस्कृत-संस्थानम्

**(मानितविश्वविद्यालयः)**
**लखनऊ परिसरः, गोमतीनगरम्, लखनऊ.**

**प्रो. लोकमान्यमिश्रः**
आचार्यः विभागाध्यक्षश्च
शिक्षाशास्त्रविभागः

Ph. 9451170647

## शुभकामनाः

स्वनामधन्या शिक्षारश्मिः वस्तुतः सर्वत्र शिक्षायाः प्रसाराय सन्नद्धेति प्रतिभाति। तत्र प्रकाशिताः लेखाः शिक्षायाः नवीनान् विषयान् प्रतिपादयन्ति । भारते शिक्षाशास्त्रे कृतभूरिपरिश्रमाणां विदुषां लेखा एतस्यां शोधपत्रिकायां प्रकाश्यन्ते। संस्कृतमाध्यमेन लेखानां प्रकाशनं संस्कृतशिक्षायाः विकासायैव प्रतीयन्ते । विभागीय-सम्पादकेभ्यः सहकर्मिभ्यश्च वर्धापनानि।

दिनाङ्कः- ०१-०३-२०१८

**प्रो. लोकमान्यमिश्र**

**प्रो. मदनमोहन झा**
आचार्यः अध्यक्षश्च
शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतसंस्थानम्
क.जे.सोमैयासंस्कृतविद्यापीठम्
विद्याविहारः (पूर्व) मुम्बई-77

**PROF.M.M.JHA**
Prof.& H.O.D
Dept.Of Education
RASHTRIYA SANSKRIT SANSTHAN
K.J.SOMAIYA SANSKRIT VIDYAPEETHA
VIDYAVIHAR(E) MUMBAI-77

**MO.NO.9004904059, E-MAIL-mmjha44@gmail.com**

## विद्यया विन्दतेऽमृतम्

विश्वस्मिन् यो मानवः स्वजीवने मुक्तिमिच्छन् यशः, प्रभूतिम्, भोगांश्च सर्वान् त्यक्त्वा ज्ञानसम्पादनमार्गमनुसरति स जीवन्मुक्त इत्युच्यते। अत एवोक्तं यथा –

यशः प्रभूतिना यस्मै हेतुनैव विना पुनः।
भोगा इह न रोचन्ते स जीवन्मुक्त उच्यते॥ इति।

एवं भारतीयपरम्परायां विद्यार्जनस्य बहुमुख्यं स्थानं प्राकल्पि । इहलोकयात्रा सुज्ञानेनैव सुष्ठु भवितुमर्हतीति विदुषां वचनमाश्रित्य बहवो मार्गाः अन्विष्टाः । तेष्वन्यतमोऽयमाधुनिको मार्गः शोधलेखप्रकाशनम् । लोकेऽधुना बहुत्र बह्व्यः शोधपत्रिकाः नैकेषां विज्ञानां चिन्तनाभिप्रायविचारादीनां प्रकटनाय प्रकाश्यन्ते । विशेषतः प्रभूतज्ञानभण्डारोपेतसंस्कृतक्षेत्रे एतादृशशोधकार्यं प्रचलतीति प्रमोदस्य विषयः । अस्माकं राष्ट्रियसंस्कृतसंस्थानस्य मनितविश्वविद्यालयस्य क. जे .सोमैयासंस्कृतविद्यापीठाख्ये मुम्बईपरिसरे प्रतिवर्षमिवास्मिन् वर्षे शिक्षाशास्त्रविभागेन **शिक्षारश्मिः** इति वार्षिकशोधपत्रिका प्रकाश्यते यस्यामनेकेषां शिक्षाविदामध्यापकानां ,विभिन्नसंस्थासु कार्यरतानां विदुषां , शिक्षाशास्त्रिकक्ष्यायामध्ययनरतानां छात्राध्यपाकानां गणशो विभज्य प्रदत्तशोधकार्यसम्बद्धानां च शोधलेखानां समावेशो वर्तते । अतः सन्दर्भेऽस्मिन् एतादृशस्य विशिष्टकार्यस्य सम्पादकेभ्यः, छात्रेभ्यः, अधिकारिभ्यश्च सानन्दमभिनन्दनानि वितीर्यन्ते। विशिष्टलेखयुक्तपत्रिकेयं सर्वेभ्यः लोकेभ्यः उपकारिका भवेदित्याशासे।

**प्रो.मदन मोहन झा**

# धन्यवादकुसुमानि

राष्ट्रियसंस्कृतसंस्थानस्य क. जे. सोमैयासंस्कृतविद्यापीठस्य शिक्षाशास्त्रिच्छात्राणां शैक्षिकसत्रेऽस्मिन् (2017- 18) परिसरीयगतिविधिष्वन्यतमः प्रमुखः कार्यक्रमः भवति छात्राध्यापकानां शिक्षणाभ्यासकार्यक्रमः विद्यालयावबोधश्च । वस्तुतः चतुर्मासपर्यन्तं बहूनां नव्याध्यापकानां नियन्त्रणं कक्षाप्रदानमित्युक्ते अत्यन्तं कष्टप्रदं कार्यं भवतीति कथने नास्ति लेशमात्रसंशीतिः । तथापि कार्यस्यास्य सुचारु सम्पादनार्थं मुम्बईप्रदेशे बह्व्यः विद्यासंस्थाः सहयोगमकुर्वन् । तेभ्यः विद्यालयप्रमुखेभ्यः प्राचार्येभ्यः अध्यापकेभ्यः कर्मचारिगणेभ्यः, छात्रेभ्यश्च नितरां कार्तज्ञ्यं प्रकटयामः । विशिष्य **केन्द्रीयविद्यालयसंगठनं, मुम्बईक्षेत्रस्य उपनिदेशिकाभ्यः, सायनकोलीवाडास्थस्य, भाण्डूपस्थस्य, पनवेलस्थस्य च** केन्द्रीयविद्यालयानां **प्राचार्येभ्यः, श्रीविवेकानन्दहिन्दी हाईस्कूल** दिघा इत्यस्य प्राचार्येभ्यः, **चेम्बूरु शिक्षणसंस्थायाः** अधिकारिभ्यः प्राचार्येभ्यश्च वयं धन्यवादकुसुमानि वितनुमः । प्रायोगिकपरीक्षानिमित्तं दिनद्वयं सर्वाः कक्ष्याः प्रदाय सहकृतवद्भ्यः भाण्डुपस्थस्य केन्द्रीयविद्यालयप्राचार्यायै, एस्. के. सोमैया विनयमन्दिरस्य प्राचार्याय च विशेषधन्यवादान् प्रकटयामः । पत्रिकायाः अस्याः प्रकाशने सहकृतवद्भ्यः प्रेरणाशक्तिस्वरूपेभ्यः सर्वेभ्यः सम्पादकसमितिपक्षतः कृतज्ञताकुसुमानि समर्प्यन्ते ।

इत्थं

**शिक्षाशास्त्रविभागः**

# सम्पादकीयम्

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् । यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ इति महाकवेर्दण्डिनः वचनं शब्दरूपभाषायाः जीवितमाहात्म्यं वर्णयति । यदि भाषा इति किञ्चिद्विशिष्टं साधनं लोके नाभविष्यत् तर्हि लोकव्यवहारो नाभविष्यदित्यत्र नास्ति सन्देहलेशः । भाषां विना परस्परं भावानां विनिमयो न भवेत् मानवानाम् । नैव प्रदर्शयितुं शक्नुयुः पण्डिताः स्वपाण्डित्यपूर्णविचारधाराम् । विना भाषां नैव शक्नुयुः प्राप्तुं मानवाः विभिन्नसंस्कृतीनां, परम्परायाः, सम्प्रदायाणां च परिचयम् । न सुष्ठु शिक्षितः स्याद्बालो विना भाषाम् । अतः लोके भाषां विना नास्ति कश्चिद्विशेषः शिक्षणे इति विश्वस्मिन् भाषाशिक्षणस्य बहुमहत्त्वपूर्णं स्थानं वर्ततेतराम् । न कोऽपि विषयः भाषां विना बोधयितुं शक्यः । अत एवोक्तं दण्डिना वाचामेवप्रसादेन लोकयात्रा प्रवर्तते इति । लोकयात्रायाः मुख्यकारणमेव भाषा ।

भाषासु तासु वेदाधारिता देववाणी सुसंस्कृता स्पष्टा शुद्धा मधुरा व्यवस्थिता कल्याणी विविधविद्यापूर्णा लौकिकभाषाणां बह्वीनां जननीति मन्यमाना चानादिकालात् सर्वलोकानां मङ्गलं कुर्वती आद्रीयमाणा लोके दरीदृश्यते । भाषायाः अस्याः अध्ययनाय - गुरुकुलानि, मठाः, आचार्याणामाश्रमाः, नदीसङ्गमतीर्थानि, पाठाशालाः, विद्यालयाः, विश्वविद्यालयाः, विविधविद्याकेन्द्राणि चासन् क्वचित्सन्ति च । यत्र अन्तेवासिन: सपर्यापुरस्सरं सश्रद्धं संस्कृतविद्यामुपासते । अधुना तु शिक्षाव्यवस्था आधुनिकधारायां प्रचलतीत्यतः किञ्चित्परिवर्तिता दृश्यते । साम्प्रतिककाले संस्कृतभाषाशिक्षणाय शास्त्रशिक्षणनिमित्तञ्च संस्कृत-विश्वविद्यालया:, पाठशाला:, गुरुकुलानि तत्रत्या आचार्या: अध्यापका: यतमाना: वर्तन्ते । योऽनूचान: स नो महान् इति श्रुतिवचनं बिभ्रद् आराष्ट्रे राराज्यमानं राष्ट्रियसंस्कृतसंस्थानम् अहर्निशं संस्कृतभाषां शास्त्राणि च सेवमानं लोककल्याणं विदधानं सारस्वतसेवासमाराधनतत्परं लोके भृशं शोभतेतमाम् । संस्थानस्यैव त्रयोदशपरिसरेष्वन्यतम: महाराष्ट्रराज्यस्य मुम्बानगर्यां वर्तमानः क. जे. सोमैयासंस्कृतविद्यापीठमित्याख्यः प्रथितयशस्कोऽयं परिसरो विविधविभागयुक्तो राराज्यते । सत्सु विभागेष्वनेकेषु शिक्षाशास्त्रविभागो विद्यते विशिष्टो यत्र वर्षद्वयस्य पाठ्यक्रमे त्रिनवतिः छात्रा: अधीयाना: वर्तन्ते । विभागोऽयं सर्वत्र ज्ञानं वितन्वन् प्रतिवत्सरमिवास्मिन् हायनेऽपि शिक्षारश्मिरिति अनेकेषां विदुषां छात्राणां च विविधशोधलेखयुक्तां वार्षिकीं शोधपत्रिकां प्राकाशयतीति वक्तुं मोदामहे । राष्ट्रियसंस्कृतसंस्थानस्य मानितविश्वविद्यालयस्य कुलपतिवर्यै: आचार्यैः **परमेश्वरनारायणशास्त्रिभि**: प्रदत्ताशीर्वचनैः, मुम्बई-परिसरप्राचार्यैः **प्रो. सुदेशकुमारशर्मभिः**, विभागाध्यक्षैः **प्रो. मदनमोहनझावर्यैः** प्राप्तप्रोत्साहनेन, विविधश्रेष्ठशिक्षाशास्त्रिणामाचार्याणां शुभाशंसवचोभिः च सम्प्रेरितेयं पत्रिका प्रकाशमेष्यतीति वयममन्दमानन्दमनुभवाम: ।

इत्थं

सम्पादकाः

# शिक्षाशास्त्रविभागीयगतिविधय: 2017-18

भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनेन १९८३ तमे वर्षे संस्थापितेन राष्ट्रियसंस्कृत -संस्थानेन संस्कृतभाषाया: स्वाध्यायप्रवचनशिक्षणार्थं शिक्षाशास्त्रविभाग: समुपास्थापि । संस्थानान्तर्गतेषु त्रयोदशपरिसरेषु क.जे. सोमैयासंस्कृतविद्यापीठाख्योऽयं परिसरः मुम्बईनगरे राराष्टि। परिसरेऽस्मिन् व्याकरण -साहित्य-ज्योतिषविभागै: साकं शिक्षाशास्त्रविभागोऽपि राराज्यते।

२००६ तमे वर्षे महाराष्ट्रराज्ये संस्कृतशिक्षक-प्रशिक्षणार्थं शिक्षाशास्त्रविभागोऽयं समारभ्यत । परिसरस्यास्य प्रथमप्राचार्या: भवन्ति प्रो. प्रकाशचन्द्रमहोदया: । तथा प्रथमशिक्षाशास्त्रविभागाध्यक्षा: भवन्ति प्रो. लोकमान्यमिश्रमहोदया: । अधुना विभागोऽयं प्राचार्यणाम् आचार्याणाम् सुदेशकुमारशर्ममहोदयानां मार्गदर्शने, आचार्याणां मदनमोहनझामहोदयानाम् विभागाध्यक्ष्ये भारते एव सर्वोत्कृष्टशिक्षाविभागेषु अन्यतमत्वेन विराजते। परिसरममुं विभिन्नेभ्य: प्रान्तेभ्य: आभारतात् शिक्षाशास्त्रम् अध्येतुं छात्रा: समायान्ति।

विभागस्यास्य मुख्यभूमिका तावती उत्तमोत्तमाध्यापकानां निर्मितिः । छात्राध्यापकेषु शिक्षण -कौशलानि प्राशासनिकक्षमता, संस्कृतसम्भाषणदक्षता, प्रायोगिक-व्यावहारिक-प्राविधिक-मनोवैज्ञानिक-विज्ञानज्ञानानुप्रयोग -क्षमतादीनां सम्पादनं विभागस्य प्रमुखं लक्ष्यं विद्यते। तल्लक्ष्यप्राप्त्यर्थं श्रेष्ठाध्यापकानां समवायोऽत्र निर्मास्यते।

**वर्तमानशिक्षाशास्त्रविभागीयाध्यापका:**

| क्र. सं | अध्यापकस्य नाम | पदम् | सेवायाः कालावधिः |
|---|---|---|---|
| 01 | प्रो. मदनमोहनझा: | आचार्यः विभागाध्यक्षश्च | 2011 तः अद्यावधि |
| 02 | डा. देवदत्तसरोदे | सहायकाचार्य: (वरिष्ठ:) | 2006 तः अद्यावधि |
| 03 | डा. वि.एस्.वि. भास्कररेड्डि | सहायकाचार्य: (वरिष्ठ:) | 2006 तः अद्यावधि |
| 04 | डा. कुमारः | संविदाध्यापकः | 2015 तः अद्यावधि |
| 05 | डा. सुनीलकुमारशर्मा | संविदाध्यापकः | 2015 तः अद्यावधि |
| 06 | डा. विनोदकुमारशर्मा | संविदाध्यापकः | 2016 तः अद्यावधि |
| 07 | डा. सचिनकुमारः | संविदाध्यापकः | 2018 तः अद्यावधि |

**गतषड्वर्षेषु छात्राणां परिणामादिविवरणम् -**

| क्रम.सं. | शैक्षिकसत्रम् | नामाङ्कित-छात्राः | उत्तीर्णछात्राणां प्रतिशतम् | प्रथमश्रेणी-छात्रप्रतिशतम् | विशेषाङ्कप्राप्त-छात्राः |
|---|---|---|---|---|---|
| 01 | 2011-12 | 49 | 100 | 49 | 11 |
| 02 | 2012-13 | 57 | 100 | 57 | 43 |
| 03 | 2013-14 | 63 | 100 | 62 | 01 |
| 04 | 2014-15 | 93 | 97 | 67 | 30 |
| 05 | 2015-17 | 48 | 100 | 100 | — |
| 06 | 2016-18 | 45 | द्वितीयवर्षे अधीयानाः | | |
| 07 | 2017-18 | 48 | प्रथमवर्षे प्रविश्याधीयानाः | | |

**छात्रोपलब्धयः -**

महतः प्रमोदस्य विषयोऽयं यत् परिसरे ये छात्राः शिक्षाशास्त्रिकक्ष्यामुत्तीर्य गताः ते सर्वेऽपि प्रायः उत्तमक्षेत्रेषु उत्तमोद्योगं प्राप्तवन्त इति । तत्र केचन केन्द्रसर्वकारीयाभिकरणेषु, केचन केन्द्रीयविद्यालयेषु, डी.ए.वी. संस्थासु, विभिन्नराज्यस्तरीयविद्यालयेषु, दिल्ली-स्वायत्त-विद्यालयेषु, सामान्यविद्यालयेषु च कार्यं निर्वहन्ति । तथैव केचन छात्राः विश्वविद्यालयस्तरेऽपि उपाधिधारिणः वर्तन्ते । अधुना सोमैयासंस्थायाः सहयोगेन शिक्षकाणां परिसरीयचयनमपि प्रचलति ।

**2017-18 शिक्षाशास्त्रविभागीयगतिविधयः —**

शैक्षिकसत्रेऽस्मिन् द्वितीयवर्षेऽधीयानाः 45, प्रथमवर्षे प्रविष्टाः 48 छात्राध्यापकाः वर्तन्ते । ते च महाराष्ट्र - राजस्थान - गुजरात - मध्यप्रदेश - उत्तरप्रदेश - उत्तराखण्ड - नेपाल - पश्चिमबङ्गाल - ओडिशा - बिहारप्रान्तेभ्यः समागताः । अस्मिन् वर्षे सत्रारम्भः 19.06.2017 दिनाङ्कतः समभूत् । विभागेऽस्मिन् छात्राणां बौद्धिकविकासाय बहवः कार्यक्रमाः शैक्षिकगतिविधयश्च समायोजिताः । ते यथा -

| | |
|---|---|
| 1. अन्ताराष्ट्रिययोगदिवसः | 21-06 - 2017 |
| 2. सरस्वतीपूजनं सत्रारम्भश्च | 05 - 07 - 2017 |
| 3. द्वितीयवर्षस्य कक्ष्यारम्भः | 03 - 07 - 2017 |
| 4. गुरुपूर्णिमाकार्यक्रमः | 19-07-2017 |
| 5. सम्भाषणशिबिरम् | 20 जुलै 2017 तः 29 जुलै 2017 पर्यन्तम् |
| 6. २१ दिनात्मकभाषाबोधनवर्गः | 20 जुलै 2017 तः 10 अगष्ट 2017 पर्यन्तम् |
| 7. संस्कृतसप्ताहः | 08 अगस्त 2017 तः 11 अगस्त 2017 पर्यन्तम् |
| 8. वाग्वर्धिनीसभायाः उद्घाटनम् | 28-07-2017(प्रतिशुक्रवासरं मध्याह्ने सभा) |

| | | |
|---|---|---|
| 9. | नवभारतसङ्कल्पः | 09अगस्त 2017 त: 30 अगस्त 2017 पर्यन्तम् |
| 10. | स्वच्छताभियानपक्षः | 01 सप्टम्बर 2017 त: 15 सप्टम्बर 2017 |
| 11. | विशिष्टसङ्गोष्ठीव्याख्यानम् | 04 - 09 - 2017 |
| 12. | शिक्षकदिवसः | 06 - 09 - 2017 |
| 13. | हिन्दीपखवाडा | 14 - 09 - 2017 तः 20 - 09 - 2017 |
| 14. | पं. दीनदयाल उपाध्याय जन्मशताब्दी | 14 - 09 - 2017 तः 20 - 09 - 2017 |
| 15. | सतर्कताजागरूकतासप्ताहः | 30 - 10 - 2017 तः 04 - 11 - 2017 |
| 16. | प्राविधिककार्यशाला सङ्गोष्ठी च | 09 - 11 - 2917 तः 11 - 11 - 2017 |
| 17. | सूक्ष्मशिक्षणप्रशिक्षणम् | डिसम्बरमासस्य तृतीय-चतुर्थसप्ताहे 2017 |
| 18. | शोभायात्रा | 12-08-2017 |
| 19. | वीथीनाटकम् | 12-08-2017 |
| 20. | शिक्षणाभ्यासः | 18 - 09 - 2017 त: 15 दिसम्बर 2017 |
| 21. | प्रायोगिकशिक्षणपरीक्षा | 29 जनवरी 2018 त: 30 जनवरी 2018 |
| 22. | युवमहोत्सवः | 2018 मार्च 08 तः 11 दिनाङ्कपर्यन्तम् |
| 23. | मनोविज्ञानपरीक्षा | 01 फरवरी 2018 त: 02 फरवरी 2018 पर्यन्तम् |
| 24. | राष्ट्रियसङ्गोष्ठी विशिष्टव्याख्यानञ्च | 08 फरवरी 2018 तः 09 फरवरी 2018 |
| 25. | आदर्शसाक्षात्कारः | 26 मार्च 2018 |
| 26. | वार्षिकपरीक्षाः | 10-04-2017 तः 26-04-2017 |

**अध्ययनार्थं सौविध्यानि** —

परिसरेऽस्मिन् छात्राणाम् अध्ययनार्थं सर्वप्राविधिकमनोवैज्ञानिककक्षाप्रकोष्ठ: विद्यते । प्रकोष्ठेऽस्मिन् सङ्गणकध्वनिमुद्रिकाप्रक्षेपकयन्त्रै: दैनन्दिनपाठनं भवति । तथैव छात्राणां कौशलाभिवर्धनार्थम् आर्थिकसौलभ्यार्थञ्च इमानि सौविध्यानि वर्तन्ते ।

**१. छात्रवृत्तिः -** शिक्षाशास्त्रिकक्षायां 27 छात्रा: स्वशैक्षिकयोग्यतानुगुणं प्रतिमासं अष्टशतं (८००/-) रुप्यकाणां छात्रवृत्तिं प्राप्नुवन्ति ।

**२. सङ्गणकप्रयोगशाला -** छात्राणां प्राविधिकसङ्गणकीयकौशलान्यभिवर्धयितुं सङ्गणकप्रयोगशाला स्थापिता । यत्र पञ्चदशाधिकसङ्गणकानि उपलब्धानि । तदर्थं सुश्री वैशाली निवडुंगे इति संगणकीया प्राध्यापिका नियुक्ता वर्तते।

**३. मनोविज्ञानप्रयोगशाला** — पाठ्यक्रमानुगुणं मनोविज्ञानप्रयोगान् कर्तुं यथासंख्यं पर्याप्तोपकरणानि विद्यन्ते । तथा पाठ्यक्रमेतरोपकरणानि अपि उपलब्धानि वर्तन्ते । तेषु अवधान-व्यक्तित्व-बुद्धि-अभिरुचि-अभिवृत्ति-चिन्तनविषयकाध्ययनार्थं मनोवैज्ञानिकोपकरणानि सन्ति ।

**४. विभागीयग्रन्थालयः** — परिसरीयबृहद्ग्रन्थालयमतिरिच्यविभागीयग्रन्थालये छात्रैः पाठ्यक्रमविषयाः अध्येतुं पुस्तकानि यथेष्टं स्वीकर्तुम् अवसरः प्रदीयते । तथैव ग्रन्थालयेऽस्मिन् १५०० पुस्तकानि पाठ्यक्रमसम्बद्धानि पाठ्यक्रमेतराणि अनुसन्धानविषयनिष्ठानि संस्कृतभाषादक्षतोत्पादकानि उच्चतरशिक्षापिपठिषूणां पिपासोपशमार्थम् उपलभ्यन्ते।

**५. ई-ग्रन्थालयः** — प्रायः त्रिसहस्राणाम् ई-ग्रन्थानां सक्रमोपलब्धिः सङ्गणकप्रयोगशालायां विद्यते। तत्र यथेष्टं छात्राः सर्वविधपुस्तकानि सङ्गणकद्वारा पठितुं शक्नुवन्ति ।

**६. प्रविधिप्रयोगशाला** — छात्राणां प्राविधिकज्ञानार्थम्, उपकरणनिर्माणार्थम्, सङ्गणकमाध्यमेन पाठनाभ्यासं कर्तुं पर्याप्तोपकरणानि प्रविधिप्रयोगशालायां विद्यन्ते।

**७. क्रीडाविभागः** — छात्राणां सर्वाङ्गीणविकासार्थं क्रीडयितुं च डा. शङ्कर आन्धले इति क्रीडाप्रशिक्षकः वर्तते । यस्य मार्गदर्शने सोमैयापरिसरीयप्राङ्गणेषु शारीरिक-बौद्धिकक्रीडाः क्रीडितुम् अवसराः कल्प्यन्ते।

**विभागे शोधावसराः —**

छात्रैः विद्यावारिधिः (Ph.D.) इत्युपाधिं प्राप्तुं सुयोग्याः मार्गदर्शकाः विद्यन्ते। शोधविभागेऽस्मिन् शिक्षाशास्त्रसम्बद्धाः छात्राः तथा आधुनिकसंस्कृतविज्ञानशोधचिकीर्षवः तथा विभिन्नक्षेत्रेषु शोधं विधातुं पर्याप्तावसराः कल्पिताः । अधुना विभागेऽस्मिन् पञ्चशोधच्छात्राः (5) स्वीयमनुसन्धानं सम्पादयन्तः विद्यन्ते।

इत्थं सर्वविधसाधनैः साकं परिसरीयशिक्षाशास्त्रविभागोऽयं सर्वेषां छात्राध्यापकानां शोधोत्सुकानां प्रोत्साहनं वितन्वन्, छात्राणाञ्च शिक्षणकौशलानि अभिवर्धयन् वरीवर्ति।



सत्रारम्भे यज्ञम् आचरन्तः प्राचार्यः प्राध्यापकाः छात्राश्च ।



वसन्तपञ्चमीपर्वणि सरस्वतीपूजनं कुर्वन्तः प्राचार्यः प्राध्यापकाः छात्राश्च ।

# विषयानुक्रमणिका


| क्रं.सं | शोधपत्रस्य शीर्षकम् | लेखकः | पृष्टसंख्या |
|---|---|---|---|
| 1. | उत्तरम् | प्रो. मदनमोहनझाः | 01 |
| 2. | सङ्गणकसहकृतभाषाशिक्षणम् | डॉ. देवदत्तसरोदे | 08 |
| 3. | सूचनाधिकारस्य जागरणे शिक्षायाः भूमिका | डॉ. वि. एस्. वि. भास्कररेड्डि | 18 |
| 4. | भाषाशिक्षणे मूल्याङ्कनस्य नूतनविधयः | डॉ. विनोदकुमारशर्मा | 25 |
| 5. | संस्कृतभाषाधिगमे भाषाप्रयोगशालायाः भूमिका | डॉ. सचिनकुमारः | 31 |
| 6. | समासानामधिगमे रेखीयाभिक्रमस्योपयोगिता | डॉ. कुमारः | 37 |
| 7. | भाषाशिक्षण में सूक्ष्मशिक्षण की उपयोगिता | डॉ. सुनीलकुमारशर्मा | 43 |
| 8. | Language laboratory: An Innovative technique | Dr. Shweta Sood | 51 |
| 9. | Significance of Evaluation and Assessment in Language proficiency | Dr. Leena | 57 |
| 10. | Using Computers in Language Teaching | Dr. SubhashChander Meena | 62 |
| 11. | How to enhance Sanskrit E-Learning by using Blog | Dr. Arti Sharma | 65 |
| 12. | Creating Sanskrit Web pages by using Hypertext Markup Language | Ms. Vaishali Nivadunge | 70 |
| 13. | संस्कृतशिक्षण में नवाचार : ई- अधिगम की भूमिका | डॉ. प्रेमसिंह सिकरवारः | 75 |
| 14. | भाषाशिक्षणशास्त्रशिक्षणयोः नवाचाराः | डॉ. गणपति वि. हेगडे | 82 |
| 15. | भाषाशिक्षणे मूल्याङ्कनस्य नूतनविधयः | डॉ. मनमोहनतिवारी | 86 |
| 16. | भाषाशिक्षणे सूक्ष्मशिक्षणम् | डॉ. माधवदत्तपाण्डेयः | 90 |
| 17. | भाषाशिक्षणे सङ्गणकयन्त्रम् | अलोकमण्डलः | 94 |
| 18. | भाषाशिक्षणे मूल्याङ्कनस्य नूतनविधीनाम् आलोचनात्मकमध्ययनम् | पलाशमण्डलः | 103 |
| 19. | भाषाशिक्षणे संङ्गणकस्य अनुप्रयोगः | जीतेन्द्रकुमारगुप्तः | 108 |
| 20. | भाषाशिक्षणे मनोवैज्ञानिकसम्प्रत्ययानाम् अनुप्रयोगः | रामजियावनप्रजापतिः | 111 |
| 21. | साकल्यशिक्षा साकल्यविद्यालयस्य च सम्प्रत्ययः संसाधनानि उपलब्धता च | मम्मटवर्गः | 115 |

| | | |
|---|---|---|
| 22. मानवाधिकाराणां संरक्षणे राष्ट्रियमानवाधिकारायोगस्य भूमिका | आनन्दवर्धनवर्गः | 121 |
| 23. सक्रियपाठ्यचर्यानुभवोत्पादने शिक्षकस्य भूमिका | वामनवर्गः | 129 |
| 24. अधिगममूल्याङ्कने केन्द्रीयप्रवृत्तिमापनानाम् अनुप्रयोगः | कुन्तकवर्गः | 134 |
| 25. अष्टादशशास्त्राणां परिचयः | दण्डिवर्गः | 143 |
| 26. व्यक्तित्वस्य सिद्धान्ताः | पाणिनिवर्गः | 158 |
| 27. पर्यावरणपरिरक्षणे विविधाभिकरणानां भूमिका | भर्तृहरिवर्गः | 166 |
| 28. संस्कृतभाषाशिक्षणकौशलानि तत्संवर्धनोपायाश्च | कात्यायनवर्गः | 170 |
| 29. भाषाशिक्षणे अन्तर्जालस्य प्रयोगः शैक्षिकोपग्रहश्च | पतञ्जलिवर्गः | 177 |
| 30. भारतीयसंविधाने निहितानां शिक्षासम्बद्धानाम् अनुसूचीनाम् अधिनियमानाञ्च संग्रहणम् | जयादित्यवर्गः | 183 |

*****

शिक्षारश्मिः 2018, ISSN : 2395 - 7921

# उत्तरम्

✍प्रो. मदनमोहनझाः *

शिक्षणाधिगमप्रक्रियायां यथा प्रश्नः महत्त्वपूर्णः भवति, तथैवोत्तरमपि महत्त्वपूर्णं भवति । प्रायः कक्षायां छात्राः अपूर्णं दोषपूर्णञ्चोत्तरं ददति । अस्य कारणं स्वयमध्यापकः एव भवति । यतः सः उत्तरनिष्कासने दक्षः न भवति । अतः छात्राध्यापकाः उत्तराणां महत्त्वं ज्ञात्वा उत्तरनिष्कासने दक्षाः भवेयुः । उत्तराणां महत्त्वं गार्लिकमहोदयः प्रतिपादयति -

1. उत्तरप्रदाने अवधानस्यावश्यकता भवति । अतः समुचितोत्तरप्रदानेन छात्राणामवधानं केन्द्रितं भवति ।
2. उत्तरप्रदानार्थं विचारस्यावश्यकता भवति । फलतः उत्तरप्रदानेन छात्राणां तर्कस्य प्रशिक्षणं भवति ।
3. छात्राणां स्मृति निश्चितरूपेण कार्यं करोति । बाध्यतया एव भवतु, परं सा स्मृति अवश्यमेव कार्यं करोति ।
4. उत्तरमाध्यमेन छात्राणां मानसिकीक्रिया जागरिता भवति । फलतः छात्राणां बुद्धिः प्रखरा भवति ।
5. उत्तराणां माध्यमेन छात्राः अध्यापकाश्च शिक्षणस्य पाठस्य वा क्रमपूर्णायोजनस्य ज्ञानं प्राप्नुवन्ति ।
6. अनेन पाठस्य शिक्षणे प्राप्तसाफल्यस्य ज्ञानं भवति ।

**उत्तमोत्तराणां गुणाः—**

1. **शुद्धा भाषा-**

छात्रप्रदत्तमुत्तरं भाषादृष्ट्या, व्याकरणदृष्ट्या च पूर्णरूपेण शुद्धं स्यात् । उत्तराणां भाषायाः संशोधनं केवलं भाषाध्यापकानामेव कार्यं नास्ति, अपितु सर्वे अध्यापकाः विषयेऽस्मिन् अवधानं दद्युः ।

2. **उचिता भाषा-**

उत्तरप्रदाने केवलं लैखिकभाषायाः प्रयोगः कर्त्तव्यः। गृहे प्रयुक्तायाः वाचने भाषणे प्रयुक्तायाश्च भाषायाः प्रयोगः प्रश्नानामुत्तरप्रदानार्थं न करणीयम् । अन्यथा कक्षायां कदाचित् बालकाः हसेयुः ।

3. **एका भाषा-**

उत्तराणां भाषा एका एव स्यात् । कदाचिच्छात्राः उत्तरप्रदानार्थं अन्यभाषागतानां शब्दानामपि प्रयोगं कुर्वन्ति।

**4. सरला भाषा-**

लैण्डनमहोदयानामनुसारेण उत्तराणां भाषा सदैव सरला एव स्यात् । कदाचित् छात्राः स्वोत्तरे ज्ञानप्रदर्शनार्थमेवं प्रकारकाणां शब्दानां सूक्तीनां प्रयोगं कुर्वन्ति येषां तात्पर्यं न तु ते जानन्ति, न च अन्ये छात्राः एव जानन्ति । शिक्षकः तमवरोधयेत् । यतः अनेन छात्राणां न कोऽपि लाभः भवितुमर्हति ।

*आचार्यः विभागाध्यक्षश्च , शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि) मुम्बई परिसरः*

**5. स्पष्टार्थः-**

उत्तरमेवं भवितव्यं यस्य कः अपि स्पष्टः अर्थः स्यात्। फलतः उत्तरमर्थपूर्णं स्यात् । एवं प्रकारकमुत्तरं तथ्यपूर्णं भवति । लैण्डनमहोदयानामनुसारेण- अर्थानां स्पष्टता उत्तराणामेवं प्रकारकं वैशिष्ट्यमस्ति यस्य कृते सर्वे यतन्ति । यतितव्यञ्च ।

**6. निश्चितविचारः-**

उत्तरेषु यः कोऽपि विचारः स्यात्, सः विचारः निश्चितः स्यात् । कदाचित् छात्राः एवमुत्तरं ददति यस्य विचारं निश्चितं न भवति । यथा - प्रश्नः भवति यत् ताजमहलस्य निर्माणं केन कृतम्, छात्राः उत्तरं प्रददति यत् - ताजमहलस्य निर्माणं केनचित् मुस्लिमशासकेन कृतं भवितुमर्हति। अथवा अस्य निर्माता शाहजहाँ भवितुमर्हति । एवं प्रकारकमुत्तरं दोषपूर्णं भवति । लैण्डनमहोदयानामनुसारेण- शिक्षकाः उत्तराणामनिश्चिततां दूरीकर्तुं प्रयासं कुर्युः ।

**7. पूर्णविचारः -**

भावात्मकदृष्ट्या उत्तराणि पूर्णानि भवितव्यानि । अतः अध्यापकाः अवधानं दद्युः येन छात्राः स्व-उत्तरेषु पूर्णभावानां प्रदर्शनं कुर्युः । अपूर्णभावयुक्तानामुत्तराणां संशोधनं छात्राणां साहाय्येन करणीयम्। असम्भवे सति अध्यापकेनैव करणीयम् ।

**8. पूर्णं वाक्यम्-**

छात्राणामुत्तराणि शिक्षकाः पूर्णेषु वाक्येष्वेव स्वीकुर्युः। अपूर्णमुत्तरं छात्राणां भावान् विचाराञ्च न स्पष्टयति ।

**9. प्रासङ्गिकता-**

छात्राः प्रश्नस्यानुगुणमेवोत्तरं प्रदद्युः । छात्राः स्पष्टरूपेण निर्दिष्टव्याः यत् ते प्रश्नेष्ववधानं प्रदाय एव उत्तरं प्रदद्युः । ते स्वकीयेषु उत्तरेषु अपृष्टं विचारं न योजयेयुः । अतः प्रश्नानां प्रसङ्गे एव छात्राणामुत्तराणि भवितव्यानि।

**10. श्रवणीयम्-**

छात्राः प्रशनानामुत्तराणि एवं प्रदद्युः येन कक्षायां स्थिताः सर्वे छात्राः तेषामुत्तराणि श्रोतुं समर्थाः भवेयुः। यतोहि छात्राः यदि उत्तराणि न श्रोष्यन्ति तर्हि किं कथितवान् किं कथितवान् इति कृत्वा कोलाहलं करिष्यन्ति। फलतः कक्षायामनुशासनहीनताऽऽयाति ।

**11. संक्षिप्तम्-**

गार्लिकमहोदयानुसारेणोत्तराणि संक्षिप्तानि भवितव्यानि। अनेन समयस्य भाषायाश्च सदुपयोगः भवति । एकस्य प्रश्नस्य उत्तरे अधिकाधिकं वक्तव्यम् अनुचितं भवति । अतः छात्राः प्रश्नस्य उत्तराणि संक्षिप्तरूपेणैव प्रदद्युः ।

**12. विचारपूर्णम्-**

उत्तराणि उत्तमानि तदैव भवन्ति यदा छात्राः उत्तराणां विषये सम्यग्रूपेण विचारयन्ति । अर्थात् विचारात्परं प्रदीयमानमुत्तरं छात्राणां मानसिकक्रियायाः फलं भवति । फलतः विचारपूर्णं भवति । एवं प्रकारकमुत्तरं काल्पनिकमनुमानाश्रितं वा न भवति।

**दोषपूर्णानि उत्तराणि**

**1. अनुमितमुत्तरम्-**

अनुमितानि उत्तराणि सदा दोषपूर्णानि भवन्ति। प्रत्येकस्यां कक्षायां एवं विधाः छात्राः भवन्ति ये प्रायः प्रश्नान् न श्रोष्यन्ति, उत्तराणि न चिन्तयिष्यन्ति परमनुमानेन उत्तराणि प्रददति । एवं प्रकारकाः छात्राः आशान्विताः भवन्ति यत् किञ्चन उत्तरं समुचितं भविष्यति एव । एवं प्रकारकेषु उत्तरेषु विवेकस्याभावः भवति । अतः शिक्षकाः छात्रान् अवरोधयन्तु । लैण्डनमहोदयस्याभिमतमस्ति यत्- ये अध्यापकाः एवं प्रकारकमुत्तरं प्रोत्साहन्ति, वस्तुतः ते छात्रेषु अनवधानस्याभ्यासमुत्पादयन्ति।

**2. अनवधानता-**

केचन छात्राः प्रश्नश्रवणानन्तरमेव साक्षात् चिन्तनं विनैव झटिति एव उत्तरं प्रयच्छन्ति। ते न चिन्तयन्ति यत् उत्तरे यत्किमपि ते कथयन्ति, किं तत् समीचीनमस्ति न वा । लैण्डनमहोदयाः कथयन्ति यत्- एवं प्रकारकमुत्तरं छात्राणां त्रुटिः नास्ति अपितु मूढ़त्वमस्ति। ते न क्षन्तव्याः तान् अनुत्साहयितव्यम्।

**3. काल्पनिकता-**

कक्षायां केचन छात्राः एवं भवन्ति ये अध्यापनशैल्या, प्रश्नकरणशैल्या एवावगच्छन्ति यत् प्रश्नमाध्यमेनाध्यापकः किमिच्छतीति। एवं विधाः छात्राः कदाचित् कक्षायां संकटपूर्णां स्थितीमुत्पादयन्ति। कदाचित् ते निष्कर्षपूर्णमुत्तरं प्रददति । एवं शिक्षणकार्यमवरुद्धं भवति । अध्यापकाः किंकर्तव्यविमूढ़ाः भवन्ति । अतः छात्राः विज्ञाप्याः यत् प्रश्नानामेवोत्तरं दद्युः। निस्कर्षकथनं समये एव भविष्यति । छात्राः स्वनिष्कर्षं स्थापयन्तु। भविष्येऽपि अस्यादेशस्य पालनम् अवश्यमेव कुर्युः ।

**4. हास्यप्रदमुत्तरम्-**

कदाचित् छात्राः ज्ञात्वा हास्यप्रदमुत्तरं मूर्खतापूर्णञ्चोत्तरं ददति। एवं विधाः छात्राः अक्षम्याः भवन्ति। अतएव दण्डनीयाः।

**5. सामूहिकमुत्तरम्-**

साहूमिकमुत्तरमुचितं न भवति। कक्षायां छात्राः वैयक्तिकरूपेण स्वार्जितज्ञानस्य प्रदर्शनं कुर्युः एतदर्थं छात्राः वैयक्तिकरूपेण प्रश्नानामुत्तरं प्रदद्युः । अतः छात्राणामेवम् अवसरः प्रदेयः । विषयेऽस्मिन्

रायवर्णमहोदयाः कथयन्ति यत्- सामूहिकस्योत्तरस्य आज्ञा न कदापि दातव्या। द्वित्राः अपि न आज्ञाप्याः सामूहिकोत्तरप्रदानार्थम्।

**6. प्रतिक्रियाहीनता-**

कक्षायामियमेका जटिला समस्या भवति यत् छात्राः उत्तरं न प्रयच्छन्ति । ते निष्क्रियाः भवन्ति । प्रतिक्रियाविहीनाः भवन्ति। यदि ददति अपि तर्हि आवशयकतानुसारं न प्रददति।

**उत्तरनिष्कासनम्**

यथा प्रश्नकरणमेका कला अस्ति, तथैव उत्तरनिष्कासनमप्येका कला अस्ति । यतः कक्षायां प्रायः छात्राः उत्तरप्रदाने संकोचमाचरन्ति । सत्यपि उत्तरस्य ज्ञाने कक्ष्यायां सम्यग्रूपेण न कथयन्ति, दोषपूर्णं कथयन्ति। अतः अध्यापकाः यदि उत्तरनिष्कासनकौशले कुशालाः स्युः, तर्हि छात्राः प्रश्नानां समुचितमुत्तरं दास्यन्ति एव। कौशलेऽस्मिन् दक्षतासम्पादनार्थं निम्नलिखितेषु अंशेषु अवश्यमेवावधानं प्रदेयम्।

1. प्रश्नकरणात्परं साक्षादेव उत्तरस्य जिज्ञासा न करणीया। प्रायः अध्यापकाः प्रश्नं कुर्वन्ति, ततः परं क्षणात्मकमपि अवकाशं न दत्वा उत्तरं पृच्छन्ति । अनेन छात्राणां कृते उत्तरस्य चिन्तनार्थं समयः न लभ्यते । फलतः उत्तरं दोषपूर्णम्, अपूर्णम्, अनुचितं वा भवति । अतः प्रश्नकरणात् परं किञ्चिदपि समयः छात्रेभ्यः प्रदातव्यः।

2. अध्यापकाः उत्तरं प्रति धैर्यधारणं कुर्युः । छात्राः उत्तरप्रदानार्थं यदा समयं स्वीकुर्वन्ति तदा अध्यापकाः धैर्यहीनाः भवन्ति। ते स्वयमेव उत्तरं कथयन्ति। परं नेयं प्रक्रिया समुचिता। अध्यापकाः कदापि न विस्मरेयुः यत् छात्राः मानवाः भवन्ति। ते मानवशिशून् पाठयन्ति। येषु चिन्तन-विचार-तर्क-कल्पनादिशक्तयः सन्ति। ते विचिन्त्य उत्तरं दास्यन्ति। उत्तरे न प्राप्ते सति प्रश्नानां स्वरूपपरिवर्तनं कुर्युः, अपेक्षितोत्तरानुगुणं प्रश्नान् रचयेयुः।

3. अध्यापकानां व्यवहारः छात्रान् प्रति सहानुभूतिपूर्णः स्यात्। अध्यापकेषु केचन रुक्षाः भवन्ति, केचन कर्कशस्वभावाः। फलतः कक्षायां भयस्यातंकस्य च वातावरणं भवति। भीताः आतंकिताः च छात्राः जानन्तोऽपि उत्तरं न प्रददति। ते अध्यापकस्य आतंके भये वा सर्वं विस्मरन्ति। अतः कक्षायां सहानुभूतिपूर्णं वातावरणं स्यादित्येतदर्थं अध्यापकाः आचरेयुः । येन छात्राः अध्यापकान् मार्गदर्शकरूपेण स्वीकुर्युः । मैत्रीपूर्णव्यवहारे एव प्रचलितमध्यापनं सफलं भवति । जटिलानां प्रश्नानामुत्तरमपि छात्राः स्वाभाविकरूपेण प्रददति।

4. अध्यापकाः उत्तरप्रदानार्थं छात्रान् प्रोत्साहयेयुः । प्रत्येकस्यां कक्षायां केचन मन्दबुद्धयः, मध्यमानबुद्धयः, सामान्यबुद्धयः, प्रतिभाशालिनश्च छात्राः भवन्ति। अतः सर्वविधाः छात्राः कक्षायां प्रोत्साहितव्याः। येन ते मन्दाः अपि छात्राः उत्तरप्रदाने सक्षमाः भवेयुः। परमत्यधिकं प्रोत्साहनमपि

कक्षायां शिक्षणदृष्ट्या अनुचितं भवति । केचन अध्यापकाः शोभनम्, बहु सुन्दरम्, अतिसमीचीनम् इत्यादिकथने अभ्यस्ताः भवन्ति। परमिदमनुचितमस्ति। प्रोत्साहनमावश्यकतानुसारेणैव दातव्यम्।

5. लज्जावतां छात्राणां प्रोत्साहनम्- कक्षायां केचन छात्राः लज्जाशीलाः भवन्ति, अपि च केचन स्वभावेन संकुचिताः भवन्ति। ते लज्जावशात् संकोचवशाद् एव जानन्नपि उत्तरं न प्रददति। शिक्षकाः तान् प्रोत्साहयेयुः। तेषां लज्जां दूरीकुर्युः, तान् संकोचमुक्तान् कुर्युः । येन तेऽपि मन्दाः छात्राः प्रशनानामुत्तरं प्रदद्युः ।

6.सर्वे छात्राः उत्तरप्रदानार्थं निर्देष्टव्याः । केचन अध्यापकाः केषाञ्चन छात्राणां नामानि स्मरन्ति । कक्षाध्यापनसमये ते प्रश्नमुक्त्वा सदा तेभ्यः एव उत्तरं पृच्छति । फलतः अन्ये छात्राः निष्क्रियाः भवन्ति। अतः ते अवशिष्टाः छात्राः उत्तरचिन्तनं न कुर्वन्ति । ते शिक्षणं प्रति स्वकीयमौदासीन्यं प्रदर्शयन्ति। यतः ते जानन्ति यत् अध्यापकः तान् उत्तरदानार्थं न कथयिष्यन्ति। अत एव प्रश्नमपि न शृण्वन्ति। सर्वे जानन्ति एव यत् शिक्षणे सहयोगी भावना अनिवार्या भवति। अतः अध्यापकाः सर्वेषां छात्राणां सहयोगं स्वीकुर्युः ।

7.उत्तरे सहयोगः न दातव्यः- छात्राः स्वयमेव पूर्णमुत्तरं प्रदद्युः । अध्यापकाः उत्तरप्रदानार्थं न किमपि सहयोगं प्रदद्युः । कश्चन छात्रः यदि उत्तरे कञ्चन शब्दमुक्त्वा विरमति तर्हि अध्यापकः तमुत्तरं न पूरयेत्। अनेन छात्राणां मानसिकविकासः अवरुद्धः भवति । यदि एकः छात्रः उत्तरं न कथयति तर्हि अन्ये छात्राः प्रष्टव्याः । यदि अधिकांशाः छात्राः उत्तरप्रदाने असमर्थाः स्युः तर्हि प्रशनः एव दोषपूर्णः इति ज्ञात्वा प्रश्नसंशोधनं करणीयम्।

8.उत्तराणामावृत्तिः न भवेत् । प्रायः दृश्यते यत् छात्राः यदुत्तरं ददति तस्योत्तरस्यावृत्तिमध्यापकः करोति, परं नायं विधिः समुचितः । अनेन समयनष्टः भवति । छात्राः कक्षायामनवधानाः भवन्ति । ते सावधानेन अन्येषामुत्तरं न श्रोष्यन्ति। यतः ते जानन्ति यत् उत्तराणामावृत्तिः तु अध्यापकेन भविष्यति एव। फलतः कक्षायां छात्राः अनवधानाः भवन्ति।

9.निर्दिष्टः एव छात्रः उत्तरं प्रदद्यात्। अध्यापकाः छात्रेषु एवमभ्यासनिर्माणं कुर्युः येन ते अनुमतिं विना उत्तरं न प्रदद्युः । अतः प्रश्नकरणात्परं क्षणात्मकमवसरं प्रदाय छात्राः प्रष्टव्याः यत् के के उत्तरं दातुमिच्छन्ति? अथवा उत्तरं कः दास्यति ? स्वहस्तमुत्थापयत । पुनः उत्थापितेषु हस्तेषु कश्चन निर्देष्टव्यः यत् - त्वं कथय । तदा सः एव निर्दिष्टः छात्रः उत्तरं प्रदद्यात् । स्वेच्छया, अनाज्ञया उत्तरकथनेन कक्षायां छात्रेषु च अनुशासनहीनता आगच्छति।

10. ऑष्टिनमहोदयस्यानुसारेण शिक्षकाः अशुद्धमुत्तरं न स्वीकुर्युः । परं केवलं भवतामुत्तरमशुद्धमस्ति इति न कथनीयम्। अपितु भवतामुत्तरं किमर्थमशुद्धमस्ति इत्यपि कथनीयम्। अनेन छात्राः कुण्ठिताः न भवन्ति। अतः उत्तरं कुत्र किमर्थं वा अशुद्धमस्ति इत्यपि विज्ञाप्य तिरस्ककरणीयम्।

11.अशुद्धोत्तराणां कारणमपि विज्ञापनीयम् । छात्रप्रदत्त-अशुद्धोत्तरस्य अशुद्धतायाः कारणान्यपि सूचनीयानि । अनेन छात्राणां मनसि सन्देहो नागच्छति। ते स्वकीयं त्रुटिमवगच्छन्ति । रायवर्णमहोदयानां कथनमस्ति यत्- यदि उत्तरं निश्चतरूपेण अशुद्धमस्ति तर्हि अध्यापकाः तेषां कारणानां व्याख्यामपि कुर्युः, येन कारणेन उत्तरम् अशुद्धमस्ति । यावत् शिक्षकः नैपुण्येनेदं न स्पष्टीकरोति यदुत्तरे किमशुद्धमस्ति, तावत् छात्राः सम्यग्रूपेण विषयं नाधिगच्छन्ति।

12.अशुद्धोत्तराणां विश्लेषणम् । यदि कश्चन छात्रः प्रश्नानां शुद्धमुत्तरं न ददाति तर्हि अध्यापकः अशुद्धोत्तराणां विश्लेषणं कृत्वा तेषां संशोधनं कुर्यात् । अनेन स्वयमेव छात्राः स्वत्रुटीमवगच्छन्ति ।
13.यः छात्रः अशुद्धमुत्तरं प्रददाति, तैः शुद्धोत्तराणामावृत्तिः कारयितव्या, अर्थात् छात्राणाम् अशुद्धोत्तरमस्वीकृत्य अन्ये छात्राः प्रष्टव्याः। शुद्धोत्तरं सम्प्राप्य अशुद्धोत्तरप्रदातृभ्यः छात्रेभ्यः पुनः प्राप्तशुद्धोत्तराणामावृत्तिः कारयितव्याः। अनेन त्रुटीनां ज्ञानं भवति ।

14.आंशिकरूपेण शुद्धोत्तराणामुपेक्षा न करणीया । यदि कश्चन छात्रः आंशिकं शुद्धमुत्तरं ददाति तर्हि तदुत्तरं नोपेक्षणीयम् । अध्यापकः प्रयासं कुर्यात्, येन सः पूर्णं शुद्धमुत्तरं प्रदद्यात् । विषयेऽस्मिन् केनेडी महोदयाः कथयन्ति यत्- यदा एवं विधानि उत्तराणि प्रदीयन्ते येषां कश्चन भागः एव शुद्धं भवति तर्हि अशुद्धभागस्य उपेक्षां विधाय शुद्धभागस्योपयोगः करणीयः।

15.समुचितानामुत्तराणां प्रशासा करणीया । अध्यापकः तेषां छात्राणां प्रशंसां कुर्यात् ये समुचितमुत्तरं प्रददति । प्रशंसा समीचीनम्, शोभनम्, संकेतेन वा करणीया । प्रशंसया छात्रः प्रोत्साहितः भवति । विषयेऽस्मिन् ऑष्टिन्महोदयाः कथयन्ति यत् प्रयासस्य कृते साफल्यस्य कृते च प्रशंसा करणीया । अन्यथा प्रयासमनुसाफल्येन बहुप्रयासाः नष्टाः भवन्ति ।

16.अशुद्धोत्तरस्य कृते छात्राः न तिरस्करणीयाः । यदि कश्चन छात्रः अशुद्धमुत्तरं कथयति तर्हि तस्य छात्रस्य तिरस्कारः न करणीयः न च सः छात्रः दण्डनीयः । तस्योपहासोऽपि न कर्त्तव्यः । असाफल्यं स्वयमेव हि एकः दण्डः भवति । अतः अतिरिक्तदण्डप्रदानेन छात्रेषु हीनभावनायाः उत्पत्तिः भवति । ऑष्टिनमहोदयानामनुसारेणापि अशुद्धोत्तरप्रदाता छात्रः नोपेक्षितः, केवलमुत्तरमेव उपेक्षितं भवति ।

17.सामूहिकमुत्तरं न स्वीकरणीयम् । छात्रेभ्यः सामूहिकोत्तरप्रदानार्थमाज्ञा कदापि न दातव्या । सामूहिकोत्तरप्रदानेन कक्षाः बाधिताः भवन्ति । कक्षायामनुशासनहीनतामागच्छति । के उत्तरं ददति, के च उत्तरं न ददति इति सम्यक् न प्रतीयते ।

18.विचारविहीनमुत्तरं न स्वीकरणीयम् । केचन छात्राः चिन्तनं विनैव किमपि उत्तरं प्रदति । यतः ते चिन्तयन्ति यत् उत्तरं तु दातव्यमेव अस्ति । केचन छात्राः मनोरञ्जनदृष्ट्या अपि हास्यास्पदमुत्तरं प्रददति। उभयविधमुत्तरमवरोधनीयं कक्षारम्भादेव । अन्यथा छात्राः उच्छृङ्खलाः विवेकहीनाश्च भविष्यन्ति ।

19.शुद्धाशुद्धोत्तरयोर्मध्ये अन्तरस्पष्टीकरणम् । कदाचिदेकस्यैव प्रश्नस्य अनेकान्युत्तराणि प्राप्यन्ते । एतेषु उत्तरेषु कानिचन शुद्धानि अशुद्धानि च भवन्ति । सन्दर्भेऽस्मिन् ऑष्टिनमहोदयानामभिमतमस्ति यत् उत्तराणां तुलना कर्त्तव्या, पुनश्च स्पष्टरूपेण उत्तराणां शुद्धाशुद्धत्वं विज्ञापनीयम् ।

**उत्तराणां शुद्धीकरणम्**

1. ये छात्राः अशुद्धमुत्तरं प्रददति ते शुद्धोत्तरश्रवणानन्तरं शुद्धोत्तराणाम् आवृत्तिं कुर्युः ।
2. भाषाजन्याः, व्याकरणजन्याश्चाशुद्धयः छात्रैः हर्तव्याः।
3. आंशिकाशुद्धोत्तराणि स्वीकृत्य छात्रैः संशोधनीयम् ।
4. पूर्णतः अशुद्धोत्तराणामशुद्धतायाः कारणं विज्ञाप्य अस्वीकृत्य च अन्यछात्रेभ्यः प्रश्नं पृच्छेत् ।
5. यदि कक्षायाः कश्चन्नपि छात्रः उत्तरं न प्रददाति तर्हि प्रश्नस्य भाषा-शैली-शब्दाश्च परिवर्तनीयाः ।
6. कदाचित् किञ्चन उत्तरं कक्षायै प्रदाय कक्षायाः अभिमतमवगम्य तेषां संशोधनं करणीयम् ।
7. यदि कश्चन छात्रः स्वकीयस्य अन्येषां वा छात्राणामुत्तरं कथमशुद्धमस्तीति ज्ञातुमिच्छन्ति तर्हि अध्यापकाः स्पष्टरूपेण तेषां सन्देहनिवारणं कुर्युः ।
8. यदि अध्यापकः आशान्वितः अस्ति यत् अशुद्धोत्तरदाता छात्रः शुद्धोत्तरदातुमर्हति तर्हि सः प्रयासं कुर्यात् । परं कर्मण्यस्मिन् अधिकः समयः न यापनीयः ।
9. यदा कदा भाषा-व्याकरण-तथ्यात्मकदृष्ट्या अशुद्धमत्तरं श्यामफलके लिखित्वा छात्रैः संशोधनं कारयित्वा शुद्धं रूपं लेखनीयम् ।
10. यदि छात्राणामुत्तरम् अधिकमशुद्धमस्ति तर्हि तेषामशुद्धतायाः कारणं विज्ञापनीयम् । परं कारणमन्वेषणात्पूर्वं प्रश्नानां शुद्धता परीक्षणीया ।
11. अध्यापकाः प्रत्येकम् अशुद्धोत्तराणां विस्तृता व्याख्या न कुर्युः ।

**अनुशीलितग्रन्थाः**

*1. रामशकलपाण्डेय. सफलशिक्षणकला।*

*2. रघुनाथ सफाया, अधिगम का मनोविज्ञान।*

*3. के पी पाण्डेय, संस्कृतशिक्षण ।*

*4. भाई योगेन्द्रजीत, हिन्दी शिक्षण ।*

# सङ्गणकसहकृतभाषाशिक्षणम्

✍ डॉ. देवदत्तसरोदे *

साम्प्रतिके काले विज्ञानस्य विस्फोटनात् प्रतिक्षेत्रं समूलं परिवर्तितम्। शिक्षाक्षेत्रमपि अनुनित्यं परिवर्तमानं विद्यते, तेन नानाविद्याशाखाः प्रसृताः। प्रयोजनवादाधृता शिक्षा लोके समादृता वर्तते, तस्माद् अर्थकरीं विद्यामेव प्राप्तुं जना अहमहमिकया प्रयतमानाः सन्ति। परिवर्तिनि अस्मिन् संसारे नवीना प्रवृत्ति**:** रुचिरा भवति, स्वाभाविकमेतत् । विज्ञानक्षेत्रे, प्रविधौ:, मनोविज्ञाने, शिक्षाक्षेत्रे च भृशमनुसन्धानफलेन कल्पनातीतविकास:, नैकविधसाधनानि, अनेकानि उपकरणानि आविष्कृतानि । तत: प्रतिक्षेत्रम् अनुनित्यं नूतनादृष्टि:, नूतनाप्रवृत्ति: विलोक्यते । लोके भाषाशिक्षणेऽपि नूतना: प्रवृत्तय: दृश्यन्ते । अत: कास्ता: भाषाशिक्षणे नवीनप्रवृत्तय: तासु संगणकसहकृतभाषाशिक्षणम् इति काचित् प्रवृत्ति: विद्यते । अस्या: स्वरूपं किम् ? अस्या: प्रयोग**:** भाषाशिक्षणे विशिष्य संस्कृतभाषाशिक्षणे कथं भवितुमर्हति तदत्र विचार्यते।

## नवप्रवृति: -

नवो नवो भवति जायमान: इति सूक्ति: असकृत् आकर्ण्यते । नवीनं सर्वेभ्यो रोचते नूतने समेषां रूचि:, प्रवृत्ति: भवति । इह खलु का नाम नवीनप्रवृति: ? इति जिज्ञासायाम् उच्यते नवीनाचरणम् अथवा परिवर्तनं वा । नवीनप्रवृति: नाम तादृक् परिवर्तनं यत् पूर्वविद्यमानविधिषु , क्रियाकलापेषु , पदार्थेषु , विचारेषु , तत्त्वेषु अभिनवत्वस्य सञ्चार: । नवजागरणकालात् परम् औद्योगिकक्रान्त्या पश्चिमजगति यत् परिवर्तनं , विकासश्च आरब्ध: तत्प्रभाव: सर्वत्र जगति सर्वेषु क्षेत्रेषु अभूत् । तत: परं विज्ञानस्य विकास: जवेन आरब्ध:। संगणकस्य, अन्तर्जालस्य, आविष्करणात् परं सूचनाप्रौद्योगिक्या अतर्कितपरिणामेन नूतनं चिन्तनं, नूतना दृष्टि:, नूतना प्रवृत्ति: सर्वत्र प्रसृता । भाषाशिक्षणेऽपि काश्चन नूतनाप्रवृत्तय: आगता: । तासु कतिपया: नामग्राहम् अधस्तात् प्रस्तूयन्ते, भाषाशिक्षणे साम्प्रतं प्रवर्तमाना: इमा: काश्चन नूतनप्रवृत्तय: सन्ति ।

- दूरदर्शनमुखेन भाषाशिक्षणम् /उपग्रहद्वारा भाषाशिक्षणम्
- सीमितावर्तदूरदर्शनं (C C T V) द्वारा भाषाशिक्षणम्
- अभिक्रमिताधिगमाभिगमेन भाषाशिक्षणम्
- अनुदेशनप्रणाल्या भाषाशिक्षणम्
- दूरस्थमाध्यमेन भाषाशिक्षणम्
- संगणकसहकृतभाषाशिक्षणम्
- सूक्ष्मशिक्षणमुखेन भाषाशिक्षणम्,(भाषाकौशलानि सम्पादयितुम् ) इति नैका: प्रवृत्तय: सन्ति तासु अस्मिन् पत्रे संगणकसहकृतभाषाशिक्षणम् अधिकृत्य विचार**:** प्रस्तूयते ।

** सहायकाचार्यः (वरिष्ठः), शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि) मुम्बई परिसरः*

**सङ्गणकम् -**

सङ्गणकं नाम मानवनिर्मितं विशिष्टं यन्त्रं यत् अभिक्रमितानुदेशनप्रणाल्या प्रदत्तसूचनाः आधारीकृत्य अभीष्टं कार्यं जवेन, पुष्कलमात्राभिः, निर्दुष्टतया, अश्रान्त्या, साधयति। Computer is an electronic device that is designed to work with Information. The term computer is derived from the Latin term 'computare', this means to calculate or programmable machine. सङ्गणकसहकृतं नाम सङ्गणकसहायेन सम्पाद्यमानं कार्यम् इत्यर्थः । यदि भाषाशिक्षणकार्यं सङ्गणकसहायेन सम्पाद्यते तर्हि तत् सङ्गणकसहकृतभाषाशिक्षणमित्युच्यते ।

**का नाम भाषा ?** किञ्चास्य स्वरूपमिति जिज्ञासायाम् उच्यते -

अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा।
आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥[१] (म.भा. शान्ति. 232।56)

ब्रह्मणा सर्गादौ आद्यन्तरहिता नित्या दिव्या वेदमयी वागुत्सृष्टा (निर्मिता) ततः सर्वाः प्रवृत्तयः प्रावर्तन्त इति भारतीयर्षिमुनीनां मतम्। वाक्यपदीयकारः व्याकरणदर्शनतत्त्वं प्रतिपादयन् एवमाह -

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥ (वा.प. - ब्रह्म.का. 1)

शब्दतत्त्वं यद् अक्षरब्रह्म आद्यन्तरहितं (नित्यं) वर्तते तदेव अक्षरब्रह्म अर्थभावेन विवर्तते। जगतः प्रक्रियाः अस्मादेव शब्दब्रह्मणो जायन्ते। तस्मात् सर्वमूलत्वं शब्दब्रह्मण इत्यर्थः। वैयाकरणाः शब्दान् नित्यान् आतिष्ठन्ते, अतः तेषां मते भाषा अपि नित्येति निष्पन्नम्। परन्तु आधुनिकाः भाषाशास्त्रिणः- भाषा मानवस्य क्रमिकविकासस्य परिणाम इत्याहुः।

**भाषानिर्वचनम् -**

भाषा भावसञ्चारस्य समुचितं साधनम् अथवा भाषा नाम परस्परं विचारभावनानुभवानां विनिमयार्थः अन्योऽन्यप्रयोजनसम्पादनायोपयुज्यमानं प्रभावि साधनम्। भाष्यते या सा भाषा अथवा भाषणात् भाषा इत्याहुः । भाष - व्यक्तायां वाचि इत्यस्माद् धातोः गुरोश्च हल इति सूत्रेण अ प्रत्यये कृते ततः स्त्रियां टापि सति भाषा इति पदं निष्पद्यते । भाषा नाम व्यक्तवाग् । व्यक्तवाग् नाम व्यक्ता वर्णा अकारादयो यस्यां सा वाग् व्यक्तवाग्[२] मानुषी वाणी । व्यक्तवाग्भाषा भावाभिव्यक्तौ समर्था भवति। आङ्गलभाषायां Language (भाषा) इति पदं लेटिन् भाषायाः lingua इति पदात् निष्पन्नम्। पाश्चात्यदार्शनिकः प्लेटो भाषामधिकृत्य एवमाह - "विचार आत्मनः मूकभाषा भवति। यदि स एव ध्वन्यात्मकः तदा भाषेति अभिधीयते"।

मानवाः आत्मनि विद्यमानान् भावान्, विचारान् मनोगतान्, अनुभवान् वा व्यक्तीकर्तुं, भाषां समाश्रयन्ति । भाषया परस्परं विचारविनिमयं साधयन्ति मानवाः । ज्ञानस्य सम्प्रदानं भाषया सुचारु सम्पद्यते ।

मानवजाते: विकासनिमित्तं भाषा तु प्रमुखं कारणम् इति कथने मनागपि संशयो नास्ति। सङ्गणकयुगेऽस्मिन् प्रविधिना सूचनाप्रौद्यिगिक्या च जगत: स्वरूपं व्यवहारविनिमयस्वरूपम् च आमूलचूलपरिवर्तितं तत्र ज्ञानस्य विस्फ़ोटने , प्रसरणे भाषा प्रधानभूता विद्यते।

**भाषामहत्त्वम् -**

मानवैतिह्ये सर्वप्रधानभूत: आविष्कारो यद्यस्ति चेत् स भाषाविष्कार: एव इति, यतोहि बुद्ध्या भाषयैव मानव: सर्वप्राणिजातमतिशते । भाषामन्तरेण मानवजीवनं दु:शकम् अत एव अनादिकालात् भाषाया: प्रवृत्ति: व्यवहारश्च लोके दृश्यते, भाषयैव मानवस्य बहुमुखीविकासो जायते। यस्मिन् देशे भाषा समृद्धा विकसिता भवति तत्रत्या जना अपि समृद्धा विकसिता भवन्ति। या भाषा परिष्कृता, परिमार्जिता, परिशुद्धा, परिपूर्णा, सरला, मधुरा, समर्था बोधगम्या, मञ्जुला च भवति सा लोके आद्रियते। चिरकालं यावत् सैव भाषा राराज्यते, यस्याः भाषायाः योगदानं विज्ञानस्य समाजस्य विकासे अर्थोपादाने च भवति यया जना उपकृता भवन्ति। अथवा यया भाषया जनानां सामाजिकार्थिकबौद्धिकराजनैतिकवैश्विक-सर्वाङ्गीणविकासः सम्पद्यते, अखिलेऽस्मिन् जगति तस्याः भाषायाः एव महत्त्वं प्रसारश्च भवति।

**भाषाशिक्षणम् -**

लोकेऽस्मिन् भाषाशिक्षणं अनौपचारिकमाध्यमेन जन्मन एव आरभ्यते । मानवजातौ भाषाधिगमप्रवृत्ति: स्वाभाविकी अत: अत्यल्पीयसि काले बाल: भाषां वक्तुं प्रारभते। मानवेषु भाषाशिक्षणं स्वाभाविकं सार्वभौमं सार्वकालिकं च विद्यते। सर्वत्र शिशुः बाल्यादेव मातुः सकाशाद् भाषामधिगच्छति । तत: परं गृहजनै: अन्यसामाजिकजनै: भाषामधिगच्छति एषैका सामाजिकी प्रक्रिया विद्यते यया अनायासेन लीलया बाल: भाषामधिगच्छति। भाषाशिक्षणं, परिवारे पारिवारिकजनैः, समाजे सामाजिकजनैः, अनौपचारिकमाध्यमेन सम्पन्नं भवति। अद्यत्वे सूचनाप्रौद्योगिकीमध्ये सूचनानाम् आदानप्रदानं भवति। तत्रापि भाषा प्रधाना भवति अतः भाषा शिक्षणं तावत् महत्त्वं भजते। सर्वविधज्ञानसम्पादनायोपायभूतं साधनं भाषा। कला विज्ञानदर्शनज्ञानस्य लिखितरूपेण सम्प्रदानस्य मौखिकसम्प्रेषणस्य ग्रहणस्य च समर्थमाध्यमं भाषैवास्ति। यत्र भाषाग्रहणे सम्प्रेषणे समर्था समृद्धा च भवति तत्र ज्ञानस्य समाजस्य च युगपत् विकासो जायते।

**संगणकसहकृतभाषाशिक्षणम् -**

संगणकसहकृतभाषाशिक्षणं नाम सङ्गणकस्य सहायेन भाषाशिक्षणम् इत्यर्थ**:,** आङ्ग्लभाषायाम् एतत् CALL इति अभिधीयते । **CALL** - Computer-Assisted Language Learning (CALL) is defined as "the search for and study of applications of the computer in language teaching and learning." The main aim of CALL is to find ways for using computers for the purpose of teaching and learning the language. More specifically, CALL is the use of computer technologies that promote educational learning, अस्य तात्पर्यं

विद्यते भाषाशिक्षणाधिगमाय सङ्गणकस्य अनुप्रयोगाय उपायान्वेषणम्।

**संगणकसहकृतभाषाशिक्षणस्य का आवश्यकता ?**

अध्याकमन्तरेणापि सङ्गणकं शिक्षकस्य किञ्चित् कार्यं साधयति । अधिगन्तारं महत्सहायम् अधिगमे विदधाति । नवप्रविधयः, नूतनतन्त्रांशाः सङ्गणकम् अतीव प्रयोजनकरं अकार्षुः । भाषाशिक्षणे नैकाः तन्त्रांशाः आगताः । अतः सङ्गणकमाध्यमेन भाषाशिक्षणम् अतीव रूचिरं प्रभावपूर्णं सम्पन्नम् । गतेषु त्रिंशत् वर्षेषु संगणकसहकृतभाषाशिक्षणे महत्परिवर्तनमागतम् , तत्र तावत् वारशर महोदयः एतत् त्रिधा विभनक्ति, यथा -

1. व्यावहारिकसंगणकसहकृतभाषाशिक्षणम् Behaviouristic CALL,
2. सम्प्रेषिताधारितसंगणकसहकृतभाषाशिक्षणम् Communicative CALL,
3. परिपृच्छाधारितसंगणकसहकृतभाषाशिक्षणम् Integrative CALL इति।

इदानीं भाषाधिगमे संगणकसहकृतभाषाशिक्षणं (CALL) कथमुपकरोति तत् जानीमः, संगणकसहकृतभाषाशिक्षणं मुख्यत्वेन त्रिधा भवितुमर्हति , केवलं सङ्गणकमाध्यमेन, सङ्गणके विद्यमानान् भाषाशिक्षणतन्त्रांशान् उपयुज्य, सङ्गणकमाध्यमेन अन्तर्जालीयसाधानानि उपयुज्य संस्कृतभाषाशिक्षणं भवितुमर्हति । संगणकसहकृतभाषाशिक्षणं भाषाधिगमे महदुपकरोति तदेतत् षोढा भवितुमर्हति, तथा च -

(1) सङ्गणकम् - आवृत्त्यभ्यासनिमित्तम् - Computer as Drill and Practice,
(2) सङ्गणकम् - शिक्षकरूपेण Computer as Tutor
(3) सङ्गणकम् - समस्यासमाधानरूपेण Computer as Simulation / Problem Solving,
(4) सङ्गणकम् - क्रीडारूपेण Computer as Game,
(5) सङ्गणकम् - अध्यापकानां विद्यार्थिनां कृते भाषाशिक्षणाय भाषाधिगमाय उपकरणरूपेण
(6) सङ्गणकम् - शिक्षकाणां विद्यार्थिनां कृते भाषाशिक्षणाधिगमाभ्याम् अन्तर्जालीयसाधनानि ।

एवं संगणकसहकृतभाषाशिक्षणं षोढा उपकर्तुं प्रभवति ।

**(1) सङ्गणकम् - आवृत्त्यभ्यासनिमित्तम् - Computer as Drill and Practice,**

आवृत्त्यभ्यासयोः त्रयः सोपानानि भवन्ति १. प्रेरकप्रदानम्, २. अधिगन्तुः प्रतिक्रियाग्रहणम्, ३. सत्वरं प्रतिपुष्टिप्रदानम् एतत्कार्यत्रयं सङ्गणकयन्त्रं चारु विदधाति । भाषाशिक्षणे एतादृशाः आवृत्त्यभ्यासाः नाना सन्ति । यथा - उचितमेलनम्, वाक्यपूरणम्, बहुविकल्पप्रश्नाः, साध्वसाधूत्तराणि, लघूत्तराणि इत्यादयः सुष्ठुसंरचित आवृत्त्यभ्यासतन्त्रांशः अधिगन्तुः अधिगमविकासं, तदर्थं यापितसमयं सूचयति, आङ्ग्ल-भाषायामेतादृशा केचन तन्त्रांशाः रचिताः, संकृतभाषाशिक्षणेऽपि एतादृशाः प्रयत्नाः जायमानाः सन्ति ।

**(2) सङ्गणकम् - शिक्षकरूपेण Computer as Tutor**

सङ्गणकस्य शिक्षकरूपेण अधोलिखितरीत्या सहायं भवितुमर्हति, यथा-

**व्याकरणशिक्षणम्** - संस्कृतव्याकरणशिक्षणे संज्ञा-तिङन्त-सुबन्त-कृदन्त-सन्धि-स्त्रीप्रत्यय-कारक-समासादिप्रकरणानि तन्त्रांशैः प्रभाविरीत्या शिक्षयितुं शक्यन्ते । एवं भूततन्त्रांशनिर्माणे प्रयत्ना: जवाहरलालनेहरुविश्वविद्यालय: दिल्ली, हैदराबादकेन्द्रीयविश्वविद्यालय:, कानपुर-IIT मध्ये अन्यत्र च जाता: क्वचित् जायमाना: सन्ति, राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालय:) इत्यत्रापि एवं भूतानि शोधकार्याणि जातानि सन्ति । आङ्ग्लभाषाव्याकरणशिक्षणेऽपि बहव: तन्त्रांशा: निर्मिता: सन्ति । यै: व्याकरणशिक्षणं भवितुमर्हति । यथा -

- Longman Grammar Software;
- Grammar Expert Plus; Tense Buster (Clarity Software);
- Grammar Mastery (ALA);
- Grammar Rom (Addison Wesley Longman);
- Grammar 3D:
- Contextualized Practice for Learners of English (Heinle & Heinle).

**वाचनम्** – वाचनकौशलमधिगन्तुं , नानाप्रकारकाणि वाचनानि आदर्शवाचनम्, सस्वरवाचनम्, तीव्रवाचनम्, समीक्षणवाचनम्, विश्लेषणवाचनम् अधिगन्तुम् अर्जयितुं वा सङ्गणकयन्त्रं महत्सहायं विदधाति, आङ्लभाषायां वाचनशिक्षणनिमित्तं तन्त्रांशा: निर्मिता: सन्ति , तद्यथा-

- Rocket-Reader (1998) (a speed reading program)
- Read-Flex (Speed Reading); Reading for English

एवं संस्कृतभाषायामपि एतादृशान् तन्त्रांशान् रचयितुं शक्नुम: ।

**लेखनम्** – शुद्धाक्षरलेखनम्, पदलेखनम्, वाक्यलेखनम्, अनुच्छेदलेखनम् , प्रतिवेदनलेखनम्, सम्पादनसमीक्षणलेखनम्, एवं नानाविधलेखनकौशलानां कृते तन्त्रांशा: आङ्ग्लभाषायां सन्ति । ते च -

Paragraph Punch (a writing tutor for effective paragraph); Write Express Easy Letters (effective business letters); Power Editing (an interactive tutorial on how to edit and revise sentences); Report Writer for Science and Engineering Reports (Clarity Language Consultants) (EFL/ESL report science and engineer writing) एतेषाम् अनुकरणेन इतरभाषास्वपि एत्तत् कर्तुं शक्यते।

**उच्चारणभाषणपठनश्रवणकौशलानि –**

इमानि कौशलानि सम्पादयितुमाङ्ग्लभाषायां बहुतन्त्रांशान् रचितवन्तस्ते च *Learn to Speak*, *English Pronunciation* (1997-98), *Naturally Speaking* (A voice recognition program); *See It, Hear It, Say It!* , *Accent Improvement* (SpeakWare); *Real English* (Wiser Software)

- **श्रवणकौशलम्** – कामपि भाषां श्रुत्वा तत्रत्यवर्णपदवाक्यानि अभिज्ञाय अर्थावगमनसामर्थ्यं नाम श्रवणकौशलम् ।
- **भाषणकौशलम्** – श्रुतस्य , पठितस्य , अधिगतस्य , अनुभूतस्य विषये स्वाभिप्रायप्रकटी - करणम् अथवा स्वीयविचारप्रश्नभावादिकथनम् अथवा सामान्यसंवादवार्तालापकरणसामर्थ्यं नाम भाषणकौशलम् ।
- **पठनकौशलम्** – लिखितस्य, मुद्रितस्य वा वर्णक्रमविन्यासेन तत्तद्वर्णस्थानप्रयत्नानुणं गतियतिलयभावानुपुरस्सरं समुचितस्वरेण मधुरपठनसामर्थ्यं नाम पठनकौशलम् ।
- **गानकौशलम्** - संस्कृतभाषायां पद्यवाचनं गीतवाचनं सस्वरं गानयुतं भवेत् तदानीमेव तद् रमणीयं कर्णमधुरं प्रतिभाति । एतादृशं गानसामर्थ्यं नाम गानकौशलम् । सङ्गणकमाध्यमेन संस्कृतवार्ताः , संस्कृतगीतानि, श्लोकान्, अध्यापकः श्रावयेत्, छात्राः श्रुणुयुः । चलचित्रेषु विद्यमानान् संवादान् श्रद्धया श्रुणुयुः । नाटकानि, एकपात्राभिनयनम् पश्येयुः तत्रत्य संवादान् अवधानेन श्रुणुयुः। सङ्गणकयन्त्रे नाटकानां चलचित्राणां, श्लोकानां गीतानां विदुषां शास्त्रशिक्षणस्य व्याख्यानानां Audio, video files निधाय तेषां सहायेन श्रवणभाषणपठनकौशलानि वर्धयितुं शक्नुमः । संगणकतन्त्रांशान् उपयुज्य उच्चारणपठनदोषान् निवार्य पठनस्तरं वर्धयितुं शक्नुमः । पूर्वोक्तरीत्या सङ्गणकमाध्यमेन श्रवणभाषणपठनगान-कौशलानि सम्पादयितुं शक्नुमः।
- **लेखनकौशलम्** - श्रुत्वा , दृष्ट्वा , स्मृत्वा , विचार्य अक्षरक्रमविन्यासेन शुद्धस्पष्टदर्शनीय लेखनसामर्थ्यं नाम लेखनकौशलम् । लेखनकौशलवर्धनाय , तन्त्रांशसहायेन सङ्गणकयन्त्रं महदुपकरोति।

**(3) सङ्गणकम् - समस्यासमाधानरूपेण Computer as Simulation / Problem Solving**

अनुशिक्षणकार्यमुखेन, भाषाकौशलवर्धननिमित्तम् सङ्गणकयन्त्रस्योपयोगः समस्यासाधन-यन्त्ररूपेण भवितुमर्हति । वस्तुतः अत्र तन्त्रांशः तादृशः निर्मीयते यत्र समस्यात्मकस्थितीनां समाधानाय संवादः विधीयते । अनुरूपिताः अभिक्रमाः समस्यासमाधानक्रीडाः एव सन्ति । आङ्ग्लभाषाशिक्षणाय एतादृशाः तन्त्रांशाः सन्ति । यथा- *Oregon Trail* (1995-1998) (CD-ROM)http://www.cd-romlink.com शिक्षणमत्र मनोरञ्जनमिव भवति।

**(4) सङ्गणकम् - क्रीडारूपेण Computer as Game,**

शिक्षणपद्धतिषु अन्यतमा पद्धतिः क्रीडामुखेन शिक्षणम् ( **Play way method** ) power point द्वारा क्रीडामुखेन भाषाशिक्षणं भवितुमर्हति । बहवः तन्त्रांशाः भाषाक्रीडासम्बद्धाः निर्मिताः सन्ति । छात्राः

क्रीडन्त: भाषामधिगच्छन्ति, अभिक्रमितानुदेशनशिक्षणे एतादृश्य: भाषाक्रीडा: दृष्टुं पारयाम:। संस्कृतभाषाशिक्षणेऽपि एतादृश्य: भाषाक्रीडा: निर्मिता: सन्ति । यथा- संस्कृतस्वयंशिक्षिका सान्द्रमुद्रिका । भाषाशिक्षणे आङ्लभाषायामेतादृश्य: क्रीडा: बह्व्य: निर्मिता: सन्ति। यथा-

- CALL vocabulary games are *Spelling Games*,
- *Spelling Bee and Magic Hat*,
- *Scrambled Word*, *Word Worm*,
- *Hangman*, *Word Order*, *Find a Word*,
- *Word Puzzles*, *Spelling Buddy*,
- *Cross Words*,
- *I Love Spelling* (DK multimedia),
- *Scrabble Deluxe* (Virgin Games)
- Computerized version of the board game etc.

**(5) सङ्गणकम् - अध्यापकानां विद्यार्थिनां कृते भाषाशिक्षणाय भाषाधिगमाय उपकरणरूपेण**

- **शब्दसंसाधकानि** Word_Processors- रचनायां, लेखने, सम्पादने एतत्संसाधनं महदुपकरोति । कुत्र कीदृशं ? पदमुपयुक्तम् कस्य औचित्यं कुत्र ? इति सूचयति, अथवा रचनायां अस्मात् पदात् परमिदं पदमुपयुक्तमिति सूचयति आङ्ग्लभाषायामेतादृशानि संसाधानानि सन्ति । यथा- *Microsoft Word* <http://www.microsoft.com>, *Corel Word Perfect <http://www.corel.com >* to simpler and cheaper programs such as *Microsoft Works<http:www.microsoft.com>*, संस्कृतभाषायामपि एतादृशानि संसाधानानि स्थापनीयानि ।
- **अक्षरविन्यासनिरीक्षका:, शब्दविन्यासनिरीक्षका:** Spelling_Checkers- अक्षरदोषान् निरीक्षितुमेतत् संसाधानं महदुपकरोति । आङ्ग्लभाषायामेतादृशानि संसाधनानि सन्ति । तद्यथा - <http://www.davd.com>, or *Sentry Spelling-Checker Engine*. संस्कृतभाषायामपि एतादृशानि साधानानि निर्मेयानि ।
- **व्याकरणदोषनिरीक्षका:** Grammar Checkers – भाषायां व्याकरणसम्बद्धान् दोषान् अन्वेष्टुं व्याकरणदोषनिरीक्षकसाधानानि आङ्ग्लभाषायां सन्ति, परं एतानि अधिकमुपकर्तुं न प्रभवन्ति । एतादृशानि साधनानि संस्कृतभाषाय़ामपि निर्मेयानि सन्ति । एतदर्थं संस्कृतवैयाकरणै: सङ्गणकविद्भि: महान् प्रयत्नो विधेय: ।
- **शब्दानुक्रमणिका, सुसङ्गतता** Concordancers – शब्दस्य समुचितप्रयोगनिमित्तं प्रयोगदेशान्वेषणाय शब्दानुक्रमणिकातन्त्रांश: महत् उपकरोति । आङ्ग्लभाषायामेतादृशा: तन्त्रांशाः सन्ति । तद्यथा - *Oxford MicroConcord .*

- **सन्दर्भान्वेषक:** Reference – सन्दर्भान्वेषणनिमित्तमेतादृशं तन्त्रांशमुपकरोति, Colordict इति तन्त्रांशमुपकरोति, अन्तर्जाले बहव: कोशा: निक्षिप्ता: सन्ति, तानपि उपयोक्तुमर्हन्ति जना: ।

**(6) सङ्गणकम् - अध्यापकानां विद्यार्थिनां कृते भाषाशिक्षणाय भाषाधिगमाय च अन्तर्जालीयसाधानानि**

**Online Available Sanskrit Tools/ SANSKRIT SITES/ Sanskrit e books**

- http://scholar.google.co.in/scholar?start=20&q= Sanskrit+ anaphora+resolution & hI=en&as_sdt=0.5 &as_vis=I?
- http://sanskritdocuments.org/learning_tools/learning_tools.html
- http://greenmesg.org/sanskrit_online_tools.php
- http://tdil-dc.in/index.php?option=com_vertical&parentid =84
- http://sanskrittools.blogspot.in/
- http://www.cincinna titemple.com/downloads/upanishad Complete.pdf
- http://www.dictionary.tamilcube.com/sanskrit dictionary.aspx# English
- http://sanskritdocuments.org/scanned books/
- http://sanskrit.safire.com/Sanskrit.html

**SANSKRIT SITES**

- http://en.wikipedia.org/wiki/sanskrit
- Sanskrit teaching sites/ Sanskrit e learning sites
- http://chitrapurmath.net/ Sanskrit/step-by-step.html.
- http://acharya.iitm.ac.in/Sanskrit/tutor.html.
- http://www.ee.adfa.edu.au/staff/hrp/personal/sanskrit
- learnsanskrit.org

**Sanskrit songs**

- http://Sanskritam.ning.com.
- मोनियरविलियम्ससंस्कृतशब्दकोश: (Monier-Williams Sanskrit Dictionary)
- संस्कृताङ्ग्लपटल: (Sanskrit English Pad)
- संस्कृतसंज्ञापदविधानम् Sanskrit Noun Declension)
- संस्कृतसन्धिनियमा Sanskrit Sandhi Tools)
- संस्कृतसन्ध्युपकरणानि Sanskrit Sandhi Tools) (पाणिनिप्रतिपादित-सन्धिनियममवलम्ब्य शब्दानां सन्धिं यद्वा द्वयोर्विच्छेदो व्यवस्थापयति)
- संस्कृतलेखनपटल: - आङ्ग्लभाषाप्रयोगेण संस्कृतलेखनम्।
- संस्कृतक्रियारूपपटल:) Samskrit Verb lists)
- संस्कृतशब्दसूची Sanskrit Word List)

इतोऽप्यनेकानि साधनानि समुपलभ्यन्ते यैर्माध्यमेन सारल्येन वयं संस्कृतमधिगन्तुं शक्नुमः। संस्कृतसङ्गणकोपकरणसामग्र्यः अन्तर्जालकानि ––

**Sanskrit Sites**

- http://en.wikipedia.org/wiki/sanskrit
- http://chitrapurmath.net/ Sanskrit/step-by-step.html.
- http://acharya.iitm.ac.in/Sanskrit/tutor.html.
- http://www.ee.adfa.edu.au/staff/hrp/personal/sanskrit
- learnsanskrit.org
- http://sanskrit ebooks.wordpress.com/ebooks-download.
- www.ggss.org.in
- http://sanskrit.inria.fr/portal.html.

**Sanskrit movie**

- http://sanskrit.jnu.ac.in/elearning/mainpage.html
- http://Sanskritam.ning.com.

**संगणकसहकृतभाषाशिक्षणस्य गुणाः -**

1. संगणकः अचेतननिर्व्यक्तिकसाधनम् अतः पूर्णतः पूर्वाग्रहरहितो भवति।
2. अधीयानेषु च्छात्रेषु जातिलिंगवर्गादीनां प्रभावो नैव भवति।
3. छात्रः पठनीयं यथेष्टमसकृत् आवर्तयितुं प्रभवति किंच स्वगत्या अध्येतुं शक्नोति।
4. अत्र वयोमर्यादा नभवति यःकोपि यदा कदा पि स्वसौविध्यमनुसृत्य पठितुमर्हति।
5. संगणकमाध्यमेन अध्ययनं प्रभावपूर्णं रुचिरं भवति।
6. संगणकयन्त्रं न श्रान्तं भवति न च कष्टमनुभवति अतः यो यावन्तं कालं पठितुमिच्छति तावन्तं कालं पठितुं शक्नोति।
7. संगणके निहितं भाषाशिक्षणतन्त्रांशम् असंख्यकान् जनान् उपकर्तुं प्रभवति।
8. छात्रः इह भयं संकोचं विना अध्येतुं प्रभवति।
9. सर्वजनसुलभं सर्वजनभाषाशिक्षायै महदुपकरोति।
10. कर्गजरहितशिक्षणमेतत् भवति।
11. शिक्षणे नवीनता-स्वाभाविकता-सर्जनतादिभिस्सह छात्राः भाषायां प्रावीण्यमुपयान्ति।
12. छात्रकेन्द्रिता शिक्षा भवति।

**संगणकसहकृतभाषाशिक्षणस्य न्यूनताः -**

1. क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे।
2. सर्वेषु भाषाकौशलेषु प्रावीण्यमनेन न संभवति।

3. संगणकयन्त्रमचेतनम् अत: परस्परं संवादाय, पृच्छासमाधानाय, छात्राध्यापकयो: मिथ: प्रीत्यात्मीयतासंवर्धनाय नैवोपकरोति।
4. गुरो: भीत्या, श्रद्धया, ह्रिया वा च्छात्र: अनुशासने सन् अध्येतुं प्रवर्तते, परमिह तथा सति छात्रस्य क्रमिकं भाषाशिक्षणं भवितुं नार्हति, आलस्यवशात् अध्येतुमपि न प्रवर्तेत।
5. छात्राणां त्रुटिसंशोधनं, तत्क्षणसमाधानं वैविध्यपूर्णानि समाधानि भाषाया: वैविध्यभरितं स्वरूपम् अत्र न भवति।
6. यन्त्राधीनं व्ययसाध्यमस्ति।
7. कक्षायां अध्यापक: प्रसंगानुरोधेन छात्रान् प्रेरयति नानाविषयान् बोधयति, छात्राध्यापकयो: अन्त:क्रियाभि: छात्रा: अभिप्रेरिता: सक्रियाश्च भवन्ति तथेह न संभवति।
8. चेतनाध्यापकशिक्षणे नवीनता, स्वाभाविकता, सर्जनता भवति अपि च छात्राः भाषायां प्रावीण्यमुपयान्ति तद्यन्त्रमुखशिक्षणे न संभवति।
9. चेतनानां मनुष्याणां व्यवहाराधीना भाषा किञ्च परिवर्तमाने काले भाषासु परिवर्तनं दृश्यते। अत: एतादृशं परिवर्तनं यन्त्रं बोद्धुं , शिक्षितुं न पारयति, अपि च भाषाया: सर्वविधकौशलानि यन्त्रमुखेन न सम्पाद्यन्ते।

एवं भूतेऽपि भाषाशिक्षणे संगणकयन्त्रस्य भूयान् प्रयोगो वरीवर्ति , अस्य व्यापकत्वं च जायमानमस्ति। इत्थं संस्कृतभाषाशिक्षणे नवीनप्रवृत्तीनां प्रयोगस्य विस्तरभीया केवलं दिङ्मात्रं दर्शितम् ।

## अनुशीलितग्रन्था:


1. *वाक्यपदीयम् ,पण्डित चारुदेवशास्त्री,मोतीलालबनारसीदास, १९९६,दिल्ली*
2. *विशुद्ध मनुस्मृति:,सम्पादक:,आचार्य: सुरेन्द्र स्नातक,आर्षसाहित्यप्रचारट्रस्ट १९९४, दिल्ली*
3. *अष्टाध्यायी ,सम्पादक: ब्रह्मदत्त जिज्ञासु,रामलाल कपूर ट्रस्ट रेवली , १९९८,हरियाणा*
4. *काशिका, सम्पादक: आचार्यविजयपालविद्यावारिधि ,रामलाल कपूर ट्रस्ट रेवली , १९९७,हरियाणा*
5. *पाणिनीयव्याकरणमहाभाष्यम्, भार्गव शास्त्री,चौखम्बा संस्कृत प्रतिष्ठान , १९८७, दिल्ली*
6. *पाणिनिकालीन भारतवर्ष ,वासुदेवशरण अग्रवाल चौखम्बा विद्याभवन १९९६, वाराणसी*
7. *शिक्षा में नवाचार और नवीन प्रवृत्तीयां,भाई योगेन्द्रजीत ,विनोद पुस्तक मन्दिर २००६,आगरा*

# सूचनाऽधिकारस्य जागरणे शिक्षायाः भूमिका

✍ डॉ. वि एस् वि भास्कर रेड्डि *

**प्रस्तावना -**

सूचनाऽधिकारः (2005) भारतीयनागिरकाणां सूचनाप्रदानाय व्यावहारिकशासनस्य स्थापनाय च आधिकारिक-स्वतन्त्रताऽधिनियमस्य (2002) स्थाने भारतसंसदा पारित एक अधिनियमो भवति। अधिनियमोऽयम् आधिकारिकगोपनीयताऽधिनियमे (1923) निर्दिष्टप्रतिबन्धेभ्यो आरमतां प्रददाति, बहुत्र तस्याऽधिनियमस्य (1923) प्रतिबन्धाः सूचनाऽधिकाराऽधिनियमस्य पुरतः समक्षे वा स्वाभाविकतया निरस्ताः निस्तब्धाश्च जायन्ते । यत अयमधिकारः भारतीयसंविधानस्य 19 (1) अनुच्छेदानुसारं मौलिकाऽधिकारेषु अन्तर्भवति। अतः प्रत्येकं भारतीयः अस्याऽधिकारस्योपयोगः मौलिकाऽधिकारत्वेन अनुप्रयोगं कर्तुं शक्नोति। अधिनियमोऽयं 12-10-2005 दिनाङ्कादारभ्य जम्मू-कश्मीरराज्यं विहाय सम्पूर्णभारते अस्तित्वे क्रियान्वयने च वर्तते।

अधिनियमस्याऽस्य प्रावधानाऽनुसारं कोऽपि भारतीयनागरिकः सार्वजनिकप्राधिकरणेभ्यो (सर्वकारीय-मन्त्रालयेभ्यो विभागेभ्यो संस्थाभ्यो संगठनेभ्यो कार्यालयेभ्यो साधनेभ्यो निकायेभ्य अभिकरणेभ्य उपक्रमेभ्यो तन्त्रेभ्यो यन्त्राङ्गादिभ्यो), सर्वकारेण वित्तपोषितेभ्यो निर्सर्वकारीयसंस्थाभ्यो निकायेभ्यश्च निर्दिष्टसमयसीमाभ्यन्तरे अपेक्षितानां सूचनानां सूचनाऽभिलेखनानां ई-सूचनानाञ्च प्राप्तये अनुरोधं कर्तुं शक्नोति । अस्य सूचनाऽधिकाराऽऽन्दोलनस्य सूचनाऽधिकारस्य च श्रेयः श्रीमतः अन्ना हजारे महोदयस्य, श्रीमतः अरविन्द केजरीवालस्य च भवति।

## सूचनाऽधिकाराऽधिनियमस्य परिधिः -

अस्याऽधिनियमस्य परिधौ कार्यपालिका, न्यायपालिका, विधानपालिकादि संवैधानिकप्राधिकरणानि, संसदः विधानसभायाश्चाऽधिनियमानुसारं संस्थापिताः मन्त्रालयाः विभागाः कार्यालायाः संस्थाः उपक्रमाः निकाया अभिकरणानि साधनानि संगठनानि तन्त्राणि प्राधिकरणानि, संघसर्वकारेण राज्यसर्वकारैः वा प्रत्यक्षतया परोक्षतया च स्वामित्वसम्बद्धाः नियन्त्रिताः वित्तपोषिताः संस्था उपक्रमाः निकायाः निर्सर्वकारीयनिकायाश्च समायान्ति। परन्तु अस्याऽधिनियमस्य परिधौ -

1. संघसर्वकारेण आंशिकतया वित्तपोषिते सत्यपि राजनैतिकदलानि (2013 तः) नैव सामायान्ति।
2. सुरक्षाबल-सीमाबल-सशक्तबल-वायुसेना-नौसेनादि भारतीयप्रतिरक्षानिकायाश्च नैव सामायान्ति।
3. अनुसन्धानविश्लेषणविभागः (RAW), आसूचनाकेन्द्रम् (IB), अन्यगुप्तचरविभागादयः अस्य परिधौ नैव सामायान्ति। यतः एते सर्वे प्रतिरक्षात्मकदृष्ट्या गोपनीयतादृष्ट्या च संवेदनशीलाः भवन्ति।

*सहायकाचार्यः (वरिष्ठः), शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि) मुम्बई परिसरः*

4. कस्यचिदपि व्यक्तिविशेषस्य निजजीवनेन सह सम्बद्ध-सूचनानां प्रदाने च अयमधिनियमः निश्शक्तो भवति।

**सूचनाऽधिकाराऽधिनियमस्य शासनं प्रक्रिया च -**

भारते सूचनाऽधिकारस्य निरीक्षणं पर्यवेक्षणं शासनं नियन्त्रणं विनिमयञ्च प्रमुखतया निकायद्वयेन क्रियते। यथा —

**1. केन्द्रीयसूचनाऽऽयोगः** (CIC/Central Information Commission) — अत्र एकः मुख्याऽऽयुक्तः निर्दिष्टसंख्यायां सदस्याश्च भवन्ति। राष्ट्रपतेः अधीने विद्यमानाः अनुष्ठानरताः कार्यरताः सञ्चाल्यमानाः केन्द्रीयविभागाः मन्त्रालयाः निकायाः तन्त्रादयः सूचनाऽधिकारस्य सन्दर्भे केन्द्रीयसूचनाऽऽयोगस्य परिधौ भवन्ति।

**2. राज्यसूचनाऽऽयोगः** (SIC/ State Information Commission) — अत्राऽपि एकः मुख्याऽऽयुक्तः निर्दिष्टसंख्यायां सदस्याश्च भवन्ति। तत्तत् राज्येषु राज्यपालस्याऽधीने विद्यमानाः अनुष्ठानरताः कार्यरताः सञ्चाल्यमानाः राज्यविभागाः मन्त्रालयाः निकायाः तन्त्रादयः सूचनाऽधिकारस्य सन्दर्भे राज्यसूचनाऽऽयोगस्य परिधौ भवन्ति।

आयोगद्वयमपि (CIC & SIC) स्वतन्त्रः सार्वभौमिकश्च निकाय एव भवति। अत्र न वा संघसर्वकारस्य हस्तक्षेपाय न च राज्यसर्वकारस्य हस्तक्षेपाय अधिकारः भवति। एवमेव राज्यसूचनाऽऽयोगस्योपरि केन्द्रीयसूचनाऽऽयोगस्य नैव अधिकारः, केन्द्रीयसूचनाऽऽयोगस्योपरि राज्यसूचनाऽऽयोगस्य च अधिकारः नैव भवति।

**सूचनाप्राप्तये नियमाः शुल्कश्च**

सार्वजनिकप्राधिकरणेभ्यो सूचनानां प्राप्त्यर्थं तस्याधिनियमे केचन नियमाः प्रावधानानि च निर्दिष्टानि सन्ति, यथा -

1. सूचनाप्राप्तकर्ता भारतीयनागरिकः स्यात्।
2. सूचनाऽऽवेदनपत्रेण साकं सूचनाधिकारिणः नाम्नि दशरूप्यात्मकः पत्रालयाऽऽदेशः (IPO) / अपेक्षापत्रं (DD) / वित्तकोशीयपत्रं (Bankers cheque) वा प्रेषणीयं भवति।
3. यदि सूचनाप्राप्तकर्ता वञ्चितसमुदायिकस्य, दारिद्र्यरेखाया अधौ च निवसतां जनानां अन्तर्भवति चेत् तस्य कृते उपर्युक्तनियमः- 2 नैव अनुवर्तते।
4. यदि सूचनाप्राप्तकर्ता निरक्षरो भवति चेत् सूचनाधिकारिणा एव स्वयम् अपेक्षितसूचनाः लेखनीयाः भवन्ति।
5. यदि 30 दिवसाभ्यन्तरे एव सूचना प्रदीयते चेत् सूचनायै प्रत्येकं पत्रायः रूप्यकद्वयं प्राप्तकर्त्रा प्रदेयं भवति। निर्दिष्टसमयसीमात्परं शुल्को नैव भविष्यत्यत्र।

6. निर्दिष्टसमयाऽवधौ सूचना अप्राप्ते सति प्रथमाऽप्पीलीयाऽधिकारिणं प्रति उपालभ्यं कर्तं शक्यते।
7. प्रथमाऽप्पीलीयाऽधिकारिणं प्रति उपालभ्यात्परमपि सूचना अप्राप्ते सति द्वितीयाऽप्पीलीयाऽधिकारिणं प्रति उपालभ्यं कर्तं शक्यते। अत्र 100 % सूचनाप्रदानाय, विलम्बकारणेन वित्तीयदण्डाय च आदेशः क्रियते।
8. संघसर्वकारेण सम्बद्धसूचनायै आवदेनं rtionline.gov.in इति माध्यमेनापि कर्तुं शक्यते।

**सूचनाऽधिकारेण किं प्राप्तुं शक्यते।**

1. सर्वकारेण सार्वजनिकप्राधिकरणेन सह सम्बद्धानां सूचनानां प्राप्तये अनुरोधं कर्तुं शक्यते।
2. सार्वजनिकप्राधिकरणेन सह सम्बद्धानाम् अभिलेखानां परिपत्राणाञ्च प्राप्तये अनुरोधं कर्तुं शक्यते।
3. सार्वजनिकप्राधिकरणीयाऽभिलेखानां सूचनापत्राणां सूचनास्रोतसां निरीक्षणं कर्तुं शक्यते।
4. सार्वजनिकप्राधिकरणीयाऽभिलेखानां सूचनापत्राणां स्रोतसाञ्च प्रतिलिपीः प्राप्तुञ्च शक्यते।
5. सार्वजनिकप्राधिकरणेषु संगणकयुक्त्या निर्मितानाम् उत्पादितानाञ्च ई-सामग्रीमपि प्राप्तुं शक्यते।
6. सार्वजनिकप्राधिकरणीयाऽनुष्ठानसम्बद्धानां ई-सूचनानां निरीक्षणं कर्तुं, प्राप्तुञ्च शक्यते।
7. सार्वजनिकप्राधिकरणीयाऽनुष्ठानानां कार्याणाञ्च निरीक्षणं कर्तुं शक्यते।
8. सार्वजनिकप्राधिकरणीयाऽनुष्ठानसम्बद्धं सामाग्रीसम्बद्धञ्च न्यादर्शं प्राप्तुं शक्यते।
9. सार्वजनिकप्राधिकरणीयाऽनुष्ठानेषु विद्यामानां वास्तविकस्थितिं ज्ञातुं शक्यते।
10. सार्वजनिकप्राधिकरणीयाऽनुष्ठानेषु जायमानस्य अलसत्वस्य विलम्बस्य च प्रश्नं कर्तुं शक्यते।

**सूचनाऽधिकारस्य आवश्यकता -**

भारतदेशः लोकतान्त्रिकः समाजवादश्च भवति। 70 वर्षात्मकस्य लोकतान्त्रिके देशेऽस्मिन् इदानीमपि द्रव्यस्य शक्तेः संसाधनानां विकेन्द्रीकरणं पूर्णतः नैव जातं वर्तते। इदानीमपि दरिद्रनारायणाः सामाजिकवञ्चिताः मौलिकाऽधिकारवञ्चिताश्च जनाः बहुसंख्यकाः दृश्यन्त एव। सर्वेषां सौविध्यानाम् अवसराणां प्रकल्पमानेषु सर्वकारीयतन्त्रांशेषु साधनेषु सार्वजनिकप्राधिकरणादिषु कुत्र किं जायमानं वर्तत इति ज्ञातुं अधिकारिकगोपनीयताऽधिनियमः (1923) प्रतिबन्धक आसीत्। अस्याऽधिनियमस्य क्रियान्वयनेन सः प्रतिबन्धकः समाप्तो वर्तते। अस्याऽधिनियमस्य क्रियान्वयनाय महती आवश्यकता वर्तते। ते च अंशाः यथा -

1. मौलिकाऽधिकाराणां सन्दर्भे जनसामान्यस्य सशक्तीकरणाय जागरणाय च सूचनाऽधिकारस्य आवश्यकता वर्तते।
2. जनेषु प्रश्नकरणवृत्तेः जागरणाय सूचनाऽधिकारस्य आवश्यकता वर्तते।
3. राजनैतिकदलेषु उत्तरदायित्वस्य वर्धनाय सूचनाऽधिकारस्य आवश्यकता वर्तते।

4. विविधसर्वकारीयानुष्ठानेषु उत्तरदायित्वस्य वर्धनाय सूचनाऽधिकारस्य आवश्यकता वर्तते।
5. सर्वकारीय-क्रियाकलापेषु पारदर्शितायाः, निष्पक्षिकतायाश्च वर्धनाय सूचनाऽधिकारस्य आवश्यकता वर्तते।
6. सर्वकारीय-क्रियाकलापेषु उत्तरदायित्वस्य वर्धनाय सूचनाऽधिकारस्य आवश्यकता वर्तते।
7. सर्वकारीय-क्रियाकलापेषु अवैधरीत्या अनैतिकरीत्या च जायमानस्याः पारस्परिकलब्धेः (Quid Pro ko) दूरीकरणाय सूचनाऽधिकारस्य आवश्यकता वर्तते।
8. सर्वकारीय-क्रियाकलापेषु आश्रितपक्षपातस्य, आश्रिताऽनुरागस्य, बन्धुप्रीतेः भयस्य च दूरीकरणाय सूचनाऽधिकारस्य आवश्यकता वर्तते।
9. उत्कोचस्य निर्मूलनाय, भ्रष्टाचारमुक्तभारतस्य निर्माणाय च सूचनाऽधिकारस्य आवश्यकता वर्तते।
10. सार्वजनिक-व्यवहारेषु दास्यवादपरम्परायाः दूरीकरणाय सूचनाऽधिकारस्य आवश्यकता वर्तते।
11. प्रजाभिः समर्पितस्य करस्य सद्विनियोगः जायते वा, न वा इति निर्धारणाय सूचनाऽधिकारस्य आवश्यकता वर्तते।
12. जनानां सौविध्यप्रकल्पने दृश्यमानस्य अलसत्वस्य दूरीकरणाय सूचनाऽधिकारस्य आवश्यकता वर्तते।

**सूचनाऽधिकारस्य जागरणम्**

सूचनाऽधिकाराऽधिनियमः (2005) भारतीयनागरिकानां कृते वरदानविशेषः, तेषां हस्ते पाशुपतास्त्रञ्च भवति, यतः सार्वजनिककार्यालयेभ्यो सार्वजनिकप्राधिकरणेभ्यश्च सूचनाभिलेखीय-प्रतिलिपीनां जालीयसूचनानां तन्त्रसूचनानां सूचनासेवानाञ्च प्राप्तये अधिकारः प्रददाति।

सार्वजनिकप्राधिकरणादिषु भ्रष्टाचारः सत्ताऽधिकारवृत्तिः / अधितन्त्रता (Red tapism), आश्रितपक्षपातः अनैतिकरीत्या पारस्परिकलब्धिः आश्रिताऽनुरागादि असामाजिकक्रियाकलापाः स्वतन्त्रभारतेऽपि प्रायः सर्वत्र परिदृश्यन्ते। स्वातन्त्र्यादारभ्य अद्यावधिपर्यन्तं सर्वेषां नागरिकाणां कल्याणाय जीवनहिताय च भारतसर्वकारेण विविधराज्यसर्वकारैश्च विविधप्रकारककल्याणयोजनानां क्रियान्वयनं कृतं क्रियामाणञ्च वर्तते। परन्तु दरिद्रनारायाणा अशिक्षिताः विविधप्रकारकसर्वकारीयसौविध्येभ्यः अवसरेभ्यश्च वञ्चिताः जनाः स्वतन्त्रे लोकतान्त्रिके च भारते बहुसंख्यकाः परिलक्ष्यन्ते। अर्थात् एतेसां योजनानां फलं सकारात्मकं नास्तीति सुस्पष्टतया ज्ञायत एव, सार्वजनिकप्राधिकरणेषु किं जातं जायमानञ्च वर्तत इति कोऽपि न जानन्ति स्म।

सूचनाऽधिकाराऽधिनियमस्य क्रियान्वयनात्परं सार्वजनिकप्राधिकरणेषु किं जातं जायमानञ्च वर्तत इति ज्ञातुं प्रत्येकं भारतीयनागरिकस्य अधिकारः वर्तते। अनेन सार्वजनिकप्राधिकरणीयक्रियाकलापेषु मुक्तता (Openness), पारदर्शिता (Transparency) उत्तरदायित्वादि (Accountability) लोकतान्त्रिकगुणाः समागताः वर्तन्ते। ग्रामीणक्षेत्रे निवसन्तः, अशिक्षिताः सामाजितया वञ्चिताश्च जनाः इदानीमपि सूचनाऽधिकाराऽधिनियमविषये न्यूनतया एव जानन्ति। एतादृशानां जनानां व्यवहारे जीवने च सूचनाऽधिकारस्य महत्वस्य वैशिष्ट्यस्य च वर्धनाय प्रयासाः विधेयाः भवन्ति, तस्य साफल्यं केवलं शिक्षाया उपरि एव निर्भरं भवति।

## सूचनाऽधिकारस्य जागरणे शिक्षा

सूचनाऽधिकारस्य प्रचारे प्रसारे संरक्षणे जागरणे च शिक्षा महत्वपूर्णं साधनं भवति। मौलिकाऽधिकाराणां सूचनाऽधिकारस्य च विषये जनसामान्यस्य सशक्तीकरणाय जागरणाय च शिक्षा गतिशीला कुञ्चिका भवति। अनया शिक्षया

- सार्वजनिकप्राधिकरणेषु जायमानां वास्तविकस्थितिं ज्ञातुम् अपेक्षितायाः प्रश्नकरणवृत्तेः विकासः कारयते।
- सूचनाऽधिकारस्य वास्तविकविचाराणां वैशिष्ट्यस्य औन्नत्यस्य च ज्ञापने शिक्षा महत्वपूर्णा साधना भवति।
- सूचनाऽधिकारस्य गुणानां लाभानाञ्च ज्ञापने जनजागरणे च शिक्षा महत्वपूर्णा साधना भवति।
- भारतीयनागरिकाणां राजनैतिकाऽधिकाराणाम् मौलकाऽधिकारणाञ्च अवबोधे शिक्षा महत्वपूर्णा साधना भवति।
- सूचनाऽधिकारस्य विनियोगाय अपेक्षितानाम् आवश्यककौशलानाम् उन्नयने शिक्षा महत्वपूर्णा साधना भवति।
- सूचनाऽधिकारस्य प्रोत्साहने संरक्षणे क्रियान्वयने जागरणे च अपेक्षितानाम् आवश्यककौशलानाम् अभिवृत्तीनाञ्च उन्नयने शिक्षा महत्वपूर्णा साधना भवति।
- प्रत्येकं भारतीयः सूचनाऽधिकारस्य महत्वं ज्ञापने शिक्षा महत्वपूर्णा साधना भवति।
- सार्वजनिकप्राधिकरणेषु जायमानस्य भ्रष्टाचारस्य निर्मूलने सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- सार्वजनिकप्राधिकरणीयानुष्ठानेषु कार्यक्रमेषु पारदर्शितायाः वर्धने सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- सार्वजनिकप्राधिकरणीयानुष्ठानेषु उत्तरदायित्वस्य विकासे सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।

- सर्वकारीय-क्रियाकलापेषु उत्पादनेषु सामग्र्यादिषु गुणवत्तायाः विकासे सूचनाऽधिकारस्य भूमिकां वर्धयते।
- राजनैतिकदलेषु उत्तरदायित्वस्य वर्धने सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- विविधसर्वकारीयानुष्ठानेषु उत्तरदायित्वस्य वर्धने सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- सर्वकारीय-क्रियाकलापेषु पारदर्शितायाः, निष्पक्षिकतायाश्च वर्धने सूचनाऽधिकारस्य वर्चस्वं वर्धयते।
- सर्वकारीय-क्रियाकलापेषु उत्तरदायित्वस्य वर्धने सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- सर्वकारीय-क्रियाकलापेषु अवैधरीत्या अनैतिकरीत्या च जायमानायाः पारस्परिकलब्धेः (Quid Pro ko) दूरीकरणे सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- सर्वकारीय-क्रियाकलापेषु आश्रितपक्षपातस्य, आश्रिताऽनुरागस्य, बन्धुप्रीतेः भयस्य च दूरीकरणे सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- उत्कोचस्य निर्मूलनाय, भ्रष्टाचारमुक्तभारतस्य निर्माणे सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- सार्वजनिक-व्यवहारेषु दास्यवादपरम्परायाः दूरीकरणे सूचनाऽधिकारस्य औन्नत्यं वर्धयते।
- प्रजाभिः समर्पितस्य करस्य सद्विनियोगः जायते वा, दुर्विनियोगः जायते वा इति निर्धारणे सूचनाऽधिकारस्य वर्चस्वं भूमिकाम् औन्नत्यञ्च वर्धयते।
- जनानां सौविध्यप्रकल्पने दृश्यमानस्य अलसत्वस्य दूरीकरणे सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।
- भारते सुशासनस्य परम्परायाः विकासे सूचनाऽधिकारस्य वर्चस्वं भूमिकाञ्च वर्धयते।

**निष्कर्षाः—**

सूचनाऽधिकाराऽधिनियमः (2005) भारतीयनागरिकानां कृते वरदानविशेषः, तेषां हस्ते पाशुपतास्त्रञ्च भवति, यतः सार्वजनिककार्यालयेभ्यो सार्वजनिकप्राधिकरणेभ्यश्च सूचनाऽभिलेखीय-प्रतिलिपीनां जालीयसूचनानां तन्त्रसूचनानां सूचनासेवानाञ्च प्राप्तये अधिकारः प्रददाति। अस्यऽधिकारस्याऽनुप्रयोगेन सार्वजनिकप्राधिकरणादिषु बन्धुप्रीतिः भेदभावाः आश्रितपक्षपातः अनैतिकरीत्या अवैधरीत्या च जायमाना पारस्परिकलब्धिः उत्कोचः भ्रष्टाचारः सत्ताऽधिकारवृत्तिः / अधितन्त्रता (Red tapism), आश्रिताऽनुरागादि असामाजिकक्रियाकलापाः प्रायः विनश्यन्ते।

सार्वजनिकप्राधिकरणीयक्रियाकलापेषु मुक्तता (Openness), पारदर्शिता (Transparency) उत्तरदायित्वादि (Accountability), सुशासनादि (Good Governance) लोकतान्त्रिकगुणाः समागताः वर्तन्ते। अनेन सर्वजनहितं सर्वजनकल्याणं सशक्तभारतस्य निर्माणञ्च जायत इति कथने नास्ति लेशमात्रमपि

अतिशयोक्ति। परन्तु अस्याऽधिकारविषये जनजागरणं जनचैतन्यञ्चाऽनिवार्यं भवति। तदर्थं जनानां मानसपटले अधोलिखिताऽभिवृत्तेः विकासः करणीयः भवति, यत् -

अधिकारा ईश्वरप्रसादिताः । अधिकाराय याचनां मा कुरु ।
अधिकाराय सन्धिं मा कुरु । अधिकाराय सततं संघर्षं कुरु ।
अनेन भवतो नाशो नष्टं वा न जायते, केवलं दासजीवनात्मुक्तिर्विना ।। इति।।

—- इति शम् —

**अनुशीलिताः (References) -**


1. https://en.wikipedia.org/wiki/Right_to_Information_Act,_2005
2. https://rtionline.gov.in/
3. Sandy Feinzig and Swasti Rana: The Importance of Right to Information in Education: Putting a Human Face on a Fundamental Right
4. CIC : Using the Right to Information as an Anti-Corruption Tool (brochure)
5. RTI is a Powerful tool that Strengthens Democracy and Promotes good Governance by Enhancing People's Participation: Vice President press note, dated 11-07-20176
6. Mrs. Sampoorna Reddy : The Role of youth towards corruption free society
7. Mandakini Devasher Surie : Right to Information in India: An Effective Tool to Tackle Corruption

# भाषाशिक्षणे मूल्याङ्कनस्य नूतनविधयः

✍ डॉ. विनोदकुमारशर्मा *

'भाषा' इति शब्दः 'भाष्' धातोः निष्पन्नः, यस्यार्थः ' व्यक्तायां वाचि' अस्ति। व्यक्तवाग् रूपेण यस्याः अभिव्यक्तिः क्रियते, सा भाषेति कथ्यते। अथ सा भाषणाद् हि भाषा इत्यपि कथ्यते। स्वीट् महाभागस्यानुसारं – ध्वन्यात्मकशब्दैः विचाराणां प्रकटीकरणमेव भाषा। एवमेव आचार्यदण्डिना निगदितं काव्यादर्शे यत्- वाचामेव प्रसादेन लोकयात्रा प्रवर्तते इति। वस्तुतः अस्मदीया लोकयात्रा सुदेव्याः वाग्देव्याः कृपयैव सम्भाव्यते। क्रमेऽस्मिन् स्वविचाराः प्रकटिताः आचार्येण यत् –

इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥ इति।

अर्थात् यदि शब्दज्योतिः लोके न प्रकाशते तर्हि सर्वत्र अन्धकारः भवत्येव। भाषायाः मुख्यप्रकाराः – भाषा द्विविधा भवति। यथा - 1. मौखिकभाषा 2. लिखितभाषा इति। विचाराणां मौखिकी अभिव्यक्तिः मौखिकभाषा भवति। एतद् विपरीतं लिखितभाषायां ध्वनिसङ्केताः प्रतीकरूपेण लिखित्वा अभिव्यक्तीक्रियन्ते, सा लिखितभाषा भवति।

## शिक्षणम् (Teaching) -

शिक्षणं निरन्तरं जायमाना काचित् प्रकिया वर्तते। मानवः, परिवारः , विद्यालयः, कार्यालयः, समाजः, वातावरणम् इत्यादिभ्यः सर्वदा यत् किमपि शिक्षमाणः भवति। अतः शिक्षणं नाम सततं प्रवर्तमाना काचन सामाजिकप्रक्रिया। प्रत्येकस्मिन् देशे तत्रत्यशासनव्यवस्थायाः सामाजिकदर्शनस्य सामजिकपरिस्थितीनां तदीयमूल्यानाञ्च प्रभावः शिक्षणे अवलोक्यते। यस्मिन् देशे यादृशी शासनव्यवस्था सामाजिकदार्शनिकपरिस्थितयश्च भवन्ति, तस्मिन् देशे तादृशी शिक्षणप्रक्रिया भवतीति शिक्षाविदाम् अभिप्रायः। विभिन्नदर्शनानां संस्कृतीनां सामाजिकस्वरूपाणां च आधारेण शिक्षणस्य अर्थः प्रभावितः भवति। शिक्षणस्य विषये स्पष्टज्ञानार्थं तस्य शाब्दिकम् अर्थम् आदौ विचारयामः।

## शिक्षणस्यार्थः (Meaning of Teaching ) -

शिक्षणम् आङ्गलभाषायाः Teaching इत्यस्य एवं संस्कृतपर्यायपदम्। आधुनिकैः शिक्षाविद्भिः "शिक्षा त्रिध्रुवीया प्रक्रिया" इति उच्यते। अस्यां प्रक्रियायां शिक्षकः , छात्रः, पाठ्यक्रमः त्रयोपि मिलित्वा शिक्षारूपमन्दिरं निर्मान्ति। अतः शिक्षणं तादृशप्रक्रियायाः साधनं भवति, यत् शिक्षायाः पूर्वोक्तानि त्रीणि ध्रुवाणि परस्परं सम्बध्नन्ति। RYBURN - महोदयस्य शब्दैः –" There are three focal points in

* *संविदाध्यापकः, शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि) मुम्बई परिसरः।*

education –the teacher the child and the subject. Teaching is the first place in relationship which established between these three". यत् शिक्षणं तादृशी काचन प्रक्रिया, या शिक्षकमाध्यमेन छात्रान् पाठ्यविषयाणाम् अधिगमनार्थं प्रेरयति । शिक्षणे छात्रशिक्षकयोः पारस्परिकान्तःक्रिया पाठ्यवस्तुमाध्यमेन भवति । यस्य परिणामतः शिक्षार्थी उद्देश्यप्राप्तये तत्परो भवति । सङ्कुचितार्थे विचारेण ज्ञायते यत् कक्षायां शिक्षार्थिभ्यः शिक्षकेण दीयमानं ज्ञानं परामर्शो वा शिक्षणं भवति। परन्तु व्यापकार्थे तावत् शिक्षणं तादृशी प्रक्रिया यत्र शिक्षार्थी केनापि माध्यमेन जन्मतः मृत्युपर्यन्तं यत्किमपि येन केनापि प्रकारेण शिक्षते तत् शिक्षणमिति उच्यते ।

**शिक्षणस्य परिभाषाः (Definitions of teaching) -**

शिक्षणस्य अर्थम् अधिकम् स्पष्टयितुं विभिन्नशिक्षाविदां मतानि उद्धृत्य अत्र परिभाषा रूपेण उपस्थाप्यन्ते । ताश्च यथा

- डी. बी. ओ. स्मिथ- महोदयानुसारम् – शिक्षणं क्रियाणां तादृशी काचित् व्यवस्था या अधिगमम् उत्पादयितुं प्रेरयति ।
- डमविल– महोदयानुसारं शिक्षणस्य सामान्यार्थस्तावत् शिक्षकः यत् जानाति तच्च सः छात्रान् कथयति ।

अतः भाषायाः शिक्षणमिति भाषाशिक्षणम् । यत्र भाषायाः अध्ययनम् अध्यापनं भवति । छात्राः अध्ययनं कुर्वन्ति एवञ्च शिक्षकाः अध्यापनं कुर्वन्ति । एतादृशं वातावरणं भवति भाषाशिक्षणमिति ।

**मूल्याङ्कनम् ( Evaluation )**

शोधकम् (Test) मापनं (Measurement) मूल्यनिर्णय इत्यादीनि पदानि परस्परपूरकत्वरूपेण उपयुज्यन्ते। किन्तु एतानि सर्वाणि अर्थव्याप्तौ भेदः। एतेषां समेषां पदानाम् अर्थव्याप्तौ समानता भवन्ति च। मूल्यस्य अङ्कनं = मूल्यांकनम् । व्यक्ते अथवा वस्तुनः परिमाणात्मकमूल्यस्य परिगणना अथवा गणितीयं व्याख्यानम् । मूल्यांकनम् एवं व्याख्यायते —

- उपलब्धेः संख्यात्मकविवरणम्।
- योग्यतानां गुणात्मकविवरणम्।
- व्यक्तेः उपलब्धेः, योग्यतायाश्च निर्धारणम्।

मानवजीवने प्रत्येकस्मिन् क्षेत्रेपि मूल्याङ्कनस्य वैशिष्ट्यं वरीवर्त्ति । मानवः प्रतिदिनं ज्ञात्वा वा किमपि ज्ञानम् अधीते , अधीतस्य अनुप्रयोगं च करोति । अधीतं ज्ञानम् अस्मद् व्यवहारं परिवर्तयति । परिवर्तनमिदम् अस्मदुद्देश्यं पूरयति न वा । अस्मल्लक्ष्यं गमयति । न वेति मूल्याङ्कनात् स्पष्टं ज्ञायते । सम्बन्धितमापन्या अनुमेया काचित् सतत प्रक्रिया मूल्याङ्कनम् । सा निरन्तरं प्रचलति । यथा एकः वैद्यः विभिन्नाभिः परीक्षाभिः वातपित्तकफादीन् सम्परीक्ष्य रोगस्य निर्धारणं करोति । अत्र विभिन्नाः परीक्षाः

रोगनिर्धारणे मापन्यः भवन्ति। मापनीनां आधारेण यद् रोगस्य निश्चितिः क्रियते, तन्मूल्याङ्कनमिति कथ्यते। अत एव सम्बन्धितमापन्या अनुमेया काचित् सतत प्रक्रिया मूल्याङ्कनम्।

**मूल्याङ्कनस्य अर्थः एवमभिधीयते**

मूल्यस्य अङ्कनं मूल्याङ्कनम्। व्यक्तेः अथवा वस्तुनः परिणामात्मकमूल्यस्य परिगणना अथवा गणितीयं व्याख्यानं मूल्याङ्कनमेवं व्याख्यायते।

- व्यक्तेः उपलब्धेः संख्यात्मकविवरणम्।
- व्यक्तेः योग्यतानां गुणात्मकविवरणम्।
- व्यक्तेः उपलब्धेः योग्यतायाश्च मूल्यनिर्धारणम्।

एतेषामर्थानाम् आधारेण मूल्याङ्कनं पुनः एवमपि व्याचक्षते।

- मूल्याङ्कनमेका सतत प्रक्रिया।
- मूल्याङ्कनमेका क्रमबद्धप्रक्रिया।
- मूल्याङ्कने विषयवस्तुनोपलब्धिना च सह रुचिः विचारः दृष्टिकोणः , कार्यप्रणाली , व्यक्तिगतम् , सामाजिकञ्च अनुकूलचिन्तनमित्यादीनि अन्तर्गतानि भवन्ति।
- मूल्याङ्कनेन उद्देश्यानां प्राप्तेः निर्धारणं क्रियते।
- मूल्याङ्कनेन अधिगमानुभवानाम् उपयोगितायाः अध्ययनेन सह उद्देश्यपूर्तौ अधिगमानुभवाः कियत् पर्यन्तं सहायं कुर्वन्ति इत्यपि निर्धारयितुं शक्यते।

**मूल्याङ्कनस्य परिभाषा –**

- रेमर्स एवं गेज महोदयौ मूल्याङ्कनस्य विषये व्यक्तेः तथा समाजस्य तदुभयोः वा दृष्टौ यदपेक्षितं यद्योग्यं च वर्तते तस्यैवानुप्रयोगः मूल्याङ्कने क्रियते इति भणतः।
- कोठारी आयोगेन (1966)- मूल्याङ्कनस्य व्याख्या इत्थमकारि – मूल्याङ्कनम् एका अनवरतप्रक्रिया या सम्पूणशिक्षाप्रणाल्याः केवलम् एकम् अभिन्नम् अङ्गमिति अधुना परिगण्यते, अपि च शैक्षिकोद्देश्यैः सह अस्य घनिष्ठः सम्बन्धः वेविद्यते इति।

**मूल्याङ्कनप्रक्रिया (Evaluation process)**

राष्ट्रियशैक्षिकानुसन्धान प्रशिक्षणपरिषदः (1962) अनुसारेण मूल्याङ्कनं काचित् निरन्तरप्रक्रिया भवति। यस्याः शिक्षणोद्देश्यानि अधिगमादुत्पन्नानुभवाः व्यवहारपरिवर्तनमिति त्रयः अंशाः महत्त्वपूर्णाः वरीवृत्यन्ते।

- उद्देश्यानां निर्धारणम् 1. सामान्योद्देश्यानां निर्धारणं पारिभाषीकरणम्।
  2. विशिष्टोद्देश्यानां निर्धारणं पारिभाषीकरणम्

- अधिगमानुभवानां प्रदानम्। 1. शिक्षणबिन्दूनां चयनम्। 2. अधिगमोपयुक्तक्रियाणां चयनम्।
- व्यवहारपरिवर्तनानाम् आधारेण मूल्याङ्कनंम्। छात्रव्यवहारपरिवर्तनानां मूल्याङ्कनम्। परिणामेषु प्रतिपुष्टिः।
- उद्देश्यकेन्द्रियशिक्षायाः निर्माणमेव मूल्याङ्कनस्य मुख्यं लक्ष्यम्।

**मूल्याङ्कनस्य आवश्यकता** –

किमपि कार्यं क्रियते चेत् तत् कियत्पर्यन्तं सफलं जातमित्यपि ज्ञातव्यम्। उद्देश्येन कार्यं कृतं तदुद्देश्यं सम्पन्नं वेति चिन्तनीयम् । 'अध्यापकानां शिक्षणं कियत्सफलम्'? 'छात्राणां विषयग्रहणं कियत्' ? इत्यादिविषयान् परम्परागतपरीक्षाणां द्वारा ज्ञातुमशक्यत्वात् मूल्याङ्कनस्य अवलम्बनम् आवश्यकं भवति। शिक्षणविधीनां समीकरणे शिक्षणस्तरस्य उन्नतीकरणे च मूल्याङ्कनं सहायकं भवति।

**मूल्याङ्कनस्य प्रकाराः -** मुख्यरूपेण मूल्याङ्कनं द्विविधं भवति। यथा -

- **आन्तरिकमूल्यांकनम्** – आन्तरिकमूल्यांकनं शैक्षणिकसत्रे कृतानां सर्वेषां कार्याणां दैनिकगतिविधीनाञ्च परीक्षणम्। एतादृशं मूल्यांकनमत्युत्तमं भवति। आन्तरिकमूल्यांकनं छात्राणां दैनिकप्रगतिं, गृहकार्यं, विभिन्नसाहित्यिकेषु कार्यक्रमेषु प्रदर्शितं कौशलं, सामयिकपरीक्षाणां परिणामञ्चाश्रित्य भवेत्।
- **बाह्यमूल्यांकनम्** – बाह्यमूल्यांकनं विद्यालयैः शैक्षिकसंस्थाभिः विश्वविद्यालयैश्च आयोजिता परीक्षा द्वारा भवति। एतासु परीक्षासु छात्रेभ्यः लिखितानामुत्तराणां, कृतस्य कार्यस्य चाधारेण अङ्कानां वितरणं क्रियते।

**मूल्याङ्कनसाधनानि**–

सामान्यतया मूल्याङ्कनाय निम्नलिखितसाधनानामुपयोगः क्रियते, यथा -

1. निबन्धपरीक्षाः 2. वस्तुनिष्ठपरीक्षाः 3. मौखिकपरीक्षाः 4. प्रश्नावली 5. जीवनेतिहासविधिः 6. साक्षात्कारः 7. परिशीलनपट्टिकाः 8. मापकपट्टिकाः 9. बुद्धिपरीक्षाः 10. निदानात्मकपरीक्षाः 11. अभिरूचिपरीक्षाः 12. प्रायोजनाप्रविधयः 13. आसक्तिपरीक्षाः 14. समाजमितिविधिः।

**मूल्याङ्कनस्य नूतनविधयः -**

भाषाशिक्षणस्तरःप्रायः परीक्षाप्रणाल्यामाधारितो भवति । यदि दोषमुक्ता स्यात् तर्हि शिक्षणस्तरः उन्नतः स्यात्। अतः भाषाशिक्षणेऽपि मूल्याङ्कनस्य नवीनदृष्टिकोणः अनुसरणीयः। यदि परीक्षाप्रणाल्यां परिवर्तनं भवति तर्हि शिक्षणविधानेऽपि परिवर्तनं स्यात्, तथा च परीक्षाप्रणाली निर्दुष्टा स्यात्।

## निबन्धात्मकमूल्याङ्कनविधिः -

वर्तमानपरीक्षा निबन्धात्मिका वर्तते। अत्र प्रश्नानामुत्तरं विस्तृतं शैली विवरणात्मिका च भवति। अनेन विधिना ज्ञानोपलब्धेः वास्तविकं परीक्षणं न भवति । छात्राः विषयं ज्ञात्वापि भाषायामधिकाराभावात् शीघ्रलेखनस्य अभ्यासाभावाद्वा परीक्षायां पराजिताः भवन्ति, तथाऽपि निबन्धपरीक्षा बहिष्कर्तुं न शक्यते। निबन्धपरीक्षया अधोनिर्दिष्टानामंशानां परीक्षणं कर्तुं शक्यते।

(क) लिखिताभिव्यक्तिः। (ख). पाठ्यपुस्तकाल्लब्धविषयज्ञानम्। (ग). अक्षरविन्यासः।
(घ). सारलेखनं ,भावाभिव्यक्तिः। (ङ). कवितानां, रसानुभूतिः। (च).घटनानां वर्णनम्।
(छ). पत्रलेखनं, निबन्धरचना।

## वस्तुनिष्ठमूल्याङ्कनविधिः -

निबन्धात्मकपरीक्षाणां दोषाणां निवारणाय मूल्याङ्कने वस्तुनिष्ठपरीक्षाविधानं आश्रियते । अत्रैतादृशानां प्रश्नानां रचना क्रियते येषामुत्तरं निश्चितं भवति । तेन च परीक्षा विषयनिष्ठा भवति, मूल्याङ्कनञ्च निष्पक्षम् । एषु प्रश्नेषु परीक्षकाणां भेदेऽपि मूल्यनिर्णये भेदो न भवति अतोऽत्र वैधता विश्वसनीयता भवतः। अत्र लिखिताभिव्यक्तेः परीक्षणं न शक्यते। तथापि निम्नलिखितानां विषयाणाम् इयं प्रणाली उपयुज्यते।

(क) विषयग्रहणकौशलम्। (ख) शब्दज्ञानम्। (ग) शुद्धप्रयोगः। (घ) सैद्धान्तिकव्याकरणम्।
(ङ) अक्षरविन्यासः। (च). प्रयोगात्मकव्याकरणम्। (छ) अलङ्कारः छन्दश्च।

## निरीक्षणम् -

अनुस्यूतनिरीक्षणमेव मूल्यनिर्णयस्योपाध्यन्तरम् । विषयस्य पठनसमये तथा प्रयोगसमयेऽपि पाठ्येतरप्रवर्तनसन्दर्भेऽपि छात्राः अध्यापकस्य सूक्ष्मनिरीक्षणस्य पात्रीभूताः भवेयुः। अनुस्यूतरूपेण छात्रस्य निरीक्षणं तस्य मापनस्य कृतेऽप्युपकारकं सहायकञ्च भवति।

## अभिक्रमिताऽधिगमः-

अभिक्रमिताधिगमः अनुदेशनस्य लघुपदानां रूपाधाराणाम् एका शृंखला। एतेषु अधिकांशपदानि अनुक्रियायाः निमित्तं वाक्ये रिक्तस्थानस्य पूर्त्यर्थम् उपयुज्यन्ते । अपेक्षितानुक्रियाणां कृते कस्याश्चित् सङ्केतप्रणाल्याः प्रयोगः क्रियते, तथा एकैकस्याः अनुक्रियायाः पुष्टिः, परिणामप्राप्तेः समनन्तरमेव कार्यते।

## अभिमुखसम्भाषणम् (Interview) –

छात्रेषु जायमानस्य व्यवहारपरिवर्तनस्य अयमपि एक उपाधिः भवति। एकैकस्योद्देश्यस्याधारेण क्रियमाणे अभिमुखसम्भाषणे भेदः वरीवर्ति। An interview is a conversation between two or more people where questions are asked to obtain information about the interviewee.

**भाषाप्रयोगशाला -**

भाषाप्रयोगशालायां दृश्यश्रव्यसामग्रीभिः श्रवणभाषणनामकं भाषाकौशलम् अध्याप्यते। अस्यां प्रयोगशालायां प्रायः विंशतिः पञ्चविंशतिः वा प्रकोष्ठाः निर्मिताः भवन्ति, यत्र छात्राः उपविश्य ध्वनिमुद्रणयन्त्रमाध्यमेन भाषायाः आदर्शरूपं श्रोतुं शक्नुवन्ति। एतत् मुद्रणं भाषापञ्जिकामुद्रणम् इत्युच्यते।

**सूक्ष्मशिक्षणम् -**

अल्पसमयात्मकः अल्पच्छात्रात्मकः अल्पपाठ्यांशात्मकः, एककौशलात्मकश्च कश्चन समुचितशिक्षणविधिः। सूक्ष्मशिक्षणस्य कौशलानि यथा - 1. प्रस्तावनाकौशलम् 2. प्रश्नकरणकौशलम् 3. श्यामपट्टलेखनकौशलम् 4. पुनर्बलनकौशलम् 5. उदाहरणदृष्टान्तकौशलम्

**व्यक्तिवृत्तम्(Case Study)-**

असाधारणछात्राणां मापनोपाधिः भवति व्यक्तिवृत्तम्। सामान्यरीत्या शोधनप्रदानेन वा निरीक्षणेन वा मापनेन वा असाधारणछात्राणां मापनं कर्तुं नैव शक्यम्। ईदृशस्य छात्रस्य कायिकं कुटुम्बपर्यावरणं सामाजिकपर्यावरणं सौहार्दपरं शैक्षिकपरं वैयक्तिकम् इत्यादीनाम् अनेकेषां कार्याणां समग्रपरिशोधनाः अनिवार्या भवति।

**समाहारः-**

वस्तुतः मूल्याङ्कनं गुणात्मकनिर्धारणप्रक्रिया भवति। अतः मूल्याङ्कनमपि एकविधं मापनमेव। मापनेन प्राप्ताङ्कानां द्वारैव मूल्याङ्कनं क्रियते। अतः मापनं मूल्याङ्कनस्य साधनं भवति। आधुनिककाले शिक्षाशास्त्रिभिः न केवलं बालकस्य मानसिकविकासे दत्तावधानैः भाव्यम् अपि च छात्राणां सर्वाङ्गीणविकासाय प्रयासाः विधेयाः भवन्ति।

**सहायकग्रन्थसूची –**


1. *संस्कृतशोधप्रविधिः - डॉ. सत्यनारायण आचार्य*
2. *शैक्षिक मूल्यांकन - डॉ. रामपाल सिंह*
3. *दक्षिणभारते संस्कृतशिक्षणम् - डॉ. फतेह सिंह*
4. *शैक्षिक तकनीकी के मूल आधार – डॉ. एस. पी. कुलश्रेष्ठ*
5. *शिक्षा मनोविज्ञान - डॉ. पी.डी. पाठक*
6. *पाठ्यक्रम शिक्षण कला एवं मूल्यांकन – डॉ. रामपाल सिंह वर्मा , डॉ. रमेश शर्मा*
7. *संस्कृत शिक्षण – डॉ. सन्तोष मित्तल*

# संस्कृतभाषाऽधिगमे भाषाप्रयोगशालायाः भूमिका

**✍ डॉ. सचिनकुमारः ***

संस्कृतं विश्वस्य अन्यतमा भाषा वर्तते । वैज्ञानिकयुगेऽस्मिन् सर्वोत्कृष्टभाषात्वेन संस्कृतस्य उपयोगिता प्रासंगिकता च सुविख्याता वर्तत एव । सम्प्रति यत्र संस्कृतं प्रति आधुनिकवैज्ञानिकानां रुचिः वर्धते, तत्रैव भारतवर्षेऽस्मिन् संस्कृतस्य औपचारिकम् अध्ययनाध्यापनं न तावत् सन्तोषप्रदम् । भाषा हि विचारविनिमयस्य साधनं भवति । यद्यपि संस्कृतं विना विचार-विनिमये नास्ति अवरोधः, किन्तु एकं पक्षमङ्गीकृत्य संस्कृतस्य उपयोगितायाः उपेक्षाकर्तुं न शक्यते । संस्कृतं न केवलं विचारविनिमयस्य साधनमात्रमेव, प्रत्युत संस्कृतस्य संगणकीयं वैज्ञानिकं साहित्यिकञ्च महत्त्वमस्यै अन्यभाषानामपेक्षया विशिष्टतां प्रददाति । जनाः यत्किञ्चिदपि संस्कृतं पठन्ति, वस्तुतः तस्य कारणम् एतानि वैशिष्ट्यान्येव । भाषाधिगमः न केवलं केषाञ्चन शब्दानां पठनावगमनयोः योग्यता, अपित्वत्र भाषायां सर्वविधदक्षता आवश्यकी भवति । संस्कृतभाषाधिगमसन्दर्भे सामान्यतया जनाः संस्कृतं शीघ्रं पठितुं लेखितुं चाऽधिगच्छन्ति । यद्यपि ते सम्भाषणे संस्कृतस्य काञ्श्चन शब्दान् एव वक्तुं सक्षमाः स्युः । अत एव संस्कृतभाषाधिगमे भाषाप्रयोगशालायाः आवश्यकता अनुभूयते ।

**भाषाप्रयोगशाला**

आधुनिकभाषाशिक्षणाधिगमयोः प्रक्रियायां सारल्यप्रभावपूर्णताभ्यां भाषाप्रयोगशाला प्राविधिकोपकरणानाम् एका श्रव्य-दृश्यस्थापना वर्तते । भाषाप्रयोगशाला भाषामधिगन्तुम् एकः प्रकोष्ठविशेषो वर्तते यत्र शिक्षकः प्रशिक्षको वा प्रक्षेपकयन्त्र-ध्वनिग्राही-ध्वनिमुद्रणयन्त्र-दृश्यचलच्चित्रमुद्रक-सङ्गणकादिभिः छात्रेभ्यः प्रभावपूर्णभाषाधिगमं कारयति । बेडर (२००८) महोदयस्य मतानुसारम् - “भाषाप्रयोगशाला विद्यालय-महाविद्यालय-विश्वविद्यालय-प्रशिक्षण-संस्थानेषु आयोज्यमाना तादृशी विशेषकक्षा वर्तते, यस्यां अधिगन्तृभ्यः भाषामधिगन्तुं सहायकत्वेन ध्वन्यभिलेख-ध्वनिमुद्रिका-सान्द्रमुद्रिकाः श्रोतुम्, तथा भाषासम्बद्धदृश्य-चलच्चित्रादीनि द्रष्टुमपि दृश्य-श्रव्याभिलेखनार्थं विशिष्टानि उपकरणानि प्रयुज्यन्ते ।”

**भाषाप्रयोगशालायाः उद्देश्यानि –**

कस्यापि कार्यस्य कानिचन उद्देश्यानि भवन्ति, येषां पूर्तये तत्कार्यविशेषः क्रियते । अथाऽत्र भाषाशिक्षणेऽपि भाषाप्रयोगशालायाः अनुप्रयोगाय केषाञ्चन उद्देश्यानां निर्धारणं क्रियते, येषामभावे

** अतिथि अध्यापकः, शिक्षाशास्त्रविभागः, राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि) मुम्बई परिसरः।*

अधिगमः अपूर्णः भवति। तद्यथा –

- विभिन्नपरिस्थितिषु प्रभाविरीत्या सम्प्रेषणस्य क्षमतोत्पादनम्।
- संचार-रणनीतीनां विस्तृतश्रृंखलायां भाषायाः चतुर्षु प्रमुखकौशलेषु दक्षताप्राप्तिः।
- भावाभिव्यक्तये भाषायाः उच्चारण-शब्दावली-व्याकरणेषु शुद्धतापूर्वकं उत्कृष्टयोग्यताप्राप्तिः।
- व्यावहारिकयोग्यतायाः विकासेन सह व्याकरणस्य रूप-कार्य-औपचारिकतानाम् अवबोधः।
- आनन्दपूर्णानुभवेन सह कार्यात्मकरीत्या भाषाणामध्ययने अधिकाधिकछात्रेषु अभिरुच्युत्पादनम्।
- भाषणक्षमतामभिवर्धयितुम्, पाठ्यवस्तु प्रासंगिकं निर्मातुं सुष्ठु सम्भाषणं कर्तुञ्च अपेक्षितयोग्यतायाः विकासः।

**भाषाप्रयोगशालायाः विकासः**

भाषाप्रयोगशालायाः आरम्भः प्रायः ख्रीष्टोः 1908 तमे वर्षे अमेरिकादेशस्य 'ग्रेनोबलविश्वविद्यालये' अभवत्। ब्रिटिश-ब्राडकास्टिंग-कर्पोरेशन (BBC) द्वारा 1943 तमे वर्षे आंग्लभाषायाः शिक्षणार्थं 'बी.बी.सी. इंग्लिश लर्निंग' इति कार्यक्रमः आयोजितः। ख्रीष्टोः 1990 वर्षावधिं यावत् भाषाप्रयोगशाला 'रील' 'कैसेट' इत्यनयोः प्रयोगपूर्वकं 'ध्वन्यभिलेखयन्त्राधारिता' प्रणाली आसीत्। तदनु 1990 ख्रीष्टाब्दे 'एनालॉग'प्रकारस्य स्थाने 'तन्त्रांश-यन्त्रांशचालकस्य' विकासेन प्रणालीयं 'डिजिटल-हाइब्रिड'सङ्गणकाधारिता जाता।

भाषाप्रयोगशालायाः अस्यां प्रणाल्यां निश्चितस्थानेषु श्रव्य-अनुयोजकतायै संचाराय उपलब्धसङ्गणक-नेटवर्क उपरि एकं पूरक-नेटवर्क स्थाप्यते। तन्त्रांश-प्रणाल्यां सङ्गणकाधारित-नेटवर्क स्थापनेन भाषाप्रयोगशाला प्रभावपूर्णा जाता। कालान्तरे श्रव्येन सह दृश्य-चलच्चित्र-अन्तर्जालादीनां प्रयोगेन इयमधिका समृद्धा अभवत्। येन गति-सञ्चारमाध्यमानाम् उपलब्धतायाः विविधतया परामर्शदातारः शिक्षकाः वा दूरस्थशिक्षार्थीनां प्रदर्शनस्य आकलनेऽपि सक्षमाः अभवन्।

**भाषाप्रयोगशालायाः प्रकाराः** ( Types of Language Laboratory )

**1. डायल-एक्सेस प्रयोगशाला** – एतादृश्यां भाषाप्रयोगशालायां सामान्य-प्रयोगशालायाः अपेक्षया अधिकं स्थानमपेक्ष्यते। अपि चात्र अधिकाः प्राविधिककार्यकर्तारः अपेक्षिताः भवन्ति। इयं प्राथमिकतया एका प्रसारण-क्रियाकलापाधारिता प्रयोगशाला। या अभिक्रमस्य आकृतौ निर्भरा भवति। अत्र प्रत्येकम् अधिगन्ता प्रदीयमानसमये स्वतन्त्ररूपेण एकं ध्वन्यभिलेखम् उपयोक्तुमर्हति।

**2. मोबाईल प्रयोगशाला** – एतादृशी सचलभाषाप्रयोगशाला एकस्मिन् शिक्षणसंस्थाने विभिन्नप्रकोष्ठेषु उपयोक्तुं शक्यते । भाषाप्रयोगशालायां प्रयुज्यमाणान्युपकरणानि प्रधान-नियन्त्रणयन्त्रं सान्द्रमुद्रिका ध्वनिग्राहीयन्त्रञ्च अत्र संलग्नाः भवन्ति । सचलभाषाप्रयोगशालायाः प्रयोगेण प्रत्येकमपि कक्षाकक्षः प्रयोगशालायां परिवर्तितः भवितुमर्हति ।

**3. वायरलेस प्रयोगशाला** – अधिगन्तॄणामुपयोगस्य तारयुक्त-ध्वनिग्राहीयन्त्राणां स्थाने एकलसम्प्रेषण-योग्यानां रेडिया-तरङ्गाधारितध्वनिग्राहीयन्त्राणां प्रयोगसम्पन्ना वायरलेस प्रयोगशाला कथ्यते । अस्यामधिगन्तृभ्यः सम्भूय निर्देशप्रदानं तैस्सह अन्तःक्रिया च भवितुं नार्हति ।

**4. पोर्टेबल प्रयोगशाला** – इयं सचलप्रयोगशालामिव भवति । यस्याः प्रयोगः एकस्मात् स्थानादन्यत्र कर्तुं शक्यते । प्रयोगशालायामस्यां विद्युत्-बैटरी तथा विद्युत्-जनरेटर युक्तः भवति । शिक्षया वंचितदूरस्थक्षेत्रेषु प्रयोगाय इयं सर्वोपयुक्ता मन्यते ।

**भाषा-प्रयोगशालायाः उपकरणानि**

1. सङ्गणकम् 2. प्रक्षेपकयन्त्रम् 3. प्रधान-प्रकार्य-नियन्त्रकः 4. ध्वनिग्राहीयन्त्रम्

**भाषाप्रयोगशालायाः वैशिष्ट्यानि** –

1 भाषाप्रयोगशालायाः माध्यमेन भाषाशिक्षणमत्यन्तं प्रभावपूर्णं स्थिरं सरलञ्च भवति । भाषाप्रयोगशालायाः एतादृशान्येव अनेकानि वैशिष्ट्यानि भवन्ति । तद्यथा –

1. आत्मगतिः - Self Pacing.
2. प्रभावशीलता - Efficiency.
3. विभिन्नता - Variety.
4. मौखिकाभ्यासः - Oral Testing.
5. शिक्षकालोकनम् - Teacher Monitoring.
6. पात्राभिनयाभ्यासः - Role Playing Exercises.
7. समानावसरः - Equal Opportunity.
8. पर्याप्तध्वनिकता - Acoustics.
9. पुनरन्वेषणम् - Retracting.
10. गोपनीयता - Privacy.
11. अवधानम् - Conisation.
12. श्रवणकौशलविकासः - Development of Listening Skill.

**संस्कृतशिक्षणे भाषाप्रयोगशालायाः लाभाः**

शिक्षणाधिगमयोः दृष्ट्या भाषाप्रयोगशालायाः लाभाः अत्यन्तप्रासंगिकाः भवन्ति । अथात्र भाषाप्रयोगशालायाः केचन महत्त्वपूर्णलाभाः बिन्दुशः प्रस्तूयन्ते –

1. शीघ्रं स्पष्टश्च भाषाधिगमः ।
2. कक्षायां छात्रेषु वैयक्तिकावधानम् ।
3. संस्कृतस्य प्रभावपूर्णः भाषाभ्यासः ।
4. संस्कृतसम्भाषणाय अधिकाधिकावसराः ।
5. संस्कृतभाषाधिगमे सर्वोत्तमपरिणामानां प्राप्तिः ।
6. संस्कृतभाषायां श्रवणोन्मुखतया श्रवणसंस्कारः ।
7. संस्कृतस्य व्यावहारिक-उपयोगाय उपयुक्तमञ्चप्रदानम् ।
8. संस्कृतशिक्षणे अधिकसंसाधनानां विविधगतिविधीनाञ्च प्रयोगः ।
9. प्राविधिकोपकरणानां प्रयोगेण संस्कृतं प्रति छात्राणामरुचेः निवारणम् ।
10. व्यावहारिकक्रियाकलापाधारितशिक्षणेन संस्कृतभाषाधिगमस्य दृढीकरणम् ।

**संस्कृतशिक्षणे भाषाप्रयोगशालायाः सीमानः –**

भाषाप्रयोगशालायाः विभिन्नलाभैस्सह अस्याः संघटनस्य क्रियान्वयनस्य च संबंधे कानिचन काठिन्यायपि भवन्ति । संस्कृतभाषाशिगमे भाषाप्रयोगशालायाः अधोलिखितसीमानः भवितुमर्हन्ति -

1. अत्यधिकधनस्य आवश्यकता ।
2. पर्याप्तोपकरणानाम् अनुपलब्धता ।
3. विद्यालयेषु पर्याप्तोपयुक्तस्थानस्याभावः ।
4. विद्युतादीनां प्राथमिकसंसाधनानाम् अभावः ।
5. योग्यशिक्षकाणां प्राविधिकविशेषज्ञानाञ्च अभावः ।
6. भाषाप्रयोगशालायां शिक्षणाधिगमाभ्यां पर्याप्तसमयस्याभावः ।
7. संस्कृताधिगमं प्रति छात्राणां गम्भीरतायाः अभावेन सञ्चालने काठिन्यम्

**संस्कृतभाषाधिगमे भाषाप्रयोगशालायाः प्रभावपूर्णोपयोगाय परामर्शाः –**

संस्कृतभाषाधिगमे भाषाप्रयोगशालायाः प्रभावपूर्णसंघटनेन तथा सुष्ठु प्रयोगेणैव अपेक्षितः लाभः भवितुमर्हति । अत एवात्र तद्विषयकाः केचन आवश्यकोपायाः प्रस्तूयन्ते –

1. संस्कृतशिक्षणस्य पारम्परिक-अप्रभाविप्रविधीनां त्यागः कर्त्तव्यः।
2. संस्कृतभाषापाठ्यक्रमे भाषाप्रयोगशालायाः गतिविधयः समाविष्टाः स्युः।
3. भाषाप्रयोगशालायाः कुशलतापूर्वकसञ्चालने सुयोग्यभाषाशिक्षकाणां नियुक्तिः स्यात्।
4. संस्कृतशिक्षकाणां सङ्गणकादिप्राविधिकोपकरणानाम् अनुप्रयोगस्य आधारभूतज्ञानं भवेत्।
5. विद्यालयस्य दैनिककक्षायाः समयसारण्यां भाषाशिक्षणस्य व्यावहारिककक्षायाः स्थानं भवितव्यम्।
6. संस्कृतशिक्षकेण भाषाप्रयोगशालायां व्यावहारिककार्यं नियमितमूल्याङ्कनञ्च अनिवार्यरूपेण कर्त्तव्यम्।
7. भाषाप्रयोगशालां स्थापयितुं सर्वकारपक्षतः उचित-स्थान-धन-प्राथमिकसैविध्यानां पर्याप्तोपलब्धतायाः व्यवस्था स्यात्।
8. संस्कृतभाषाधिगमे भाषाप्रयोगशालायाः प्रयोगाय समये समये विभिन्नसङ्गोष्ठी-कार्यशाला-प्रशिक्षणकार्यक्रमाणाम् आयोजनं कर्त्तव्यम्।
9. सर्वकारीयप्रशासनिकसंस्थाभिः विश्वविद्यालयानुदानायोगः, राष्ट्रियशिक्षकशिक्षापरिषद्, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद् इत्याद्युच्चसंस्थाभिः संस्कृतशिक्षणे भाषाप्रयोगशालायाः व्यावहारिकप्रयोगाय समुचितकार्यविधेः निर्माणं नियमनञ्च स्यात्।

संस्कृतभाषायाः शिक्षणाधिगमयोः भाषाप्रयोगशालायाः प्रयोगविषयकेन उपर्युक्तविवेचनेन स्पष्टं भवति यत् संस्कृतस्य अध्ययनाध्यापने भाषाप्रयोगशाला महदुपकरोति । संस्कृतभाषाधिगमे यत्र भाषाप्रयोगशालायाः अनेकलाभाः भवन्ति, तत्रैव कांश्चन सीमानः अपि भवन्ति। अतः तासां सीमानां तद्विषयककाठिन्यानाञ्च निवारणं क्रियते चेत् संस्कृतभाषाधिगमे भाषाप्रयोगशालायाः प्रयोगस्य पूर्णलाभाः स्युः। अन्ते च निष्कर्षरूपेण अधोलिखितबिन्दवः प्रस्तूयन्ते –

- सङ्गणकादीनां सहायकोपकरणानां विवेकपूर्णोपयोगः अत्यावश्यकः।
- संस्कृतभाषाधिगमे नवीनप्राविधिकोपकरणानाम् अधिकाधिकः सुष्ठुः उपयोगः आवश्यकः।
- संस्कृतभाषाधिगमं सरलं रुचिवर्धकं सुस्थिरञ्च कर्तुं भाषाप्रयोगशालायाः अनुप्रयोगः आवश्यकः।
- संस्कृतशिक्षकेभ्यः कक्षाध्यापने भाषाप्रयोगशालायाञ्च नूतनप्रविधेरुपयोगस्य व्यापकप्रयासाः अपेक्ष्यन्ते।
- भाषाप्रयोगशालायां सङ्गणकादीनि साधनमात्राणि भवन्ति न तु समाधानानि।

अतः भाषाप्रयोगशालायाः गतिविधिषु शिक्षकच्छात्रयोः अभिनिवेशः महत्त्वपूर्णः।

**अनुशीलिताः –**


1. *रमन, मीनाक्षी; शर्मा, संगीता (2005); टेक्नीकल कम्यूनिकेशन : प्रिन्सिपल्स एण्ड प्रेक्टिस, ऑक्सफोर्ड यूनिवर्सिटी प्रेस।*
2. *सिंह, एस० (2013); लैंग्वेज लेब्रोटरी : पर्पज एण्ड शॉर्टकमिंग्स, जर्नल ऑफ टेक्नोलॉजी फोर ई.एल.टी.*
3. *डेसमंड, कूपर (2004); वर्बल फ्लुएन्सी एण्ड द लैंग्वेज लेब्रोटरी, किवंग वॉल्यूम - 3, नंबर - 1.*
4. *रिजवी, अशरफ (2005); प्रभावी तकनीकी संचार, टाटा मैकग्रा हिल एजुकेशन प्राइवेट लिमिटेड.*
5. *रिचर्ड्स, जे०, (2001); एप्रोचेस एण्ड मैथड्स इन लैंग्वेज टीचिंग, कैम्ब्रिज यूनिवर्सिटी प्रेस,*
6. *रॉबी, डब्ल्यू० बी० (2004); टेक्नोलॉजी इन द सर्विस ऑफ फोरेन लैंग्वेज टीचिंग, रिसर्च हैण्डबुक ऑफ एजुकेशनल कम्यूनिकेशन एन्ड टेक्नोलॉजी,*
7. *जोनसन, डी० ; रिसर्च बुक ऑफ एजुकेशनल कम्यूनिकेशन एण्ड टेक्नोलॉजी, 523-541, द्वितीय संस्करण,*
8. *http://www.aect.org/edtech/19 - 2017.*

# समासानामधिगमे रेखीयाभिक्रमस्योपयोगिता

✍ डॉ. कुमारः *

शिक्षैका सततमाजीवनं प्रचाल्यमाना विशिष्टा प्रक्रियेति सर्वेऽपि जानन्ति । पदमिदं शिक्ष् – विद्योपादाने इति धातोः निष्पन्नम् । अतः शाब्दिकमर्थमवलोकयामश्चेत् ज्ञायते यदस्यार्थः विद्यार्जनमिति । विद्यार्जनं जीवननिर्वहणविद्येति मे मतम् । केवलं शालायाः भित्तेरन्त उपाविश्य बालकेभ्यो यद्दीयते सैव विद्या न । अतः बहवः शिक्षाविद अभिप्रयन्ति यथा - आजीवनं सततं प्रचाल्यामाना, अन्तर्निहितशक्तीनां बहिरानयनप्रक्रिया, अर्थाद् यत्र कुत्रापि यथाकथञ्चित्सुखमयजीवननिर्वहणाय अपेक्षितस्य ज्ञानस्य सम्पादनात्मिका प्रक्रिया शिक्षा इति ।

अस्मिन्नेवार्थे आङ्ग्लभाषायां Education इति पदं प्रयुज्यते, यस्यार्थो भवति - A lifelong continuous process of gaining knowledge or all-round development of a child. Education इति पदस्याप्यर्थः - 1. to lead out 2. to extract out and 3. to bring forth इत्यादि। परन्त्वेतस्य पदस्य समानार्थकत्वेन प्रयुज्यमानानीतराणि पदानि सन्ति यथा- शिक्षणम्(Teaching), अधिगमः (Learning), प्रशिक्षणम् (Training), अध्ययनम् (Study), विद्या(Knowledge), अनुदेशनम् (Instruction)। प्रायः इमानि पदानि सर्वाण्यपि समानार्थकानि वा न वेति सन्देहो जायते । सति सन्देहे किञ्चिद्विमर्शं प्रस्तौमि ।

वस्तुतः इमानि पदानि प्रायः समानार्थे प्रयुज्यन्ते लोके । परं सूक्ष्मभेदः वर्तते एवेति मे मतिः । शिक्षा नाम एका प्रक्रिया, मानवः सुखमयजीवननिर्वहणाय विद्यार्जनाय च स्वजीवने यामाश्रित्य सदा यतमानो भवति । जीवननिर्वहणज्ञानसम्पादनप्रक्रिया अर्थाज्जीवनानुभवप्राप्तेः प्रक्रिया इति स्पष्टम् ।

शिक्षणमपि विद्यार्जनस्य प्रक्रिया । परमत्र शिक्ष- धातोः कर्मण्यर्थे ल्युट् प्रत्यये रूपम् । अतः शिक्षणे कश्चित्प्रेरकः अर्थात् शिक्षकः भवति । शिक्षकस्य दायित्वपूर्णक्रियामेव शिक्षणमिति वदामः । Teaching - The act, practice, or profession of a Teacher. आधुनिककालेऽस्मिन्शिक्षकः इत्युक्ते सम्यग्रूपेण सनिर्देशं प्रकाशिता पाठ्यपुस्तकादिशिक्षणसामग्र्यपि भवितुमर्हति। शिक्षणमित्यस्य परिभाषाः अपि सन्ति । यथोक्तं स्मिथमहाशयेन –शिक्षणं नाम शैक्षिकक्रियाणां सा व्यवस्था भवति, या अधिगमं प्राप्तुं प्रेरयति इति ।

यादृच्छिकवाचिकध्वनिसंकेतं वा पारस्परिकविचारं वा यया मानवः विनिमयं करोति सा भाषेत्यभिधीयते । भाषाशिक्षणशास्त्रशिक्षणयोः मध्ये प्रगाढः सम्बन्धः वर्तते । श्रवणभाषणपठनलेखनकौशलानाम् उत्तरोत्तरविकासाय शास्त्रज्ञानमनिवार्यम् । शास्त्रेण विना भाषायां पाण्डित्यं नायाति । उदाहरणार्थं संस्कृतभाषायाः जीवातुभूतस्य व्याकरणशास्त्रस्य प्राथमिकज्ञानाभावे न कश्चिद् बालः गतिं प्रगतिं वा विन्दति । भाषारूपगृहस्य निर्माणार्थं शास्त्राणि, पूरकसामग्र्य इव कार्यं कुर्वन्ति । भाषायाः विकासे शास्त्राणि पूरकाणि सन्ति इति निश्चप्रचम् ।

संप्रति नवाचारः इतीदं पदं विविच्यते । नवाचारः इत्येषः शब्दः नूतनां चेष्टां क्रियां वा द्योतयति । भाषायां शास्त्रशिक्षणे वा परिदृश्यमाना नूतनता नवाचारस्य परिचायिका भवति । नूतनाः भाषाशास्त्रशिक्षणसिद्धान्ताः, विधयः, आधुनिकोपकरणानि, प्रशिक्षणसंसाधनानि सर्वाण्यपि नवाचारस्यैव फलानि सन्ति । नवाचारप्रवर्तकाः व्याख्यानपद्धतिं वा पारम्परिकपद्धत्या शिक्षणं वा नैव पुरस्कुर्वन्ति । तेषां मते सर्वाण्यपि अमनोज्ञकानि वर्तन्ते ।

परं तु शास्त्रशिक्षणे प्रयोगात्मकविधिः आबहोः कालादारभ्य वर्तत एव । उदाहरणार्थं- छान्दोग्योपनिषदि उक्तः लवणदृष्टान्तः । अस्मिन् प्रकरणे गुरुः प्रत्यक्षविधिना तन्नाम प्रयोगपुरस्सरं बालमध्यापयति । बालः स्वयं प्रयोगं कृत्वा अधिगच्छति । एतदेव आधुनिकैः learning by Doing इत्युच्यते । अर्वाचीनैः नवाचारपदेन व्यवह्रियमाणाः नैके शिक्षणविधयः उपनिषत्सु तत्र तत्र समुपलभ्यन्ते । उदाहरणार्थं तत्त्वमस्यादिमहावाक्यानां बोधनसंदर्भे कृतेयं शिक्षणपद्धतिः -

**उपक्रमोपसंहारौ अभ्यासोऽपूर्वताफलम्।**
**अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये।**॥इति॥

### 1. उपक्रमोपसंहारौ -

उपक्रमोपसंहारौ नाम - विचार्यवाक्यस्य आद्यन्तयोरेकार्थपर्यवसानम् । प्रकृते लौकिकशिक्षणेऽपि एवमुपक्रमोपसंहारक्रमौ स्वीकर्तुं शक्येते। यत्किञ्चित् बोधनावसरे यः विषयः उपक्रमे उक्तः तेनैव विषयेण उपसंहारः क्रियते चेत् छात्राणां सम्यक् बोधः स्यादिति उपनिषत्पर्यालोचनेन अवगम्यते। शिक्षाशास्त्रिणां पाठयोजनायां पुनरावृत्तिसोपानम् इत्येतत् सोपानम् अत्र दृष्टान्तभूतं वर्तते।

** सहायकाचार्यः (अद्वैतवेदान्तविभागः) मुम्बादेवी आदर्शसंस्कृतमहाविद्यालयः, मुम्बई*

**2. अभ्यास: -**

"प्रकरणप्रतिपाद्यस्य वस्तुन: मध्ये पौन: पुन्येन प्रतिपादनम् अभ्यास:"। दुर्बोधवस्तुन: पुन: पुन: कथनं तु पुनरुक्तिदोषाय न भवति । अत: अधुनातनशिक्षणे दुर्बोधविषये अयमभ्यासक्रमः स्वीकर्तुं शक्यते। शिक्षाशास्त्रिणां पाठ्यक्रमेऽपि अभ्याससिद्धान्त: प्रसिद्ध एव । सुप्रसिद्ध: मनोवैज्ञानिक: "थार्नाण्डैक्" इत्याख्य: अभ्यासनियमं प्रस्तौति । अयं नियम: अधिगमनियमेषु आद्य:।

**3. अपूर्वता -**

अपूर्वता नाम – प्रकरणप्रतिपाद्यस्य अद्वितीयवस्तुन: प्रमाणान्तराविषयीकरणम्। पठनावसरे अध्यापकेन छात्रेभ्य अपूर्वविषय: यदा पाठ्यते, तदा छात्रा: विस्मिता: भूत्वा पाठ्यविषये श्रद्धां प्रयच्छन्ति । अत: अयं क्रम: अध्यापकेन अवश्यं स्वीकर्तव्यो वर्तते। एवं शिक्षक: छात्राणां जिज्ञासां जागरयन् पाठयेदिति, अयं सिद्धान्त: सूचयति।

**4. फलम् -**

प्रकरणप्रतिपाद्यस्य आत्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनं फलम् । प्रकृतशिक्षणेऽपि फलम् उक्त्वा पाठ्यविषये रुच्युत्पादयितुं शक्यते। अत: अयं पाठ्यक्रम: स्वीकारार्ह:। एवमेव छात्राध्यापका: पाठनात् पूर्वम्, पाठ्यवस्तुन: प्रस्तुतीकरणात् पूर्वं प्रत्येकमपि पाठ्यस्य सामान्योद्देश्यानि विशिष्टोद्देश्यानि कानीति उल्लिखन्ति। फलप्राप्तिरेव अर्थात् विशिष्टोद्देश्यप्राप्तिरेव, छात्राध्यापकस्य परमं लक्ष्यं भवति।

**5. अर्थवाद:-**

प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनम् अर्थवाद:। अयमपि एक: पाठने उपाय: भवितुं योग्य: वर्तते। अद्यतनशिक्षणे गुरुणा विवक्षितार्थस्य स्तुति: क्रियते चेत् अवश्यं छात्र: पाठ्यविषयस्य माहात्म्यम अवगत्याग्रे पाठ्यविषये श्रद्धालु: भविष्यति। यच्च शास्त्रे अर्थवाद इत्युच्यते, तदेव शिक्षाशास्त्रे अभिप्रेरणमित्युच्यते । शिक्षकोऽपि छात्रान् मध्ये मध्ये अभिप्रेरयेत् । अभिप्रेरणं धनात्मक-ऋणात्मकमिति द्वैविध्यं भजते । यथा शास्त्रे अर्थवाद: प्राशस्त्यनिन्दान्यतरपरक:।

**6. उपपत्ति:-**

प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्ति: उपपत्ति:। छात्राणां मनसि बोध: भवितुं युक्तय: अपेक्षन्त एव । अत: अयमपि उपायः इदानीन्तनशिक्षणे अवश्यं स्वीकारार्ह:। शास्त्रे यथा तथैव शिक्षणेऽपि प्रकरणप्रतिपाद्यार्थसाधने दृश्यश्रव्यसामग्रीणां प्रयोग: क्रियते। दृश्यश्रव्यसामग्री प्रयोगद्वारा अविज्ञातार्थ: विज्ञातो भवतीति तेषां राद्धान्त:।

एवञ्च शास्त्रेषु ये ये सिद्धान्ताः श्रूयन्ते, ते एव नामान्तरेण प्रकारान्तरेण च आधुनिकैः उदाह्रियन्ते। तत्त्वमसीतीदं वाक्यं पुरतो निधाय वेदान्तशास्त्रं प्रवर्तते । तद्वत् "छात्राणां सर्वाङ्गीणविकासः" इतीदं तत्त्वं केन्द्रीकृत्य शिक्षाशास्त्रं प्रवर्तते। एवं वेदोपनिषदामध्ययनेन आधुनिकाः अपि अनुपमानि शैक्षिकतत्त्वानि प्राप्तुं शक्नुवन्ति ।

**केचन भाषाशिक्षणशास्त्रशिक्षणयोः नवाचाराः –**

- संस्कृतभाषायाः विषये सामान्यजनानां विचारे चिन्तने वा परिवर्तनम् आनेतव्यम् ।
- भाषायाः विषये समाजे जागरणं कर्तव्यम् ।
- गृहे शाकादिषु वस्तुषु च संस्कृतनामफलकस्थापनम् ।
- श्रवणकौशलविकासाय संस्कृतवार्ताः, नाटकानि, गीतानि, प्रहेलिकाः,कथाश्च श्रावयेत् ।
- भाषणकौशलविकासाय दिनचर्यायाः कथनं, कथाकथनं, परस्परवार्तालापः, आन्तरिकभावाभिव्यक्तिः, घटनाश्रवणं, विविधदृश्यकथनं, चित्रविवरणं, लोकोक्तीनाम् अभ्यासं च कारयेत् ।
- भाषा लेखनेन विना अपूर्णा भवति । तस्मात् प्रतिदिनं पुटद्वयं पुटत्रयं वा लिखेत् ।
- तालपत्रविषये इदानींतन छात्रेषु रुचिरेव न दृश्यते । किन्तु विश्वविद्यालयानुदानायोगः यत्र पाण्डुलिपिविज्ञानम् अनुसन्धानाध्ययनक्रमं (Research methodology course) अनिवार्यमकरोत् । अस्मिन् विषये विश्वविद्यालयानुदानायोगस्य प्रयासः श्लाघनीयः । येन छात्रेषु अनुसन्धानपद्धतेः केषाञ्चन लिपीनां भाषाणाञ्च ज्ञानं समायाति ।
- अभिव्यक्तिकौशलविकासः शिक्षणस्य लक्ष्यं भवेत् ।
- पाठ्यक्रमपरिवर्तनम् ।
- शिक्षकस्य दृष्टिकोणपरिवर्तनम् ।

विशिष्य आधुनिकैः आविष्कृतानि उपकरणानि शास्त्रशिक्षणे नितरामुपकुर्वन्ति । तथैव राष्ट्रियसंस्कृतसंस्थानस्य क.जे.सोमैया मुम्बई परिसरस्य आचार्याणां विविधतन्त्रांशाः लोकोपकारकाः सन्ति । शास्त्रज्ञाः क्षणाभ्यन्तरे एव दूरवाण्या, गणकयन्त्रेण वा अपेक्षितानि सूत्राणि, अपेक्षितान् शब्दान् वा झटिति एव द्रष्टुं प्रभवन्ति । गणकयन्त्राणाम् अनुप्रयोगेण शास्त्रशिक्षणेऽपि नाविन्यं समायाति । ज्ञानेन सह चित्ताकर्षकाणि गणकजवनिकायां परिदृश्यमानानि चित्राणि छात्राणां चित्तेषु चिरं सन्तिष्ठन्ते ।

उत्तमं शिक्षणं दातुं संगणकज्ञानस्य नितराम् आवश्यकता अद्यत्वे अस्ति । शास्त्रशिक्षणभाषाशिक्षणयोः मध्ये आधुनिकोपकरणानाम् अनुप्रयोगः कर्तव्यः । यथा-

१. दृश्यश्रव्यादिमाध्यमेन अवबोधनार्थम्, ।

२.“उदाहरणात् सिद्धान्तं प्रति” इति शिक्षणसूत्रमवलम्ब्य बहूनाम् उदाहरणानां चित्रपट्टिकादिनिर्माणार्थम्।

३. प्रक्षेपकयन्त्रद्वारा न्यूनसमये अधिकं बोधयितुम् ।

४. अन्तर्जालमाध्यमेन विकीपीडिया, विकिसूक्तिः, विकिस्रोतः, e-Library इत्यादीनां सदुपयोगार्थम् ।

५. स्वाधिगमतन्त्राणां निर्माणार्थम् ।

६. स्वाध्यायसामग्रीनिर्माणार्थम् ।

७. नूतनशब्दकोशाणां निर्माणार्थम् ।

८. सूचनासम्प्रेषणप्रविधिशास्त्रस्य समावेशार्थम् ।

९. AAPS इत्यादीनां निर्माणार्थम् ।

परं तु अत्र काचित् समस्या अस्ति यत् शास्त्रज्ञानां गणकविद्यायां गतिर्नास्ति गणकविद्याविदां शास्त्रेषु रुचिर्नास्ति अङ्गुलिगणनीयाः एव उभयत्रापि परिश्रमं कुर्वन्तः सन्ति । अतः शास्त्रज्ञैः नवाचारेषु रुचिः सम्पादनीया । तथा शास्त्रेषु आधुनिकानां प्रवेशः कार्यः । अनयोः संगमेनैव भाषाशिक्षणसम्प्रत्ययः शीघ्रं सर्वत्र व्याप्तो भवति ।

## उपयुक्तग्रन्थानामावलिः


1. *दशोपनिषदः - सम्पादकः सं एस् सुब्रह्मण्य शास्त्री, चैखम्बा सुरभारती प्रकाशन, वारणसी, १९९६*
2. *मूल्यशिक्षा - सम्पादकः हरिदत्त बेहरा, चैखम्बा सुरभारती प्रकाशन, वारणसी, २००३*
3. *विकासोन्मोख भारतीय समाज में शिक्षक और शिक्षा – लेखकः प्रो एस् पि रुहेला, चैखम्बा बुक सीरीज, वारणसी, २००८*
4. *आधुनिकशिक्षामनोविज्ञानम् – प्रो. लोकमान्यमिश्रः,मृगाक्षरिपब्लिकेशन् लक्नो २०११*
5. *भाषा विज्ञान –डा. कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन वाराणसी।*
6. *संस्कृत साहित्य का इतिहास – वाचस्पति गैरोला, चौखम्बा विद्या भवन वाराणसी ।*

# भाषाशिक्षणे मूल्याङ्कनस्य नूतनविधयः

✍ डॉ. मनमोहन तिवारी *

आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः ।
सरस्वती सारस्वतेभिरर्वाक्तिस्रो देवीर्बर्हिरेदं सदन्तु ॥ (ऋ. 3:57)

कस्यचिद् ज्ञानस्योपलब्धेः साधनं भाषा भवति । विश्वस्य सर्वप्राचीनरचना ऋग्वेदोऽस्ति । समस्तं वाङ्मयं कस्यांश्चित् भाषायामेव निबद्धमवलोक्यते । वेदाः भारतीयसंस्कृतेः आधारभूताः सन्ति । तथा समस्तमानवानां सदुपयोगिनः एते वर्तन्ते । शिक्षणपरम्परायाः उद्गमस्रोतः वेदेषु एव प्राप्यते । यथा –

"अहं राष्ट्री संङ्गमनी वसूनां" (ऋ. १०.१२५.३) । इति ॥

वैदिककाले शिक्षणप्रणाली उच्चस्थानं प्राप्य संस्थिता आसीत् । मनुः,कश्यपः,वसिष्ठः,विश्वामित्रः, अगस्त्यः,बृहस्पतिः,शुक्रः,भारद्वाजः,कण्वप्रभृतयः उत्कृष्टाः आचार्याः आसन् । उत्तरवैदिककाले एतेषाम् आश्रमाः, गुरुकुलम्, आचार्यकुलमिति संज्ञां धारयामासुः । अस्मिन् समये महीदासः,ऐतरेयः,पिप्पलादः, श्वेताश्वतरः,कुषीतकः, प्रभृतयः मनीषिणः गुरुकुलानि चिन्तनस्य मननस्य शोधस्य उच्चसंस्थानमिति संस्थापयामासुः । कालान्तरं भगवान् वेदव्यासः पुराणानि, दर्शनानि महाभारतञ्च विरच्य ज्ञानस्य विस्तारं चक्रे । "अर्यः देवः अचितः अचेतयत्" (ऋ.६१५)।

बृहत्तरभारते संस्कृतभाषाशिक्षणस्य अतीतम् अतीवसमृद्धमासीत् । तक्षशिला –विक्रमशिला-नालन्दा प्रभृतीनि संस्थानानि संस्थापितानि जातानि । तत्रैव अपरतः काशी-श्रावस्ती-अवन्ती-पाटलिपुत्र-प्रभृतिषु नगरीषु प्रवर्तमानाः परम्पराः अपि शिक्षणक्षेत्रे स्वयोगदानं ददतिस्म । वैदिकशिक्षायाः प्रमुखोद्देश्यम् आध्यात्मिकः विकास एव आसीत् । डा. ए.एस्. अल्तेकरः अलिखत् यत् –ईश्वरभक्तिः, धार्मिकभावना, चरित्रनिर्माणं, व्यक्तित्वविकासः, सामाजिकमूल्याङ्कनं, राष्ट्रियसंस्कृतेः प्रसारः संरक्षणानि च भारतीयशिक्षायाः प्रमुखानि उद्देश्यानि आसन् । शैक्षणिकविषयेषु पराविद्यायाः पुराण-दर्शन –वेद –वेदाङ्ग प्रभृतीनां विषयाणां ध्यानमदीयत । यथोक्तम् - इदं ब्रह्म भारतं जनं रक्षति (ऋ.३-४९७) ।

शिक्षणपद्धतिषु –शास्त्रार्थः-वादविवादः-प्रवचनं –व्याख्या शंङ्कासमाधानं- प्रश्नोत्तरञ्च प्रामुख्येन पद्धतयः आसन् । प्राचीनगुरुकुलेषु परीक्षाविहीना प्रणाली आसीत् । छात्राणां मूल्याङ्कनमाकलनविधिना क्रियतेस्म ।आश्रमेषु परिक्षायाः प्रावधानं न आसीत् । तस्मिन् समये कण्ठस्थीकरणोपरि ध्यानं दीयते स्म । तदानींतनः शिक्षणविधिः व्यक्गितविविधतामाश्रयते स्म । शिक्षणस्य च माध्यमः संस्कृतभाषा आसीत् । संस्कृतादेव नैकाः भाषाः उदभूवन् । माधुर्यादिगुणः अलङ्काराश्च कस्याश्चितभाषायाः अनिवार्यतत्त्वानि भवन्ति । विश्वस्य इतिहासे भारतीयशास्त्राणाम् आलोचनात्मकपरम्परायाः उत्कृष्टं स्थानं वर्तते । अनया

* *सहायकाचार्यः (साहित्यविभागः) मुम्बादेवी आदर्शसंस्कृतमहाविद्यालयः, मुम्बई*

परम्परया समृद्धज्ञानराशेः आविर्भावः अभवत् । अतः सुव्यवस्थितं शिक्षणं कस्यचित् राष्ट्रस्य समाजस्य अनिवार्यावश्यकता अस्ति । शिक्षा मानवजातेः विकासे साहाय्यं करोति । प्रभावशालिशिक्षणसंरचनाय सततं मूल्याङ्कनम् आवश्यकं भवति । कस्मिंश्चित् विषये मूल्यस्य प्राप्तिः अनया शिक्षणप्रकियया साध्यं भवति । मूल्याङ्कनद्वारा बालकानां दुर्बलतायाः शोभनतायाश्च लब्धिः ज्ञायते । छात्राणां शैक्षणिकोपलब्धौ मूल्याङ्कनं सहायकं भवति । अधिगमप्रक्रियायामपि इदमावश्यकं भवति । नवीनोद्देश्यानां प्राप्तौ मूल्याङ्कनस्य अतीव सहायता सिध्यति । छात्राणां क्षमताप्रदर्शने शिक्षणप्रक्रियाञ्च सफलीकर्तुं शैक्षिकमार्गदर्शनं व्यावसायिकलक्ष्यञ्च प्रापयितुमिदमावश्यकं भवति । अध्यापने पाठ्यक्रमसंवर्धनाय अध्यापकान् छात्रांश्च शिक्षयितुं साहाय्यं सम्पादयति । शिक्षितज्ञानस्य स्तरं बोधयति । आकलनस्य मूल्याङ्कनस्य च उद्देश्यं छात्राणामभिव्यक्तिक्षमता-अनुभूति-उच्चारणप्रभृतिनां मापनं विदधाति । आकलनमेका लघ्वी प्रक्रिया वर्तते । मूल्याङ्कनञ्च व्यापकस्तरीयं क्रियमाणं परीक्षणम् उच्यते ।

सि.सि.रोशम् महोदयस्य मतानुसारं मूल्याङ्कनस्य प्रयोगः बालकानां व्यक्तित्व-परीक्षणार्थं सकलासु स्थितिषु क्रियते । परीक्षणेन बालकानां व्यवहारस्य ज्ञानं भवति । यत् बालकैः कियदुद्देश्यप्राप्तिः अधिगता, तथा छात्राणां गुणात्मक-परिणामात्मकव्यवहारयोः अध्ययनं क्रियते । मूल्याङ्कनस्य प्रकारः –

1. निदानात्मकं मूल्याङ्कनम् ।
2. उपचारात्मकं मूल्याङ्कनम् ।

तत्र निदानात्मके परीक्षणे विविधाभिः परीक्षाभिः विद्यालये प्राप्तिःभवति यत् असफलछात्राः कियन्तः सन्ति । तत्र मौखिकविधिना, खेलद्वारा,लिखितपरीक्षया च अन्वेष्टुं शक्यते यत् छात्राः कियत् अधिगतवन्तः, कियती च तेषां ग्राह्या इति ।

उपचारात्मके परीक्षणे तु विद्यार्थिभिः क्रियमाणानां त्रुटीनां शोधनेन अध्यापकैः क्रियमाणं परीक्षणं यथा भाषायां व्याकरणस्य बोधः, उच्चारणज्ञानम्, अभ्यासः,पर्यायशब्दानां परिचयः, कवितापाठस्य स्वरः, वाक्योच्चारणस्य ग्राह्यता, क्षमतापरिचयः भवति । शिक्षणप्रक्रियां प्रभावयुक्तां रोचकतापूर्णां च रचयितुम् अस्योपयोगः साधनीयः स्यात् । अनेन विद्यालये शिक्षणविधायाम् अनुसन्धातुं शक्यते । प्राप्तसूचनाभिः सह छात्राणां तार्किकक्षमतायाः विकासः अपि आवश्यकं भवति ।

**मूल्याङ्कनस्य प्रभावयुक्ताः विधयः –**

- निष्पत्तिपरीक्षणम् ।
- बुद्धिपरीक्षणम् ।
- तर्कशक्तिपरीक्षणम् ।
- अप्रभाविकृताः विधयः –
- आत्मकथा,रिक्तस्थानपूर्तिः,शब्दपर्यायबोधः,सञ्चयलेखः,साक्षात्कारः,व्यक्तित्वपरकमध्ययनम् ।

**वर्तमानमूल्याङ्कनपद्धतिः-**

लिखितपरीक्षा एवं मौखिकपरीक्षा एव मूल्याङ्कनस्य प्रचलिते पद्धती वर्तेते । अत्र भाषायां ध्यानम् अल्पं भवति । स्मृतौ अधिकम् । इह संशोधनमावश्यकमस्ति यत् प्रश्नपत्रं पठितेषु पुस्तकेषु स्यात् । सूचनानाम्,उद्देश्यानाम्,अधिगमानां,ज्ञाततायाः अन्वेषणं,बौद्धिकतत्परता,विचारशक्तिः, शिक्षितुं प्रवृत्तिः, अभिरुचिः इति विषयाः अपि सम्मेलनीयाः सन्ति ।

**मूल्याङ्कनक्रमः** –

मौखिकपरीक्षणम् औपचारिकरूपेण अनौपचारिकरूपेण क्रियते । यथा – प्रश्नोत्तरविधिः, कथाविधिः, नाट्यप्रस्तुतिः, अभिनेयता, काव्यवाचनमिति । इह विद्यार्थी उक्त्वा पठिष्यति तर्हि स्वयं श्रोष्यति पुरस्तात् स्थितः छात्रोऽपि अवगच्छति । अत्र उच्चारणं तथा स्थगनं सम्प्रेषणाय महत्त्वपूर्णं भवति । ध्यातव्यमत्र यत् दृष्टस्य श्रुतस्य विषयस्य कथं प्रस्तुतिः क्रियते, वर्णनक्षमता,अथवा अभिव्यक्तिः कीदृशी अस्ति प्रायः दृश्यते यत् छात्राः विभिन्नविषयाणामुपरि चर्चां कुर्वन्ति, तत्र कानि कौशलानि विकसितानि सन्ति । तेषु शिक्षकाणां ध्यानं तत्र स्थातव्यं स्यात् । केवलं प्रश्नानाम् उत्तराणाम् अन्वेषणमात्रं वा परीक्षा न भवति । अत्र कतिपयबिन्दवः क्रमेऽस्मिन् प्रस्तूयन्ते।

- श्रुतलेखः- श्रवणं कृत्वा लेखनक्षमताविकासः ।
- लेखनं – लेखनक्षमताविकासः ।
- रिक्तस्थानपूर्तिः – अन्वितेः ज्ञानम्।
- व्याकरणम् – संरचना तत्त्वोपरि ध्यानं स्थितं भवति ।
- शब्दभण्डारः – पर्यायशब्दानां तथा क्रिया –कारक-अव्ययानां बोधः ।
- समासबोधः – समासस्य विग्रहस्य सन्धेः विच्छेदस्य ज्ञानमावश्यकं भवति ।
- कथायाः पुनर्लेखनं – श्रुतकथायाः, छात्रैः लेखनं कारणीयम् ।
- अनुवादकौशलं निबन्धलेखनञ्च – वाक्यानां तत्त्वानि अवगत्य निबन्धस्य पृथक्-पृथक् भागानां बोधं कृत्वा अग्रे प्रवर्धनम् ।
- विश्लेषणं संश्लेषणञ्च – अनेन छात्राः स्वयमेव प्रश्नान् संरचयेयुः, उत्तराणि च विचारयेयुः ।
- अभिनय-प्रस्तुतिः – अस्मिन् क्रमे नाटकस्य विभिन्नभागानां संरचना –संवाद –शैली-पात्र-प्रस्तुति-प्रभृतीनां तत्त्वानां ज्ञानं भवति । काव्यबोधोऽपि जायते ।
- साहित्यिकावबोधः – भाषामूल्याङ्कने उक्ततत्त्वानां बोधः प्रासङ्गिको भवति । यथा –
- गद्यसाहित्यस्य परिचयः, विकासः, परम्परा च ।
- काव्यसंरचना परिचयः ।
- नाटकस्य प्रमुखभागानामध्ययनम् ।

- कथालेखनम् ।
- उपन्यासपरम्परापरिचयः ।
- वृत्तसाहित्यस्य ज्ञानम् (छन्दः,कोषः,कला च ।
- आलङ्कारिकतत्त्वानां परिचयः (रसः,अलङ्कारः,रीतिः,वृत्तिः,गुणः,ध्वनिः,वक्रोक्तिश्च) ।
- अतः परिचर्चा, सङ्गोष्ठी, स्पर्धा, संवादः, सभा, शास्त्रार्थः, अभिनयः, लेखनं, चित्राणि च इति एतेषां विधीनामपि मूल्याङ्कने समावेशं कर्तुं वयं शक्नुमः ।

**सन्दर्भग्रन्थाः-**


1. *भारतीय शिक्षा के सिद्धान्त – डा. एस्.एस्.माथुर्, विश्वविद्यालयप्रकाशन वाराणसी ।*
2. *भारतीय शिक्षा दर्शन – रामशकल पाण्डेय, शारदा पुस्तक भवन युनवर्सिटी रोड इलाहाबाद ।*
3. *अधिगम एवं मूल्याङ्कन ।*
4. *प्राचीन भारत के शिक्षा मनीषी – रामशकल पाण्डेय, शारदा पुस्तक भवन युनवर्सिटी रोड इलाहाबाद ।*
5. *संस्कृत शिक्षण समीक्षण- डा. इन्दिराचरण पाण्डेय, सम्पूर्णानन्द विश्वविद्यालय वाराणसी ।*
6. *भाषा विज्ञान –डा. कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन वाराणसी।*
7. *संस्कृत साहित्य का इतिहास – वाचस्पति गैरोला, चौखम्बा विद्या भवन वाराणसी ।*

# भाषाशिक्षणे सूक्ष्मशिक्षणम्

**✍ डॉ. माधवदत्तपाण्डेयः ***

पाणिनीयव्याकरणमाधारीकृत्य भाषाशिक्षणे सूक्ष्मशिक्षणविवेचनमिति मम शोधपत्रस्य विशेषाशयः। भाषावैज्ञानिकं भाषाविषयकं वा विमर्शनिदानमिति भाषातत्वजिज्ञासुभिरवश्यमन्वेषणीयं भवति। भाषाविषयकाध्ययनप्रवृत्तिर्मुख्यतो भाषाणां परस्परं कञ्चन साम्यविशिष्टभेदमवलम्ब्यैव जाता । भाषाभेदे च सन्ति बहूनि अशक्त्यशिक्षादीनि च कारणानि तानि पत्रेऽस्मिन्नुपस्थापितानि। वैदिकवाङ्मयेपि भाषाभेदः दृश्यते ,स च यद्यपि विशुद्धभाषायां दोषप्रसक्तिरूपः पुनरपि ततो भेदबुद्धिस्तु जायते । तथा हि ऋग्वेदे --

इमे ये नार्वाङ् न परश्चरन्ति न ब्राह्मणासो नसुतेकरासः । ३२-२
त एते वाचमभिपद्य पापया सिरीस्तन्त्रं तन्वते अप्रजज्ञये ।। (ऋ.वे. अ.2 , सू. 32)

तत्राशिक्षा कारणम्।

साम्प्रतमपि शिक्षिताः साधूच्चारयन्ति । यत्र विज्ञा" विद्वान्" इति वदन्ति तत्राविज्ञा"विदमान्" इति। एवम् "आत्मा" "परमात्मा" इत्यनयोः शब्दयोरुच्चारणम् "अतमा""परमतमा" इत्यनयोः क्रमशः कृषकैः क्रियते । प्रायःएवं भूतेषु शब्देषु नोच्चारणलाघवम् , नाप्यलस्यम्,न च "ऋतक" शब्दस्थाने "लृतक" शब्दवदशक्तिः कारणम् , अपितु शिक्षाभावः कारणम् ।अतः भाषाभेदे अशिक्षायाः प्रमुखस्थानम् ।

तत्र तावत् शिक्षायां वर्णस्वरमात्रादीनामुत्पत्तिसंख्यादिविवेचनं विज्ञानपूर्णं प्रतिभाति । अत्रेदमवधेयम् -- यद् भाषायाः ध्वनिः,पदम्,वाक्यम्,अर्थ इति चत्वारि स्वाङ्गानि सन्ति । तत्र ध्वनिविमर्शः ध्वनिविज्ञानम् वा शिक्षाग्रन्थेषु तदनु प्रातिशख्येषु समुपलभ्यते । वर्णोत्पत्तिमधिकृत्य बहवो विचाराः संस्कृते सम्पन्नाः, तत्र कथं ध्वनिः वर्णरूपं भजते , कानि तेषामभिव्यञ्जकस्थानानि, कियती च तत्संख्या , वर्गीकरणं च वर्णानां कथमित्यनेकविधं तद्विवेचनं शिक्षादिग्रन्थेषु विकीर्णं दरीदृश्यते ।

एतद् समीक्ष्य समुपस्थाप्यते पूर्वनिर्धारितोयं विषयः भाषाशिक्षणे सूक्ष्मशिक्षणम् । अत्रोदेति प्रश्नः किन्नाम सूक्ष्मशिक्षणम् ? विषयेऽस्मिन् प्रो. मदनमोहनझावर्यैः एका पुस्तिका उपस्थापिता वर्तते"सूक्ष्मशिक्षणम्" तत्र प्रतिपादितम् यत् –'सूक्ष्मशिक्षणे प्रशिशिक्षुः अध्यापकेभ्यः रचनाकौशलप्राप्तये युक्तिविधिकौशलेषुच दक्षता सम्पादनाय सुरक्षितपरिस्थितिःप्रदीयते । लघुस्तरेषु सम्पादिता शिक्षण अन्तक्रिया एव भवति सूक्ष्मशिक्षणम् , यत्र अभ्यासकर्ता कस्यचिद्विषयस्य लघु-अंशं (5-6 छात्राः) लघुसमये (5-10 निमेषे) एकस्मिन् समये एकस्य शिक्षणकौशलस्य विकासाय आयोजयति , तदेव शिक्षणं भवति शूक्ष्मशिक्षणम् । अर्थात् लघुरुपायितं शिक्षणमेव भवति सूक्ष्मशिक्षणम् । शिक्षणेऽस्मिन् एकस्मिन् समये मात्र कौशलस्यैकस्य एव अभ्यासो भवति " । अनेकैः प्राच्य-पाश्चात्यविद्वद्भिः विषयेऽस्मिन् मतं

** संविदाध्यापकः (व्याकरणम्), राष्ट्रियसंस्कृतसंस्थानम्, (मा.वि), मुम्बई परिसरः।*

प्रतिपादितवन्तः परमत्र 'शिक्षाविश्वकोशस्यानुसारेण कृतं विशिष्टं चिन्तनं मया उपस्थाप्यते ---

" सूक्ष्मशिक्षणं वास्तविकं निर्मितं अध्यापनसंग्रामस्य च न्यूनीकृतं परिमानमस्ति यत्-शिक्षकप्रशिक्षणे कार्यक्रमविकासने अनुसन्धाने च प्रयुक्तं भवति ।" सूक्ष्मशिक्षणेऽस्मिन् प्रायोगिकदृष्ट्या प्रायः षट्सोपानानि भवन्ति । यथा –

1. पाठयोजनम्
2. पाठशिक्षणम्
3. प्रतिपुष्टिः
4. पुनर्पाठयोजनम्
5. पुनर्पाठशिक्षणम्
6. पुनर्प्रतिपुष्टिः

प्रशिक्षणशिक्षणाभ्यासस्य विभिन्नेष्वपि कौशलेषु दक्षता स्यात् । तद्यथा –

1. पाठोद्देश्यनिर्माणम्
2. योजनानिर्माणम्
3. अभिप्रेरणम्
4. पूर्वज्ञानपरीक्षणम्
5. प्रस्तुतिकरणम्
6. प्रश्नोत्तरम्
7. निदर्शनम्
8. श्यामफलकोपयोगः
9. व्याख्यानम्
10. श्यामफलकोपयोगः

उपरोक्तेषु एषु प्रशिक्षणकौशलेषु कौशलमेव सम्यक् प्रशिक्षणम् भवति । विषयेऽस्मिन् प्राच्य-प्रतीच्यविद्वद्भिः सम्मतम् इतोऽप्यधिकं शिक्षणकौशलानि प्रस्तूयते —

(1 ) व्यवहारमूलकशिक्षणोद्देश्यानां निर्माणम्
(2) विषयवस्तुविष्लेषणम्
(3) पाठयोनानिर्माणम्
(4) व्यवहारपरिक्षणम्

(5) विन्यासप्रेरणम्

(6) पूर्वज्ञानस्य समायोजनम्

(7) प्रस्तुतिकरणम्

(8) प्रश्नसंरचना

(9) प्रश्ननिर्माणम्

(10) प्रश्नप्रस्तुतिकरणम्

(11) छत्रानुक्रियाणां व्यवस्थापनम्

(12) व्याख्यानम्

(13) उदाहरणादीनामुपयोगः

(14) सहायकसामग्रीणामुपयोगः

(15) पाठस्य नियोजनावृत्तिः

(16) अशाब्दिकसंकेतः

(17) प्रतिकृयायाः अभिव्यक्तिः

(18) प्रतिक्रियाग्रहणम्

(19) उद्दीपकचयनम्

(20) पाठगतिनियमनम्

(21) छात्रान्तर्भाविताभिवर्धनम्

(22) श्यामफलकोपयोगः

(23) पाठसमापनम्

(24) काठिन्यनिवारणम्

(25) प्रदत्तकार्यनिरूपणम्

(26) छात्रप्रगतेः मूल्याङ्कनम् ==

(27) प्रत्यस्मरणमाध्यमेन चिन्तनमित्यादयः

अत्र भाषाशिक्षणे सूक्ष्मशिक्षणस्य चिन्तनप्रसङ्गे ----

" शक्तिग्रहं व्याकरणोपमानकोशाऽऽप्तवाक्याद् व्यहारश्च ।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः। । " इति। (न्यायसिद्धान्तमुक्तावली)

तत्र अवश्यमेवायं स्मर्तव्यं, शब्दशास्त्रविचक्षणैः भाषाशिक्षणे सूक्ष्मशिक्षणविवेचनम् ---

- व्याकरणम् = शब्दशास्त्रमपेक्षितम्
- उपमानम् = सादृश्यज्ञानात्मकप्रमाणमपेक्षितम्
- कोशाः = अमरकोशनिघण्टवादिः अपेक्षते।
- आप्तवाक्यम् =प्रयोगहेतुभूतयथार्थज्ञानवत्पुरुषोचिच्चरितवाक्यं प्रमाणम्।
- व्यवहारः = शब्दप्रयोगः प्रयोज्यवृद्धमुद्दीश्य उत्तमवृद्धादिकृतो गामानयेत्यादिरूपः, चेष्टाद्यात्मकः प्रवृत्तिरावश्यकम्।
- वाक्यस्य शेषः = प्रकृतवाक्यातिरिक्ते वाक्ये प्रकृतवाक्यार्थबोधोपयोगी पदकदम्बोऽर्थवादाद्यात्मकः।
- विवृतिः विवरणम् = पर्यायादिकम् , भाषाशिक्षणे पर्यायवाचिशब्दानां महदावश्यकता वर्तते।
- सिद्धपदस्य सान्निध्यम् = प्रसिद्धशब्दस्य सन्निद्धिः एतानि अष्टौ शक्तिज्ञानस्य प्रयोजकानि भाषाशिक्षणे सूक्ष्मशिक्षणत्वेन उपयोगीनि सन्तीति शिवम्।

**उपसंहारः—**

शाब्दबोधे शक्तिज्ञानमपेक्षितम्। शक्तिज्ञानस्य बोधकतत्वानि पूर्वोक्तानि सन्ति। एतानि लघुरूपाणि सूक्ष्माणि पुनरपि एतेषां ज्ञानेन भाषाबोधः सुकरायते।

**अनुशीलितग्रन्थाः**

1. *संस्कृतशिक्षकप्रशिक्षणेसूक्ष्मशिक्षणम्- प्रो. वी. मुरलीधरशर्मा, कलाञ्जलिः ग्राफिक्स हैदराबाद*
2. *वाक्यपदीयम् ,पण्डित चारुदेवशास्त्री,मोतीलालबनारसीदास, १९९६,दिल्ली*
3. *अष्टाध्यायी ,सम्पादकः ब्रह्मदत्त जिज्ञासु,रामलाल कपूर ट्रस्ट रेवली , १९९८,हरियाणा*
4. *काशिका, सम्पादकः आचार्यविजयपालविद्यावारिधि ,रामलाल कपूर ट्रस्ट रेवली , १९९७,हरियाणा*
5. *पाणिनीयव्याकरणमहाभाष्यम्, भार्गव शास्त्री,चौखम्बा संस्कृत प्रतिष्ठान , १९८७, दिल्ली*
6. *पाणिनिकालीन भारतवर्ष ,वासुदेवशरण अग्रवाल चौखम्बा विद्याभवन १९९६, वाराणसी*
7. *शिक्षा में नवाचार और नवीन प्रवृत्तीयां,भाई योगेन्द्रजीत ,विनोद पुस्तक मन्दिर २००६,आगरा*
8. *न्यायसिद्धान्तमुक्तावली, चौखम्बा संस्कृत प्रतिष्टान, वाराणसी*
9. *सूक्ष्मशिक्षणम्, मदनमोहनझा, श्रुतिप्रकाशनम्, जगन्नाथपुरी*

शिक्षारश्मिः 2018, ISSN : 2395 - 7921

# भाषाशिक्षणे संगणकयन्त्रम्

✍ अलोकमण्डलः *

**प्रस्तावना —**

परिवर्तनशीलप्रपञ्चेऽस्मिन् कस्यापि देशस्य उन्नतिः तस्य देशस्य शिक्षायाः गुणवत्तायाः रीतेश्च उपरि भवति । भारतीयशिक्षाव्यवस्थायां वैदिकयुगस्य गुरूकुलशिक्षाव्यवस्था शिक्षायाः विभिन्नस्तरमाध्यमेन समृद्धा जाता । एतस्याः शिक्षाव्यवस्थायाः इतिहासे उन्नतिः अवनतिश्च द्रष्टुं शक्यते। तथापि स्पष्टं यत् सर्वदा सत्यान्वेषणे, शिक्षायाः उत्कर्षसाधनानामन्वेषणे शिक्षायाः महत्वं वर्तते। पारम्परिकशिक्षाव्यवस्थानुसारं पूर्वं शिक्षकः पाठयति स्म । छात्राः केवलं श्रुत्वा ज्ञानार्जनं कुर्वन्ति स्म । अनेन छात्रेषु विषयावगमनं शीघ्रं न भवति स्म । पारम्परिकविधीन् आश्रित्य एतावत्पर्यन्तं शिक्षकाः पाठितवन्तः। (पारम्परिकविधयः इत्युक्ते व्याख्याविधिः, व्याकरणविधिः, आगमन-निगमनविधिः) । इदानीं भवति संगणकयुगः (Age of Computer) । पूर्वं तादृशं सौकर्यं नासीत्। पूर्वं यादृशी स्थितिः आसीत् इदानीं तथा नास्ति । संगणकयुगेऽस्मिन् परिवर्तनं जायमानं वर्तते। इदानीं किमपि आवश्यकं चेत् वयं संगणकस्य साहाय्यं स्वीकुर्मः । संगणकद्वारा शिक्षकः पाठयति चेत् छात्राः अधिकां रुचिं प्रदर्शयन्ति यथा - चित्रं, कथा , चित्रचालकम् (Animation) । अतः कालानुगुणं परिवर्तनं जातमस्ति।

**भाषा (Language) -**

भाष्यते अनया इति भाषा। परस्परभावविनिमयाय उपयुक्तं साधनं भवति भाषा। आङ्ग्लभाषायां भाषावाचकं "Language" इति पदम् Lingua इति शब्दादुद्भूतम्। "सीट् वरियस् "अनुसारं ध्वनिभिः मानवीय विचाराणां बौद्धिकाभिव्यक्तिरेव भाषा । संस्कृतव्याकरणानुसारेण भाषा शब्दो "भाष् व्यक्तायां वाचि" इत्यस्माद्धातोः "गुरोश्च हलः" इति 'अ' प्रत्यये स्त्रियां टापि सति निष्पद्यते। ध्वनिरूपमेव भाषायाः वास्तविकं रूपम्। लिखितरूपं तु ध्वनीनां कल्पितचिह्नैः लिपिरूपेण प्रकटीकरणम्। प्रयोगाधारिता भाषा शिक्षायाः आधारभूता भवति। तस्याध्ययनं सर्वेषां कृते अपेक्षितम्। प्रयोगबहुलात् मातृभाषा अनौपचारिकरूपेण सर्वे पठन्ति। किन्तु इतरभाषा पठने पाठने च समस्याः दृश्यन्ते। यथा- उच्चारणे लेखने पठने विषयावबोधे अभिव्यक्तौ स्मरणे च।

**शिक्षणम् (Teaching) –**

प्राचीनकालादारभ्य अद्यावधि मानवसभ्यतायाः विकासाय समये समये शिक्षायामपेक्षितं परिवर्तनमानेतुं सततं प्रयतमानो दृश्यते। शैक्षिकविकासः मानवसभ्यतायाःविकासस्य प्रमुखं कारकं भवति। अतः मानवप्रगतेः मानदण्डः शिक्षा इति कथ्यते। इदानीं शिक्षाक्षेत्रे अपेक्षितरीत्या प्रगतिः नैव दृश्यते। यतो

* *शोधछात्रः, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः।*

हि तत्र बहुविधाः समस्याः अवलोक्यन्ते। अतः तासां समस्यानां परिहारोपायान्वेषणाय शिक्षणे गुणवत्तामानेतुञ्च शिक्षाविद्भिः निरन्तरम् अनुसन्धानं क्रियते।

**भाषाशिक्षणम्-**

शिक्षाक्षेत्रे विभिन्नाः विषयाः अन्तर्भवन्ति। यथा वैज्ञानिकांशाः, साहित्यकविषयाः, इतिहासादिविषयाः। किन्तु एतेषां सर्वेषां शिक्षणार्थं माध्यमरूपेण काचित् भाषा अपेक्षते। यतो हि यस्य कस्यापि विषयस्य सम्प्रेषणार्थं कश्चित् माध्यमः भाषारूपेण अपेक्षते एव । मानवः आबाल्यात् मरणपर्यन्तं भाषयैव व्यवहरति। तदर्थं निर्दुष्टा भाषा प्रयोक्तव्या। अतः शिक्षाक्षेत्रे भाषायाः भाषाशिक्षणस्य च महत् प्राधान्यं वर्तते। अनेन भाषामाध्यमेनैव शिक्षायाः विभिन्नाङ्गानां शिक्षणं क्रियते इति भाषाशिक्षणस्य महदिदं प्राधान्यं वर्तते। आधुनिकभारते भाषाशिक्षणे एते अंशाः अन्तर्भवन्ति। 1.मातृभाषा 2.राष्ट्रभाषा 3.प्रादेशिकभाषा 4.आधुनिकभाषा 5.सांस्कृतिकभाषा चेति।

**सङ्गणकम् (Computer)**

सङ्गणकम् एकं विद्युत् सञ्चालितयन्त्रं भवति यः स्वीयमस्तिष्कमुपयुज्य सर्वविधकार्यं सम्पादयितुं समर्थः। यन्त्रमेतद् तीव्रगत्या प्रदत्तांशान् विश्लिष्य शुद्धपरिणामं प्रयच्छति। आङ्ग्लभाषायां यन्त्रमिदं computer इति प्रख्यातम्।शब्दोऽयम् compute इति लेटिन् शब्दात् स्वीकृतः यस्यार्थः भवति गणना। अतः गणना प्रविधिरेव गणनयुक्तिः (calculating device). अत्र अस्माकमुपकाराय शिक्षापद्धतौ सङ्गणकस्य दृश्यश्रव्योपकरणेषु अन्वयो भवति।

**सङ्गणकस्यावश्यकता (Use of Computer)**

सम्प्रति समाजस्य निर्माणे विज्ञानस्य प्रविधेश्च महत्त्वपूर्णभूमिका वर्तते। अनयोः प्रभावेण अद्यतनमानवानां दृष्टिकोणः वैज्ञानिकः सञ्जातोऽस्ति। सामाजिकजीवनेऽपि प्रतिक्षेत्रं सार्थक्यं प्राप्तुं विज्ञानस्य प्रविधेश्च सिद्धान्तान् परिणामांश्च विनियोक्तुं मानवाः प्रयत्नशीलाः वर्तन्ते। आधुनिककालेऽस्मिन् यान्त्रिकीकरणस्य प्रभावः अवलोक्यते। छात्रेषु उत्तमतया शिक्षणाधिगमपरिस्थितिम् उत्पाद्य ज्ञानस्य सञ्चारार्थं सङ्गणकं महत्त्वपूर्णं साधनम् इति मन्यते। अद्य शिक्षाक्षेत्रे सङ्गणकं प्राविधिकीं सामाजिकीं च क्रान्तिमुत्पादयत् वर्तते।

सङ्गणकयन्त्रं न केवलं भाषाशिक्षणम् अपितु व्याकरणशिक्षणार्थमुपयुज्यते तर्हि व्याकरणशिक्षणम् अत्यल्पसमये सरलतया प्रभावपूर्णतया प्रदातुं शक्यते। यदि सङ्गणकयन्त्रे एकवारम् अभिक्रमणं क्रियते चेत् इच्छानुसारं प्रतिद्रष्टुं शक्यते। अतः छात्राः पाठनानन्तरमध्यापकस्याभावे अपि अवसरप्राप्ते सति स्वयं पुनर्बलनं प्राप्तुं शक्नुवन्ति । छात्रः वैयक्तिकशक्त्यनुगुणं ज्ञातुं शक्यते। अतः सङ्गणकयन्त्रं व्याकरणशिक्षणे यदि उपयुज्यते तर्हि व्याकरणसम्बन्धविषयाः सरलतया रुचिपूर्णतया पाठयितुं शक्नोति।

**सङ्गणकस्य अनुप्रयोगः (Application of Computer)**

अद्य सङ्गणकयन्त्रेण विना वैज्ञानिकलोकः अन्धः इव प्रतीयते। मनुष्येण कर्तुमशक्यानि अनेकानि कार्याणि अनेन सुखेन सम्पाद्यन्ते। कष्टसाध्यानि अपि गणनकार्याणि एतत् अत्यन्तं सुखेन निष्कृष्टतया अतिवेगेन च करोति। असंख्यानां विषयाणां संग्रहणं कृत्वा,तान् अपरिमितकालपर्यन्तं स्वोदरे रक्षितुमपि समर्थं तद्यन्त्रम्। सङ्गणकयन्त्रम् अनलसं निष्कृष्टम् अविरतं च कर्म करोति। अत्र केचन बिन्दवः सङ्गणकस्योपयोगविषये भवितुमर्हन्ति -

- सङ्गणकं योग्यतायाः आधारेण छात्राणां वर्गीकरणं करोति।
- सङ्गणकं छात्राणां कृते यथार्थसमयसारिणीं निर्मातुमर्हति।
- शिक्षार्थिनां शिक्षणं क्रमबद्धरूपेण व्यवस्थापयति।
- शिक्षणदृष्ट्या सङ्गणकं शिक्षणसामग्रीं विभाजयति।
- शिक्षणसंस्थासु प्रवेशपरीक्षापरिणामानां तत्सम्बद्धप्राप्ताङ्कानां विश्लेषणार्थम् एतस्य साहाय्यं स्वीकर्तुं शक्यते।
- शिक्षणस्तरस्य मूल्याङ्कनं कृत्वा तत्परिष्कर्तुं समीकर्तुं च सङ्गणकसाहाय्यं स्वीकर्तुं शक्यते।
- विभिन्नशिक्षासंस्थानां परस्परं तुलनां विधाय,तासां प्रगतिविषये ताभ्यः परामर्शदानार्थमपि सङ्गणकस्य साहाय्यं स्वीकर्तुं शक्यते।
- एतस्योपयोगेन पुस्तकादीनां मुद्रणं सारल्येन निर्दुष्टतया च भवितुमर्हति।

**सूचनासम्प्रेषणप्रविधिः(ICT)-**

सूचना एवं सम्प्रेषणप्रविधिः इदम् एकं छत्रसदृश्यावरणं, यस्मिन् सम्प्रेषणार्थं विविधयन्त्राणि यथा-रेडियो, टेलिविजन्, दूरवाणी, सङ्गणकं, यन्त्रांशः, तन्त्रांशः, अन्तर्जालं, कृत्रिमोपग्रहादीनां समाहारो भवति। अतः सम्प्रेषणात्मकज्ञानं प्राप्तुमिदं महदुपकुरुते।

**सङ्गणकसहकृतानुदेशनम्(CAI)-**

सङ्गणकसहकृतानुदेशनम् एकः तादृशप्रविधिः भवति यत्र सूचनासम्बद्धसामग्री एवं शाब्दिकः दृश्यश्रव्यः एवं विविधाधिगमप्रक्रियायाम् अन्तर्भवन्ति। अत्र शिक्षणे सङ्गणकस्य उपयोगः क्रियते तदेव सङ्गणकसहकृतानुदेशनमिति कथ्यते। अस्मिन् अनुदेशने सूचनाः क्रमबद्धरीत्या व्यवस्थाप्यन्ते। भिन्नभिन्नविषयाणां सूचनाःसङ्गणकमाध्यमेन कक्ष्यायाम् अभ्यासः(Drill & Practice) बोधनम् (Tutorial) तथा प्रतिक्रियाः च (Stimulations) प्राप्यन्ते इति।

**सङ्गणकसहकृताधिगमः (CAL)-**

सङ्गणकसहकृताधिगमः अत्यधिकविषयम् अत्यल्पसमयेव कल्पयति। अतः अयं प्रविधिः

छात्रान् स्वविषयेषु निवेशयति। एवं स्वयमधिगन्तुं प्रेरयति च।

**सङ्गणकसहकृतशिक्षणम् (Computer Assisted Teaching)**

अयं कश्चित् विधिः इदानीन्तनकाले प्रयुज्यमानो वर्तते। सङ्गणकयन्त्रसहकृतशिक्षणम् इत्थं वर्तते - अध्यापकः पाठनसमये सङ्गणकयन्त्रमुपयुज्य पाठयति। अर्थात् सामान्यपाठने यथा अध्यापकः दृश्यश्रव्योपकरणानि उपयुज्य पाठयति तथैव सङ्गणकसहकृतशिक्षणे सङ्गणकयन्त्रमुपयुज्य बोधयति। दृश्यश्रव्योपकरणप्रयोगे सीमा वर्तते। सङ्गणकसहकृतशिक्षणं तु अति विस्तृतं भवति। यदि विषयं सङ्गणकयन्त्रसहायेन P.P.T द्वारा ध्वनिना सह प्रदर्शयामश्चेत् छात्राणाम् आजीवनपर्यन्तम् अधिगमः स्मृतौ वर्तते। अपि च छात्राः क्लिष्टभाषेति प्रस्तूयमानभाषाविषये आसक्तिं प्रदर्शयेयुः।

सङ्गणकसहकृतशिक्षणविधौ अध्यापकः अध्यापनविषयानुगुणं पाठ्यविषयं बिन्दुरूपेण पूर्वमेव सङ्गणकयन्त्रे Slide, Animation, Graphics, Sound, Photos इत्यादिकमुपयुज्य Program कृत्वा स्थापयति। अध्यापकः कक्ष्यायामागत्य सन्दर्भानुसारं किञ्चित् प्रदर्शयितुं शक्नोति । नोचेत् चलचित्रमिव सम्पूर्णमेकवारमेव प्रदर्शयितुं शक्यते। पाठनानन्तरमपि छात्राः तेषामिच्छानुसारेण सङ्गणकयन्त्रस्य पुरतः उपविश्य तेषां वैयक्तिकक्षमतानुसारं पुनर्बलनम्(Feedback) प्राप्तुं शक्नुवन्ति। यदि Monitor wire(तन्त्री) L.C.D /L.E.Dor Science Projector स्थापयामः चेत् चलचित्रमिव जवनिकायाम् उपरि बृहद्रूपेणापि प्रदर्शयितुं शक्यते। तस्मात् भाषाशिक्षणं सम्यक् भवति।

अतः अधिगमं सरलीकर्तुं शिक्षणसंस्थाः शिक्षायाः गुणवत्तां वर्धयितुं च विविधप्रविधीन् पाठ्यचर्यायां समायोजितवत्यः। तेषु प्रविधिषु CAT प्रमुखपात्रं वहति । एतस्य मुख्यतः त्रीणि संज्ञानात्मकलक्ष्याणि भवन्ति । ते यथा - स्मृतिः, अधिगमः, सूचनाप्रयोगः।

**शिक्षणोपकरणरूपेण सङ्गणकयन्त्रम्(Computer as a Teaching-aid) -**

स्वाध्यायेऽपि यन्त्रमिदं बहूपकरोति। अत्र पाठ्यवस्तूनि लघुभिः अंशैः विभज्य अभिक्रमरूपेण योजना (Program) सङ्गणके संस्थाप्यते। एतादृशं कार्यं पूरणम् (Feed) इत्युच्यते। स्वाध्यायसमये पठनसामग्रीरूपेण एतत् छात्रेभ्यः प्रदीयते, यत् पठित्वा छात्राः पाठ्यविषयम् अवगच्छन्ति। पुनश्च श्रवणयन्त्रस्य ध्वनिमुद्रणयन्त्रस्य यवनिकायाः वा साहाय्येन प्रश्नाः पृच्छ्यन्ते। प्रश्नानामुत्तराणि आम् न वेति लघुपदैः दीयन्ते। एवमेव शाखीयाभिक्रमेण पाठ्यक्रममवगन्तुमधिकं ज्ञानं प्राप्तुं शक्यते। यदि छात्रः पाठ्यसामग्रीं शीघ्रमवगच्छति तर्हि पिञ्जं नुदित्वा स्वशिक्षणगतिं वर्धयितुमर्हति। यदि विषयमवगन्तुम् अधिककालः अपेक्ष्यते तर्हि सम्बद्धपिञ्जं नुदित्वा शिक्षणगतिं मन्दं कर्तुमर्हति। सङ्गणकमाध्यमेन पाठस्य मध्ये अन्ते वा केन छात्रेण कीदृशं कार्यं कृतमस्ति परीक्षणमपि भवितुमर्हति। निर्दिष्टः छात्रः अन्येषां छात्राणामपेक्षया अग्रे गतोऽस्ति, पृष्ठतः स्थितोऽस्ति, अन्यैः सह मिलित्वा गन्तुमर्हति न वेति ज्ञातुं शक्यते। शान्तवातावरणत्वात् एतच्छिक्षणे कक्षायाः छात्राणामवधानं यवनिकायां श्रवणयन्त्रे वा तिष्ठति। अनेन

शिक्षणं सरलं भवति। छात्राः यत् शिक्षन्ते तस्य परीक्षणमपि अनेन यन्त्रेण तस्मिन्नेवकाले स्वयं कर्तुं शक्नुवन्ति। स्वप्रगतिविषये समुचितज्ञानप्राप्तित्वात् अनेन छात्रेभ्यः प्रेरणा प्रोत्साहनं च लभ्यते।

मन्दबुद्धिबालकानां कृते अत्यन्तम् उपकारकमिदम्। अनेन विशिष्टबालकाः पठनार्थं स्वस्येन्द्रियाणां दृष्टेः, ध्वनेः,स्पर्शस्य च प्रयोगं कर्तुं शक्नुवन्ति। तदर्थं शैक्षिकप्राविधिक-केन्द्रं (Centre of Education Technology) मन्दबुद्धिबालकानां कृते बहुमाध्यमं सङ्गणककार्यक्रमं प्राकल्पयत्।

सङ्गणकमाध्यमेन अन्तर्जालाधारितमनुदेशनम्(Web-Based Instruction)अपि प्रदीयते। पुनश्च इदानीम् इ-अधिगमः(e-learning), यू-अधिगमः(U-learning)च अनेन सम्भवति। एतादृशे अधिगमे अन्तर्जालस्य आवश्यकता वर्त्तते। इदानीम्IGNOU इति संस्थापक्षतः चलदूरवाण्या(Mobile)अपि शिक्षाव्यवस्था भवति, या (Class room in your Pocket)इति नाम्ना प्रसिद्धा। छात्राः स्वगृहे उपविश्य सङ्गणकमुपयुज्य अन्तर्जालमाध्यमेन अधिगन्तुमर्हन्ति। छात्राणां कृते सम्पूर्णपठनसामग्रीं वैद्युतिकसन्देशं(E -mail) सम्प्रेषयितुं शक्यते।

**भाषाशिक्षणकौशलानि (L.S.R.W)**

भाषाशिक्षणस्य चत्वारि कौशलानि भवन्ति । तानि च श्रवणं, भाषणं, पठनं लेखनम् इति। एतानि क्रमेणैव प्राप्तव्यानि। तन्नाम भाषाधिगमे एतेषां चतुर्णां पौर्वापर्यमपि एवमेव भवति। आदौ श्रवणं, तत्पश्चात् भाषणम् इत्येतत् सर्वेषामपि अनुभववेद्यम् । पठनलेखनयोर्मध्ये पठनं तत्पश्चात् लेखनं च भवेत्। यतः स्वाभिलषिताभिप्रायस्य विचारस्य वा प्रकाशनाय यत् लिखति तदर्थं पठनम् आवश्यकमेव। अतः एतेषां चतुर्णां कौशलानां पौर्वापर्ये नास्ति कापि असङ्गतिः। अत्र श्रवणं भाषणं च ग्रहणकौशले, पठनं लेखनञ्च अभिव्यक्तिकौशले ग्रहणेन एव अभिव्यक्तिः भवति। अतः चतुर्णां कौशलानां पौर्वापर्ये क्रमः नास्ति तर्हि भाषाशिक्षणे अधोगतिरेव भवति ।

**भाषाशिक्षणे भाषाप्रयोगशाला**

साम्प्रतिकयुगेऽस्मिन् भाषाशिक्षणे अभ्यासस्य महती आवश्यकता वर्तते। अतः सर्वासां समस्यानां निवारणार्थं भाषाप्रयोगशाला समाविष्कृता। अत्र श्रुत्वा अभ्यासेन च भाषा अधिगच्छति। सम्प्रति सर्वेषु देशेषु विदेशीयभाषाणाम् एवं च अस्माकं भारतदेशेऽपि विविधभाषाणाम् अध्ययनार्थं भाषाप्रयोगशालायां संगणकस्य उपयोगः क्रियमाणो वर्तते।

श्रवण-भाषणकौशलानां विकासार्थं भाषाप्रयोगशालायाः प्रयोगः दरीदृश्यते। वैयक्तिकभिन्नतानुगुणं भाषाभ्यासार्थं छात्रान् सहायं करोति। एवं च अध्यापकानामभावेऽपि छात्राः स्वयं संगणकमाध्यमेन भाषाभ्यासं कर्तुं शक्नुवन्ति। शुद्ध-स्पष्टोच्चारणार्थं, भाषाधिगमार्थञ्च अस्य प्रयोगः प्राधान्यतया क्रियते। स्वीयदोषान् छात्राः स्वयमवगच्छन्ति । स्वयमेव तस्य निवारणमपि कर्तुं शक्नुवन्ति।

भाषाप्रयोगशालायां मौखिकीं भाषां श्रुत्वा प्रतिक्रियां कर्तुं,ध्वनीनाम् अनुकरणेन अभ्यासं कर्तुं दोषाणां निवारणेन सम्यक् भवितुञ्च छात्रः समर्थो भवति। अश्रुतपूर्वायाः नूतनभाषायाः अध्यापनकार्ये छात्राणामुत्साहं संरक्षितुं, अध्यापकस्य क्लेशं परिहर्तुं च भाषाप्रयोगशाला नितराम् उपयुज्यते।

**भाषाशिक्षणोपकरणरूपेण संगणकयन्त्रम्**

भाषाशिक्षाक्षेत्रे संगणकयन्त्रमद्य सर्वेषां कृते अपरिहार्यं बहुलोपयोगकरं दरीदृश्यते। अद्य शिक्षाक्षेत्रे प्राथमिकस्तरादारभ्य उच्चस्तरपर्यन्तमस्य प्रयोगः परिलक्ष्यते। संगणकमाध्यमेन संगणकनिर्देशनं (Computer Assisted Instruction)संगणकप्रबन्धितनिर्देशनं (Computer managed instruction) च विधयः कार्ये प्रयुज्यन्ते। संगणकाधारितनिर्देशनमित्यत्र संगणकोपकरणरुपेण व्यवह्रियते। अध्यापकः पाठ्यांशस्य लघ्वंशः संगणकमध्ये पूर्वमेव स्थापयति। तत् कक्ष्यायां Power point presentation माध्यमेन अथवा HTML माध्यमेन Programme कृत्वा पाठयितुं शक्यते। अनेनैव यन्त्रेण दृश्य–श्रव्यम् उभयविधकार्यं सम्पादयितुं शक्यते। संगणकयन्त्रेऽस्मिन् प्रक्षेपकयन्त्रस्य संयोजनेन सर्वे कक्ष्यायां यवनिकायां बृहदरुपेण प्रदर्शयितुं शक्यते। यदि कुत्रापि छात्राणां समस्या समुदेति। तस्याः निवारणार्थं पुनः पुनः प्रदर्शयितुं शक्यते। अनेनापि कक्ष्यावातावरणमाकर्षकं शान्तञ्च भवति। येन छात्राणामधिगमः शीघ्रं भवति।

स्वाध्यायेऽपि यन्त्रमिदं बहूपकरोति। अत्र पाठ्यवस्तूनि लघुभिरंशैः विभज्य अभिक्रमरूपेण Programme संगणकेसंस्थाप्यन्ते।यत्पूरणम्(Feed)इत्युच्यते। स्वाध्याये तत् पठनसामग्रीरूपेण छात्रेभ्यः दीयते। तत् पठित्वा छात्राः अवगच्छन्ति। अपि च श्रवणयन्त्रस्य ध्वनिमुद्रणयन्त्रस्य वा साहाय्येन प्रश्नाः पृच्छन्ते। प्रश्नानामुत्तराणि आम् नवेति लघुपदैः दीयन्ते। अथवा छात्राः प्रश्नस्योत्तरं पिञ्जपट्टिकायां टंकयति। यदि उत्तरं समीचीनं तर्हि अग्रे गन्तुमवसरः मिलति, अन्यथा पुनः प्रयासार्थं निर्दिशति। एवमेव शास्त्रीयाभिक्रमेण पाठ्यक्रममवगन्तुम् अधिकज्ञानं प्राप्तुं शक्यते।

**व्याकरणाध्ययने सङ्गणकयन्त्रम्**

संस्कृतव्याकरणं नीरसं शुष्कम् अतीवक्लेशकरमिति सर्वे आमनन्ति। तदर्थं छात्रान् व्याकरणं सरलरीत्या पाठयितुं सर्वदा चेष्टारताः सन्ति शिक्षाविदः। अतः व्याकरणाध्यापने आधुनिकयन्त्रं सङ्गणकं प्रयोक्तुं ते प्रयासरताः वर्त्तन्ते। पाणिनिव्याकरणस्य प्रामाणिकत्वात् सङ्गणकमाध्यमेन व्याकरणं पाठयितुं शक्यते। सन्धिसमासादियुक्तिमूलकत्वात् तदाधारीकृत्य विद्वद्भिः बहूनि शिक्षणोपकरणानि (Teaching Tool) निर्मितानि। यथा –

कानपुरनगरस्थ आई.आई.टी इति संस्थायाः सङ्गणकविभागे (Computer Department) 1983 वर्षात् संस्कृतव्याकरणमाश्रित्य कारकनियमानां सन्तोषजनकं सङ्गणकीकरणं कृतमस्ति । अनेन संस्कृतभाषायाः हिन्दी-तेलुगु-कन्नड-प्रभृतिषु भाषासु अनुवादः विधीयते।

पुणेनगर्यां C- Dac संस्थायां देशिका इति योजना 1989 वर्षादारभ्य कृता वर्तते। अनया संस्थया सन्धि -समास-कारकप्रभृतिविषयाः सङ्गणकीकृताः भवन्ति। अत्र केवलं व्याकरणविषयकं कार्यं कृतमस्ति। संस्कृतभारतीपक्षतः भाषिका – 1, भाषिका – 2 इति एकमुपकरणं निर्मितम्।

तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठपक्षतः अपि 2007 तमे वर्षे स्वाध्यायी संस्कृतशिक्षिका इति एकः उपागमः निर्मितः। अनेनापि उपागमेन स्वयं व्याकरणस्याध्ययनं कर्त्तुं शक्यते। तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठे सङ्गणकविभागीयपरियोजनाकार्येऽपि संस्कृतव्याकरणस्य सन्धिसमासादिकार्यं प्रचलति । एतानि उपकरणानि प्रयुज्य सङ्गणकमाध्यमेन व्याकरणं पाठयितुं प्रयासः क्रियते। एवञ्च भाषाप्रयोगशालायाम् अपि सङ्गणकःउपयुज्यते। Power Point Presentation इत्यनेन अपि व्याकरणं पाठ्यते। व्याकरणाध्ययनेऽस्य यन्त्रस्य उपादेयताः अधोलिखिताः वर्त्तन्ते। यथा -

- सङ्गणके व्याकरणशिक्षणस्य प्रमुखान् अंशान् स्थापयति।
- संज्ञा-सर्वनाम-सन्धि-उपसर्ग-कारक-समास-प्रत्यय-लकारादीन् सपरिभाषं क्रमेण निर्धारयति।
- भाषायाः उच्चारणक्रियायाः व्यवहारिकनिवेशं सम्पादयति।
- रचनाप्रक्रियायाः चित्रीकरणं करोति, तथा भिन्नवर्णेषु पदानि विश्लेषयति।
- अनुवादपद्धतेः नियमान् निर्धारयति तथा व्याकरणशास्त्रीयजटिलताः निवारयति।
- सम्प्रेषणार्थम् आवश्यकीयानि तत्त्वानि सङ्गणके सज्जीकरोति।
- नूतनव्याकरणसंरचनायाः सजीवं चित्रम् उपस्थापयति।
- आवश्यकतानुसारं विविधव्याकरणतत्वानां संरक्षणं करोति।
- व्याकरणाध्ययने स्वाधिगमपद्धतीनां विकासं सम्पादयति।
- व्याकरणविषयकविविधदत्तांशानां प्रयोगे नूतनत्वम् आनयति।

**पावार्-पॉइण्ट्-प्रेजेन्टेशन् (Power Point Presentation) –**

मानवजीवने प्रस्तुतीकरणस्य काचित् भिन्ना भूमिका वर्त्तते। उत्तमप्रस्तुतीकरणं सर्वदा सम्मुखे विद्यमानव्यक्तेः अवबोधस्य उपरि आश्रितं वर्त्तते। केचन एतादृशाः व्यक्तिविशेषाः वर्तन्ते ये अतीवक्लिष्टकरं विषयवस्तु अत्युत्तमरीत्या उपस्थापयन्ति येन श्रोतारः तेषां प्रति आकृष्टाः भवन्ति। यदि उपस्थापनस्य विषयः क्लिष्टः अस्ति तर्हि वचनेन सह प्रदर्शनद्वारा तस्य विषयस्य क्लिष्टता अपसरति। उदाहरणार्थं वक्तुं शक्नुमः यत् – यदि कश्चन अध्यापकः विविधविषयान् केवलं भाषणेन पाठयति तर्हि कदाचित् छात्राणामधिगमः अपेक्षानुगुणं न भवति। परन्तु सः एव अध्यापकः तमेव विषयं स्वीकृत्य पत्रप्रस्तुतिः भवतु कक्षाशिक्षणं वा भवतु, तत् प्रस्तुतिकरणमाध्यमेन सारल्यं भवति। अतएव सर्वत्र प्रस्तुतीकरणस्य महत्त्वपूर्णा भूमिका वर्त्तते। प्रस्तुतीकरणे दृश्य-श्रव्य इति उभौ सम्मिलितौ भवतः। अधुना कार्यालय-व्यवसाय-विज्ञान-अनुसन्धान-शिक्षादिषु सर्वेषु क्षेत्रेषु प्रस्तुतीकरणमिदं दरीदृश्यते।

सम्प्रति प्रस्तुतीकरणमिदं वैद्युतिकरीत्या सङ्गणकेन सम्पाद्यते। तदर्थं तन्त्रांशस्य बहुप्रयोगः भवति सः पावार्-पॉइण्ट्-प्रेजेन्टेशन् (Power Point Presentation)इत्यभिधीयते। प्रेजेन्टेशन् शब्दस्य अर्थः भवति प्रदर्शनं वा उपस्थापनम्। इत्युक्ते कमपि विषयं स्वीकृत्य विषयसम्बन्धितः अधिकग्रहणयोग्यः विविधतथ्यानां बिन्द्वाकारेण चित्रं, रेखाचित्रं, सारणी, दृश्यं, चित्रचालनम् इत्यादीनाम् अंशानां सम्यक् रूपेण निर्माणं कृत्वा श्रोतृणां सम्मुखे दक्षतासाकम् उपस्थापनं वा प्रदर्शनं यत् माध्यमेन क्रियते तदेव पावार्-पॉइण्ट्-प्रदर्शनमित्युचते। संगणकस्य तन्त्रांशोऽयं एम् एस्-आफिस् इत्यस्य सम्पुटस्य भागविशेषः(MS-Office Package)वर्त्तते। अनेन तन्त्रांशेन निर्मिता पञ्जिका प्रस्तुतिः इति कथ्यते। प्रत्येकं प्रस्तुतौ कानिचन कार्यपृष्टानि वर्त्तन्ते। एतानि कार्यपृष्ठानि स्लाईड् इति नाम्ना प्रसिद्धानि। तत् स्लाईड् पर्यायक्रमेण सुसज्जितं कृत्वा प्रोजेकटर् सहायेन जवनिकायां प्रदर्शयन्ति।

**सङ्गणकशिक्षायाः महत्त्वम् (Importance of Computer Education) –**

सङ्कणकेन शिक्षाक्षेत्रे एका प्राविधिकी क्रान्तिः समुत्पादिता वर्तते। एतस्य बहुविधमहत्वानि अपि विद्यन्ते । तद्यथा -

- सङ्गणकं पूर्णतया निर्वैय्यक्तिकशिक्षकः, यश्च पूर्वाग्रहणे रहितो भवति। तर्हि छात्राणां जातिः, लिङ्गम्, वर्गः इत्यादीन् सङ्गणकं न प्रभावयितुमर्हति।
- पारम्परिकशिक्षणपद्धतौ परीक्षाविधौ च महदन्तरं वर्तते। प्राचीनपरीक्षापद्धतौ कार्यस्य आकलने च सामञ्जस्यं न भवति, किन्तु सङ्गणकेन कार्यस्य समन्तरमेव छात्रेभ्यः प्रतिपुष्टिः प्रोत्साहनं च लभ्यते।
- छात्राः यावत् पाठ्यबिन्दुम् आत्मसात् न कुर्वन्ति तावत्पर्यन्तं सङ्गणकेन पाठ्यबिन्दोः विश्लेषणं पुनः पुनः कारयितुं शक्यते।
- सङ्गणकाधारितपाठः एकैकस्य छात्रस्य प्रगतिं परिवीक्षितुं शक्नोति। सर्वेषां छात्राणां दौर्बल्ये अवधानं प्रयच्छति। तेषां समीकरणार्थं पर्याप्ताभ्यासाय च अवसरं कल्पयति।
- सङ्गणकात् शिक्षितुं न कापि आयुसीमा भवति। अतः प्राथमिकस्तरात् विश्वविद्यालयस्तरपर्यन्तम् अध्येतृभ्यः एतद्यन्त्रम् उपयोक्तुं शक्यते।
- सङ्गणकनिर्देशने अध्येतारः स्वपाठने सह अधिगमस्य उपयुक्तगतिं निर्धारयितुमर्हन्ति। अध्येतृणाम् इच्छानुसारं ते किञ्चित् कालं स्थातुमपि अर्हन्ति। सङ्गणके येषां पाठानां प्रयोगः क्रियते, ते पाठाः छात्रशिक्षकयोर्मध्ये अन्तःक्रियात्मकाः भवन्ति।
- अतः एतेन सहपाठिनां दोषाः ज्ञातुं न शक्यन्ते। यतो हि सङ्कोचकारणात् भयकारणात् वा छात्राः सामान्यतः कक्षायामुत्तरं न प्रयच्छन्ति। एकस्य छात्रस्य दोषम् अन्यः छात्रः ज्ञातुं नार्हतीति कारणात् छात्राः निस्सङ्कोचं वारम्बारप्रयत्नेन स्वगत्यानुसारं शिक्षणं प्राप्तुं प्रभवन्ति।

## निष्कर्षः

भाषाशिक्षणस्य एतासां समस्यानां निराकरणे संगणकयन्त्रं महती भूमिका निर्वहति। यथा पाठ्यांशविश्लेषणे व्याकरणगतज्ञानप्रदाने कठिनविषयसरलीकरणे च। उच्चारणविषयकक्लेशं निवारयितुं शुद्धोच्चारणस्य पञ्जीकरणम्(Recording)कृत्वा छात्राणां समक्षे उपस्थापयितुं शक्यते। येन उच्चारणविषये एकरूपत्वं भवितुमर्हति। एवञ्च प्रान्तीयभाषाविषयकसमस्या दूरी भवति। लेखनशैली ज्ञानमपि संगणकमाध्यमेन सरलं भवति। कठिनविषयं विश्लिष्य लघ्वंशरूपेण दातुं शक्यते। एषा लघ्वंशकरणव्यवस्था संगणकमाध्यमेन एव सम्भवति। व्याकरणादिविषयकपदविश्लेषणं प्रकृतिप्रत्ययविषयकज्ञानमपि प्रत्यक्षं भवितुमर्हति। व्याकरणसूत्रावबोधने सन्धि-समास-कारकादि पाठने साधयः भवति। व्याकरणमिव क्लेशकरं विषयं ते शीघ्रमेव अवगच्छन्ति। भाषाविषयकस्वाध्याये यन्त्रमिदं बहूपकरोति। पाठ्यांशस्य पठनम् Revision, Recall, Evaluation इत्यादिकम् अनेन सरलं विश्वसनीयञ्च भवति। संगणकमेकमेव यन्त्रं यत् सर्वेषामुपकरणानां प्रतिनिधित्वं कर्तुं शक्नोति। यथा Picture, Chart, Map, Audio, Video इत्यादयः एतत्सर्वं संगणकेन उपस्थापयितुं शक्यते।

## सन्दर्भग्रन्थाः


1. *देवी, के. श्रीलक्ष्मी (1996), संस्कृतशिक्षणम्, श्रीवानी प्रिन्टार्स, तिरुपतिः।*
2. *आचार्यः, डा. सत्यनारायण (2005), संस्कृतशोधप्रविधिः, पुरी, ओडिशा।*
3. *कम्भम्पाटि, साम्बशिवमूर्ति (2006), संस्कृतशिक्षणम्, दीपशिखा प्रकाशनम्, जयपुरम्।*
4. *मित्तलः, श्रीमती सन्तोष (2006), संस्कृतशिक्षणम्, नवचेतना पाब्लिकेशन्स, जयपुरम्।*
5. *शर्मा, च.ल.ना, सिंह, फतेह (2008), संस्कृतशिक्षणम् – नवीनप्रविधयश्च, आदित्यप्रकाशनम्, जयपुरम्।*
6. *झा, डा. उदय शंकर (2011), संस्कृतशिक्षणम्, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, उत्तरप्रदेशः।*
7. *बुलुसुः, पद्ममित्रश्रीनिवास (2012), शिक्षायाः मनोवैज्ञानिकाधारः, जगदीशसंस्कृतपुस्तकालयः, जयपुरम्।*

# भाषाशिक्षणे मूल्याङ्कनस्य नूतनविधीनाम् आलोचनात्मकमध्ययनम्

✍ पलाशमण्डलः *

**का नाम भाषा?**

"भाष्यते इति भाषा।" वा भाषा नाम परस्परं विचार - विनिमय साधनम्। भाषा शब्दस्य व्युत्पत्ति एवं भवति - "भाष् व्यक्तायां वाचि" इत्यस्मात् धातो निष्पन्नः। परस्परं विचारभावनानुभावानां विनिमयार्थम्अन्योऽन्यप्रयोजनसम्पादनायउपयुज्यमानं साधनं भाषा, मानवस्य मनोगतभावान् अभिव्यक्तिं कर्तुं ध्वनिरूपसङ्केतः एव भाषा। भाषा एका संश्लेषणात्मिका पद्धतिः वर्तते। भाषायाः समीचीनं परिभाषा प्रदाय एवं प्रतिपादयन्ति। यत्- "स्वाशायं स्पष्टं परेषु समनुभावयितुमाचरितः उपायविशेषः हि भाषा। तत्र तावज्जनैः भाष् धातोः स्पष्टं प्रवचनेन शक्तिगृहिता। भाष्यते अनेन इति व्युत्पत्ता भाषा शब्दोत्पत्तिः" (रामाधीन चतुर्वेदिनः)। दण्डिना पतञ्जलिना च उक्तम् यत् -

" इदमन्धन्तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ " इति॥

"व्यक्ता वाचि वर्णा येषां त इमे व्यक्तवाच्"। इति।

**शिक्षणस्य स्वरूपम् -**

शिक्षणमेका कला भवति। यस्याः साफल्यं मानवस्य योग्यतादक्षतयोरुपरि निर्भरा भवति। अत्र अल्पीयसाशब्देन विषयस्य प्रतिपादनं भवति। एतदर्थं भाषाशिक्षणस्यावश्यकताऽस्ति।

**शिक्षणस्य परिभाषा -**

- शिक्षणं काचित् अन्तः क्रियात्मिका प्रक्रिया या मुख्यतया कक्ष्यागतपरिस्थितिषु कानिचित् वाञ्छित लक्ष्याणि प्राप्तुं छात्रशिक्षकयोर्मध्ये जायते(एमीडन )।
- शिक्षणं तादृशं साधनं यत्र अनुभवसदस्याः अपरिपक्व सदस्यानां जीवननिर्वहणार्थं मार्गदर्शनं कुर्वन्ति(योकम तथा सिम्पसन् )।

**मूल्याङ्कनम् -**

मूल्याङ्कनं हि मूल्यनिर्धारणस्य शैक्षिकप्रक्रियायाश्च सारभूतं वर्तते। यतो हि मूल्याङ्कने इदं ज्ञातुं शक्यते, यत् शिक्षा उद्देश्यानां लक्ष्यणाञ्च प्राप्तिः कियज्जातेति। मूल्याङ्कनेन इदमपि ज्ञायते यत् किं वर्तते उपयुक्तं किं च न उपयुक्तम। मूल्याङ्कन हि सततं प्रचाल्यमाना विस्तृता प्रक्रिया। कस्य उत्पत्तिः दृष्ट्वा मूल्यस्य अङ्कनमेव मूल्याङकनं भवति। वस्तुनः उपयोगित्वम् अनुपयोगित्वं वा परीक्षते मूल्याङ्कने

* शोधछात्रः, शिक्षाविभागः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः।

एतस्यां कस्यचित् मापनस्य उपयोगितायाः विषये निर्णयो निर्धार्यते।

**मूल्याङ्कनस्य परिभाषा -**

मूल्याङ्कनमेका निरन्तरप्रक्रिया वर्तते। एतत् छात्राणाम् औपचारिकशैक्षिकं उपलब्धिम् अतिरिच्य किञ्चित् द्योतयति। एतत् व्यक्तेः भावनाभिः, चिन्तनैः, क्रियाभिः सम्बद्धं सत् अपेक्षितव्यवहारिक - परिवर्तनद्वारा व्यक्तिविकासाय स्पृहयति। (मुफात) कस्यचित् वस्तुनः अथवा प्रक्रियायाः मूल्यनिश्चयः मूल्याङ्कनमित्युच्यते । (टार्गर्सन एडम्समहोदयौ)उद्देश्यानां प्राप्तौ कियत्पर्यन्तं साफल्यं प्राप्तम् ? इति सीमानिर्धारणस्य प्रक्रिया मूल्याङ्कनम् इति उच्यते।

**मूल्याङ्कनस्य विधयः -**

- निर्माणात्मकमूल्याङ्कनम् ( Formative Evaluation )।
- सङ्गणकाधारितपरीक्षा ( Computer Based Examination)।
- मुक्तपुस्तकपरीक्षा (Open Book Examination)।
- संकलनात्मकमूल्याङ्कनम्(Summative Evaluation) ।
- प्रश्नपुस्तकम् (Question Bank)।
- साक्षात्कारः( Interview)।
- श्रेणीप्रणाली (Grading system)।
- अवलोकनम् (Observation)।

**1. निर्माणात्मकमूल्याङ्कनम् (Formative Evaluation)-**

अनुदेशनसमये छात्राणाम् नियन्त्रणाय निर्माणात्मकमूल्याङ्कनम् उपयुज्यते। अस्य मुख्योद्देश्यं छात्रेभ्यः अध्यापकेभ्यश्च अधिगमसाफल्यस्य वैफल्यानाञ्च विषये सततप्रतिपुष्टिप्रदानम्। कस्यचित् विषयस्य अथवा अध्यायस्य शिक्षणात्परम् अध्यापकः छात्राणां प्रगतेः मूल्याङ्कनं करोति। यथा – विद्यालयेषु साप्ताहिकपरीक्षा, मासिकपरीक्षा, त्रैमासिकपरीक्षादिभिः निरीक्षणेन च छात्राणां प्रगतेः परीक्षणं कृत्वा फलितानि यावच्छिघ्रं प्रकाशन्ते। आवश्यकतायां सत्याम् अध्यापकः उद्देश्यानामपि नवीकरणं करोति। निर्माणात्मकमूल्याङ्कनं छात्रेभ्यः अपि प्रतिपुष्टिं प्रयच्छति। एतेन छात्राः समये समये स्वाध्ययनस्य प्रगतिं ज्ञात्वा धनात्मकप्रतिपुष्टिं प्राप्नुवन्ति। ते स्वस्य न्यूतनाः अपि ज्ञात्वा तासामतिक्रमणाय प्रयत्नरताः भवन्ति। इत्थं मूल्याङ्कनस्य प्रकारोऽयं शिक्षणाधिगमकार्याणां विकासाय अत्यन्तम् उपकरोति।

**2. सङ्गणकाधारितपरीक्षा (Computer Based Examination) -**

शिक्षाप्रदानकाले सर्वे छात्राः युगपत् उपविशन्ति। प्रत्येकं छात्रस्य साक्षात्सम्बन्धः सङ्गणकस्य श्रवणयन्त्रेण सह, ध्वनिमुद्रणयन्त्रेण सह पिञ्चिपट्टिकया सह च कार्यते। पाठ्यवस्तु लघुभिः अंशैः

विभज्यते। पाठ्यांशाः छात्राणां पुरतः विद्यमान दूरदर्शनस्य जवनिकायाः वा साहाय्येन प्रश्नाः पृच्छन्ते। प्रश्नानाम् उत्तराणि आम्, न वेति प्रकारेण लघुवाक्यैः वा दातुं शक्यन्ते। छात्राः प्रश्नं स्वीकृत्य तत् पिञ्चपट्टिकया टङ्कयति। अनुक्षणमेव समाधानं सङ्गणकमाध्यमेन दीयते। यदि उत्तरं साधु, तर्हि तस्य उत्पीठिकायां विद्यमानहरितदीपः ज्वलति, यदि समाधानम् असाधु भवति तर्हि रक्तवर्णस्य दीपः ज्वलति।यदि कश्चन छात्रः पाठ्यसामग्रीं शीघ्रम् अवगतवान् तर्हि (+) पिञ्जं नुदित्वा स्वशिक्षणगतिं वर्धयितुम् अर्हति। यदि कश्चन अधिककालम् अपेक्षते, तर्हि सम्बद्धं पिञ्जं नुदित्वा शिक्षणगतिं मन्दां कर्तुम् अर्हति। कक्ष्यायाः वातावरणं शान्तं भवति। अनेन शिक्षणे सारल्यं भवति। कस्यचित् पाठ्यस्य मध्ये अन्ते वा केन छात्रेण कीदृशं कार्यं कृतमिति परीक्षणमपि भवितुमर्हति। छात्राः यत् शिक्षन्ते तस्य परीक्षणमपि अनेन यन्त्रेण भवितुमर्हति। क्षणाभ्यान्तरे वाञ्छितसूचनाप्राप्तेः अधिपङक्तिः (Online) इत्यनेन सौविध्येन शिक्षणाधिगमप्रक्रियायाः सरली कर्तुं शक्यते।

**3. मुक्तपुस्तकपरीक्षा (Open Book Examination) -**

मुक्तपुस्तक परीक्षायाः तात्पर्यं एवं भवति - छात्राः परीक्षासमये स्वयं स्वयं पुस्तकं निजपार्श्वे स्थापनं एवं तस्य उपयोग करणार्थम् अनुमतिं ददाति शिक्षकः। प्रश्नस्य उत्तरं छात्राः स्वयं पुस्तकं दृष्ट्वा उत्तरं दातुं शक्नुवन्ति। एतदर्थं परीक्षायाः पृष्ठवान् प्रश्नपत्रस्य प्रकृतिःसाधारण - प्रश्नपत्रस्य तुलनया किञ्चित् भिन्नं भवेत्। परम्परागत परीक्षायां प्रश्नाः सहजाः सरलाः वर्णनात्मकरूपेण प्रपृच्छते। किन्तु मुक्तपुस्तकपराक्षे प्रश्नपत्रमध्ये एवं प्रश्न भवेत् – कौशलात्मकं विश्लेषणात्मकम् अनुप्रयोगात्मकं प्रभृतयः।

**4. संकलनात्मकमूल्यङ्कनम् (Summative Evaluation) -**

अनुदेशनकार्याणां अनन्तरं वर्षस्यान्ते संकलनात्मकमूल्याङ्कनं क्रियते। शैक्षिकोद्देश्यानां प्राप्तिः कियतपर्यन्तमभूत् ? इति ज्ञातुम् एतद् उपकरोति। शैक्षिकवर्षस्यान्ते छात्रेभ्यः श्रेणीप्रदानम् एतस्य मुख्योद्देश्यं भवति। प्रायः प्रमाणिकपरीक्षाभिः संकलनात्मकमूल्याङ्कनं क्रियते। एतत् प्रत्येकं छात्रस्य कक्ष्याप्रकोष्ठस्य च अधिगमस्तरं द्योतयति। संकलनात्मकमूल्याङ्कनस्य अनन्तरं छात्रः प्रमाणपत्रं प्राप्य अग्रिमशिक्षां प्राप्तुमर्हति। एतादृशमूल्याङ्कनं छात्राणां वैयक्तिकसमस्याः न परिगणयति।

**5.प्रश्नपुस्तकम् (Question Bank) -**

वर्तमाने परीक्षाप्रणाल्याः प्रमुखाः दोषाः भवति। तन्मध्ये एकः दोषः प्रश्न कथनं, प्रश्नस्य वैधतायाः अभावः। प्रश्नप्रत्रनिर्माणस्य इयं समस्या निवारणार्थं प्रश्नपुस्तकं निर्मितव्यम्। प्रश्नपत्रं शिक्षार्थिणां द्वारा निर्माणं क्रियते। प्रश्नपुस्तकं न केवलं प्रश्नपत्रनिर्मातानां कृते उपयोगी भवेत् परन्तु सर्वान् छात्रान्, सर्वान् अध्यापकान् कृतेऽपि उपयोगः भवति। मूल्याङ्कनं निर्धारणाय अयम् एक महती माध्यमः। प्रश्नपत्राणि बहुप्रकाराणि भवितुमर्हति। यथा –

- वस्तुनिष्ठप्रश्नपुस्तकम् ।
- लघु - उत्तरप्रश्नपुस्तकम् ।
- विस्तृतोत्तरंप्रश्नपुस्तकम् ।

**6. साक्षात्कारः( Interview) -**

साक्षात्कारेण (Interview) एव प्रदत्तानां सङ्कलनं क्रियते। अत्र उत्तरदाता मौखिकप्रक्रियया स्वाभिमतं समुपस्थापयति। उत्तरदाता प्रश्नकर्तुः सम्मुखे उपविश्य मौखिकोत्तरं प्रददाति। अयम् आत्मनिष्ठविधिः भवति। अनेन व्यक्तेः विशेषतानां, गुणानां, विचाराणां, समस्यानां च ज्ञानं प्राप्यते। अत्र प्रश्नकर्ता वार्तालापेन प्रश्नोत्तरेण च प्रदत्तानाम् (Data) एकत्रीकरणं करोति। सर्वेषु उपकरणेषु श्रेष्ठमिदम्। कारणमत्र प्रश्नकर्तुः प्रश्ने यः मुख्यभावो विद्यते, तस्य ज्ञानं प्रत्यक्षरूपेण उत्तरदाता अवगम्यते। येन उपकरणस्य यानि मुख्योद्देश्यानि विवर्तन्ते तानि परिपूरणानि भविष्यन्ति। प्रमापितसाक्षात्कारे (Standardized Interview )क्रियमाणेषु प्रश्नेषु भाषा क्रमश्च पूर्वनिर्धारितो वर्तते। अप्रमापितसाक्षात्कारेण (Unstandardized Interview )प्रश्नानां भाषा क्रमश्च साक्षात्कारकर्त्रानुसारं भवति।

**7.अवलोकनम् (Observation) -**

बाह्यव्यवहारस्य अध्ययनार्थम् अवलोकनम् अपेक्षते। अस्य सम्बन्धः लेखने, मौखिके, साक्षात्कारे च न भवति, अपि तु स्वाभाविकपरिस्थितौ विद्यते। पुनः अन्तिम - वैधताप्राप्त्यर्थम् अवलोकनेन प्रत्यावर्तनं क्रियते। यस्य व्यवहारः यथा भवति, तस्य अवलोकनं यदि तदनुसारं क्रियते, तर्हि तदेव प्रत्यक्षावलोकनम् इति कथ्यते। छात्राणां व्यवहारं ज्ञातुम् अवलोकनम् उत्तमसाधनं वर्तते। अनेन व्यक्तेः अथवा व्यक्तीनां बाह्यव्यवहारं निरीक्ष्य तथ्यानि लेखितुं शक्यते। सामान्यतः अध्यापकाः विद्यालयस्य सहजवातावरणे एव छात्रान् निरीक्ष्य अयं बुद्धिमान्, अयं वाग्मी, अयं मृतभाषी, अयं चञ्चलः इत्यादितथ्यानि प्रकटयन्ति।

**मूल्याङ्कने आलोचनात्मक अवधेयाः अंशाः -**

1. छात्राः अर्जितविषयज्ञानं स्मरणशक्तिं चिन्तनशक्तिं कल्पनाशक्तिञ्च उपयुज्य यथोत्तरं दद्युः, तथा प्रश्नपत्रं निर्मातव्यम्। तेन कण्ठस्थीकरणं निवारयितुं शक्यते।

2.अध्यापकाः पारम्परिकप्रणालीं त्यक्त्वा सप्रमाणं विश्वसनीयं वैविध्यपूर्णं प्रायोगिकम् आधुनिकञ्च मूल्याङ्कनविधिमाश्रयेयुः, तेन छात्राणां योग्यता सुस्पष्टं निरूपिता भवति।

3. मूल्याङ्कने निबन्धः वस्तुनिष्ठमौखिकपरीक्षाभिः सह गृहकार्यस्य पाठ्यसहगामिक्रियाणाञ्च महत्त्वं स्यात्। एवं बाह्यमूल्याङ्कनेन सह आन्तरिकमूल्याङ्कनस्यापि परिगणनं स्यात्।

4. मूल्याङ्कनेन शिक्षणस्योद्देश्यानां परिपूर्तिरपि ज्ञातव्या।

5. मूल्याङ्कने परीक्षकैः निष्पक्षदृष्टिकोणः आश्रयणीयः।

6. छात्राणामुच्चारण – भाषणकौशलञ्च परीक्षितुं मौखिकपरीक्षाः आयोजनीयाः।

7. परीक्षायां सम्पूर्णपाठ्यक्रममाश्रित्य प्रश्नाः भवेयुः।
8. भाषाशिक्षणस्य चतुर्णामपि कौशलानामाधारेण परीक्षायां व्यवस्था स्यात्।
9. मूल्याङ्कने साक्षात्कार आत्मनिष्ठविधिः भवति।
10. मुख - प्रतिमुखात्मिकाप्रक्रिया(Face - to - Face process) वर्तते।
11. वास्तविकानुभवस्य प्राप्तिर्भवति।
12. व्यक्तेः विशेषगुणानां ज्ञानम्, व्यवहारम् अनेन सिध्यति।

**निष्कर्षः -**

शिक्षाप्रक्रियायाः विभिन्नचरेषु छात्राणां विभिन्नयोग्यतानाम् उपलब्धीनाञ्च मूल्याङ्कनञ्च क्रियते। तदर्थं शिक्षकः विभिन्नसाधनानि प्रयुङ्क्ते। परन्तु न एतत् सरलं कार्यम्। उत्तममूल्याङ्कनम् उपकरणे काश्चन मूलभूतविशेषताः भवन्ति। अतः शिक्षकः मूल्याङ्कन - साधनानां चयने अत्यन्तं जागरूकः भवेत्। उत्तममूल्याङ्कन - साधनस्य निर्माणं कथं कर्तव्यम्? तस्य लक्ष्याणि कानि? इत्यादिविषयान् मनसि निधाय योग्यसाधनस्य चयनं कर्तव्यम्।

**सन्दर्भग्रन्थाः**

1. *शिक्षायाः मनोवैज्ञानिकाधारः - डॉ. बि. पद्ममित्र श्रीनिवासः (2012)।*
2. *शिक्षानुसन्धानं संख्याशास्त्रञ्च - डॉ. डम्बरुधरपतिः (2012)।*
3. *शिक्षालोकः – राष्ट्रियसंस्कृतविद्यापीठम् (2009-2010)।*
4. *आधुनिकमापन एवं मूल्याङ्कन – डॉ. एस. पी. गुप्ता (2005)।*
5. *पतञ्जलिः महाभाष्यम्(1/3/48)।*
6. *संस्कृतभाषायाः अक्षरविन्यासदोषाणां विषये निदानात्मकपरीक्षायाः प्रमाणीकरणम् – आर. वि. एस्. लक्ष्मी (1991) लघुशोधप्रबन्धः।*

# भाषाशिक्षणे संगणकस्य अनुप्रयोगः

✍ जीतेन्द्रकुमारगुप्तः *

**का नाम भाषा-**

भाष्यते व्यक्तवाग् इति भाषा। आङ्लभाषायांLanguage (भाषा) इति पदं लेटिन् भाषायाः Lingua इति पदात् निष्पन्नम्। भाषा संसारे मानवस्य अन्तर्निहितभावानां विनिमयसाधनं भवति। मानवजीवनस्य सार्थकतां भाषा एव प्रकटयति। भाषाणां बहवः प्रकाराः सन्ति । यथा- शाब्दिकभाषा, अशाब्दिकभाषा, सांकेतिकभाषा, कूटभाषेति। आसु व्यक्तवाग्भाषा भावाभिव्यक्तौ समर्था विद्यते।

**भाषाशिक्षणम् -**

लोकेऽस्मिन् भाषाशिक्षणं स्वभाविकं सार्वभौमिकं सार्वकालिकं च विद्यते। सर्वत्र शिशुः मातुःसकाशादेव भाषामधिगच्छति। भाषाशिक्षणे मातृवत् दक्षः न कोऽपि अध्यापकः। भाषयैव मानवस्य सर्वोन्मुखीविकासो भवति। भाषाशिक्षणं विना मनुष्यो निष्क्रियःअर्थहीनः च भवति। भाषयैव मानवो नित्यं नूतनं ज्ञानं प्राप्नोति । अतः सर्वत्र प्राथमिकस्तरे अवश्यमेव भाषाशिक्षणं विद्यते ।

**सङ्गणकस्य विकासः -**

१९४६ तमवर्षानन्तरम् अद्यावधि सङ्गणकविकासस्य प्रक्रिया निरन्तरं प्रचलन्ती अस्ति। विद्युत शक्तेः विकासेन सङ्गणकस्य विकासे महत् योगदानं वर्तते। सङ्गणकं येषु सिद्धान्तेषु कार्यं करोति, तत् अष्टादशशताब्दे एकेन आङ्ग्लगणितज्ञेन चाल्स् बैवऊ महाभागेन अवगतमासीत्। तदनन्तरं १९४० तमे वर्षे एकः अन्यः आङ्ग्लगणितज्ञः एल. एन्. ट्ररिगमहाभागः एतस्य प्रक्रियां निश्चितवान्। ततःपरमेव अमेरिकादेशस्य वैज्ञानिकः पीटर् अतनासोफ महाभागः सङ्गणकस्य विद्युत्सम्वद्धसिद्धान्तान् आविष्कृतवान्। चाक्स् बाबेजनामकः वैज्ञानिकः प्रथमाधुनिकसङ्गणकयन्त्रम् आविष्कृतवान्। अतः एव सः सङ्गणकजनकः इति प्रसिद्धःअस्ति। आधुनिकसङ्गणकं १९७२ तमे शताब्दे निर्मितम्।

**संगणकयन्त्रस्य अनुप्रयोगः** –

संगणकं तादृशम् एकं यन्त्रं यत् मस्तिष्कस्य इव सर्वविधकार्यं कर्तुमर्हति। तादृशं शुद्धं तीव्रं यन्त्रमेतत् यत् सूचनाः प्रदत्तांशान् विश्लिष्य शुद्धपरिणामं प्रयच्छति। संगणकस्य उत्पत्तिः लेटिन् भाषायाः(Compute) इति शब्दात् निष्पन्नोऽभवत्। एतस्यार्थः गणना इत्येव। अतः तार्किकदृष्टिकोणेन कश्चन गणनप्रविधिरेव सङ्गणकम् इत्युच्यते। यत् काश्चन प्राप्ताङ्कान् व्यवस्थितान् नियन्त्रितान् च करोति। तेन सह पूर्णशुद्धतया निर्दिष्टसमये च सम्पादयति। सङ्गणकं तादृशमेकं यन्त्रं, यत् यन्त्रिकपद्धत्या मस्तिष्कवत् समस्यासम्बद्धसूचनाः अल्पीयसि काले समाधातुं प्रभवति। अस्मिन् प्रविधौ मनुष्ययन्त्रयोर्मध्ये सञ्चारस्य अन्तःक्रिया विद्यते। अतः उच्यते-

* *शोधछात्रः, साहित्यविभागः, राष्ट्रियसंस्कृतसंस्थानम् (मा.वि) मुम्बई परिसरः।*

- सङ्गणकम् एकः यान्त्रिकोपायः। सङ्गणकं तत्त्वानाम् एकं प्रक्रियानिर्माणयन्त्रम्।
- सङ्गणकमेकं यन्त्रं, यत् मस्तिष्कस्य साहाय्यं करोति।

शिक्षाक्षेत्रे संगणकानां बहुविधा उपयोगिता, प्रशिक्षकार्येऽपि संगणकानाम् उपयोगो भवति। शोधकार्येऽपिसंगणकानाम् उपयोगिता महत्त्वपूर्णा भवति। एवम् अनेका विद्याः संगणकमाध्यमेन शिक्षितुं शक्यन्ते। परीक्षाकार्येषु अपि संगणकाः बहुधा प्रयुज्यन्ते। परीक्षा- तिथि- निर्धारणे, परीक्षायाः आयोजने, परीक्षा- परिणाम- संगणने, परीक्षा-परिणाम- प्रकाशने च संगणकानां महती भूमिका। पुस्तकप्रकाशने व्यवसाये च संगणकानां महती आवश्यकता वर्तते। वेव- साइट- माध्यमेन इलेक्ट्रानिकरूपेण पुस्तकं प्राप्तुं शक्यते। चिकित्साक्षेत्रे संगणकानां उपयोगो महत्वपूर्णा भवति। व्यापार- क्षेत्रेऽपि संगणकानां उपयोगः प्रतिपलं वर्धते। कार्मिक- वेतन- गणना कार्मिक- प्रबन्धनम्, नियन्त्रणं संगणकमाध्यमेन संपाद्यते। उन्नत्यै, प्रगत्यै, विकासाय च संगणकानाम् उपयोगः आवश्यकःभवति।

अद्य संगणकयन्त्रेण विना वैज्ञानिकलोकः अपूर्णः इव प्रतीयते। मनुष्येण कर्तुमशक्यानि अनेकानि कार्याणि अनेन सुखेन सम्पाद्यन्ते। कष्टसाध्यानि अपि गणनकार्याणि एतत् अत्यन्तं सुखेन उत्कृष्टतया अतिवेगेन च करोति। असंख्यानां विषयाणां संग्रहणं कृत्वा, तान् अपरिमितकालपर्यन्तं स्वोदरे रक्षितुमपि समर्थं भवति। अद्य अन्तर्जालस्य संगणकस्य च समयः विद्यते। अध्यापकः संगणकस्य माध्यमेन भाषां प्रभावपूर्णरीत्या शिक्षयितुं प्रभवति। यथा –

**आनलाइन ( Online) भाषाशिक्षणम् -**

देशे विदेशे च संस्कृतभाषाविद्वांसः बहवः सन्ति। स्व स्व स्थाने संस्कृतभाषाम् अध्यापयन्ति। तेषाम् अध्यापनं Skype इति Software द्वारा अन्तर्जाले कुत्रापि उपविष्य छात्राः पठन्ति।

**फेसबुक वाटसाप (Face book, Whatsapp)भाषाशिक्षणम् -**

अस्य माध्यमेन संस्कृत भाषाशिक्षणनिमित्तं समूहं निर्माय भाषाशिक्षणं प्रवर्तते।

**पावरप्वाइन्ट (Power point)–**

आधुनिकसमये संगणकसहायेन पावरप्वाइन्ट**Powerpoint** माध्यमेन भाषायाः बहूनि तत्त्वानि सरलतया पाठयितुं शक्यन्ते। तद्यथा वर्णपरिचयः, वर्णोच्चारणं, पदपरिचयः, विशेषणप्रयोगाः, व्याकरणम् (सन्धि- समास- प्रकरणानि) अत्र दृश्यश्रव्यमाध्यमेन अध्यापनं छात्रबोधगम्यं भवति।

**ई -अधिगमः (E-Learning) –**

ई -अधिगम इत्यस्य इत्यस्य माध्यमेन भाषाशिक्षणं भवितुमर्हति। ये केचन उत्तमाः विद्वांसः सन्ति ये च भाषाशिक्षणे अत्यन्तं निपुणाः सन्ति। तादृशानां विदुषाम् अध्यापनं मुद्रणं (Vedio shooting) कृत्वा संस्कृतशिक्षणम् इति (website) वेबसाइट निर्माय अन्तर्जाले सम्पादितं कृत्वा यः कोऽपि जिज्ञासुः पठनार्थी अन्तर्जालकम् उद्घाट्य यु ट्यूब(You tube) मध्ये भाषां सरलतया पठति।

**संस्कृतब्लाग** – अन्तर्जाले बहवः संस्कृतविद्वांषः, संस्कृतप्रेमिणः संस्कृतभाषाम् अधिकृत्य संस्कृतभाषाशिक्षणाय संस्कृतब्लाग लिखन्ति, तत् जनाः पठन्ति।

**व्याकरणशिक्षणोपकरणानि** – भाषाशिक्षणं प्रायः अनौपचारिकं भवति। सर्वे जनाः गृहे मातुः सकाशात् पितुः सविधे पारिवारिकजनेभ्यः मित्रेभ्यः भाषाम् अधिकम् अधिगच्छन्ति। संगणके बहूनि व्याकरणशिक्षणोपकरणानि साधनानि वा सन्ति, तानि उपयुज्य व्याकरणशिक्षणं रूचिरं प्रभाविपूर्णं च कर्तुं शक्नुमः। यथा- सन्धि- सुबन्त-तिङन्त-कृदन्त-पदपरिचायक-पदविशेषकानि ।

**संस्कृत ई- जगत्** – अन्तर्जाले एकं विशिष्टं तन्त्रांशं निर्माय संगणके विद्यमानानि तन्त्रांशसाधनानि स्मार्टमोबाइलयन्त्रे विद्यमानएप्ससाधनानि सर्वाणि संकलय्य कृत्वा एकं विशिष्टं साधनं विरचय्य भाषाशिक्षणं भवितुमर्हति।

**एप्सनामानि** – सिद्धान्तकौमुदी,शब्दरुपमाला, धातुरूपमाला हिन्दीसंस्कृतचित्रकोश, बालचित्रबोध, अमरकोश, वाचस्पत्यम्, शब्दकल्पद्रुम्, कृदन्तसाधिका, संस्कृतस्वयशिक्षक इमे एप्स साधनानि प्रो. मदनमोहन झा महोदयस्य मार्गदर्शने श्रुतीझा सृजनझा महोदयाभ्यां निर्मितम्। इमानि तंत्रांशम् उपयुज्य भाषाशिक्षणे नवाचार संभावयितुं शक्यते। एवंरीत्या भाषाशिक्षणे संगणकसहसंस्कृत- शिक्षणमत्यन्तम् उपादेयपूर्णं भवति।

**संगणकेनसहकृतभाषाशिक्षणस्य गुणाः** –

१. अत्र आयुसीमा न भवति यः कोऽपि यदा कदापि स्वानुसारम् अनुसृत्य पठितुमर्हति।

२. संगणकद्वारा अध्ययनं रुचिपूर्णं भवति। छात्रः भयं विना अध्ययनं करोति।

३. संगणके निहितं भाषाशिक्षणतन्त्रांशम् अनेकान् जनान् प्रयोगः भवति। वर्णाः सुस्पष्टाः भवन्ति।

4. सुधाखण्डं मसी इत्यनयोः च व्ययः न भवति। कर्गजरहितशिक्षणं भवति।

5. अध्यापकस्य वस्त्रं हस्तौ च स्वच्छं भवति। संगणके त्रुटेः सम्भावना न्यूना भवति।

6. संगणकस्य माध्यमेन गणना अत्यन्तं परिशुद्धा भवति।

**उपसंहारः** –

आधुनिकसमये भाषाशिक्षणे संगणकस्य प्रयोगः बहुआवश्यकः भवति। स्वच्छताभियानस्य सफलताय महती आवश्यकता वर्तते तथा च मोदीमहोदयस्य स्मार्ट इण्डिया स्वप्नपूर्तये सहाय्यं भवति। सम्प्रति संगणकस्य सहाय्येन एव सकलं कार्यं सफलतया भवति।

**अनुशीलितग्रन्थाः**

*1. मित्तल सन्तोषः,संस्कृतशिक्षणम् नवचेतना पब्लिकेशन्स, जयपुरम्।*

*2. शर्मा लक्ष्मीनारायण, भाषा की शिक्षणविधियां एवं पाठनियोजन, विनोद पुस्तक मन्दिर, आगरा।*

*3. शिक्षण सूत्र – भवानीशङ्करशर्मा, निर्मल प्रकाशन, नई दिल्ली।*

*4. शिक्षा मे नवाचार और नवीन प्रवृत्तीयां, भाई योगेन्द्रजीत, विनोद पुस्तक मन्दिर आगरा।*

# भाषाशिक्षणे मनोवैज्ञानिकसम्प्रत्ययानाम् अनुप्रयोगः

**✍रामजियावन प्रजापतिः ***

**उपोद्घातः -**

संसारेऽस्मिन् ज्ञानसदृशं किमपि पवित्रं न विद्यते । यत्र ज्ञानेन एव मनसा-वाचा-कर्मणा च जैविकजगत् परमपवित्रं भवति। यथा श्रीमद्भगवद्गीतायां वर्णितम्-

न हि ज्ञानेन सदृशं पवित्रमहि विद्यते।
तत्स्वयं योगसंसिद्धिः कालेनात्मनि विन्दति।। इति।।

शिक्षा तु एतादृशी कामदुघाधेनुः अस्ति यया सर्वेषु क्षेत्रेषु कामरूपिक्षुधायाः पूर्तिः संभवति । यत्र भाषा एव तेषां परमसाधनं भवति। भाषा तु परस्परं विचाराणाम् आदानप्रदानस्य प्रक्रिया वर्तते। अतः भाषाशिक्षणं शैक्षिकजगति प्राथम्येन परमावश्यकं भवति। भाषाशिक्षणे मनोवैज्ञानिकसम्प्रत्ययानां महत्वं भवति। मनोवैज्ञानिकविधिना भाषाशिक्षणम् अत्यन्तं सौकर्यं भवति। अतः अस्मिन् अनुक्रमे सम्प्रतिः अनुसन्धानजगति भाषाशिक्षणविकासे विशिष्टप्रयासो जातः । परन्तु प्रयासोऽयम् अग्रे अपि अधिकावश्यकं वर्तते। यत्र तत्परता- परमश्रद्धा-इन्द्रियाणाम् उपरि नियन्त्रणेत्यादीनां संप्रत्ययः परमावश्यकं भवति। यथा श्रीमद्भगवद्गीतायां वर्ण्यते-

श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।। इति।

**भाषाशिक्षणे समस्याः -**

भाषाशिक्षणक्षेत्रे श्रवण-भाषण-पठन-लेखनादिप्रमुखसमस्याः दृश्यन्ते, यत्र मनोवैज्ञानिक-विधिना शिक्षणम् अतीव प्रभावकारि भवति। । क्षेत्रेऽस्मिन् विद्वद्भिः नैकमनोवैज्ञानिकभाषाशिक्षण-सिद्धान्तानां प्रविधीनाञ्च अनुप्रयोगः कृतः । अखिलशैक्षिकजगति विद्वांसः उन्नतभाषाशिक्षणप्रदानाय सतत-प्रयासरताः सन्ति । परन्तु तत्र शिक्षायाः मनोवैज्ञानिकसंप्रत्ययाः के सन्ति ? तेषाम् आवश्यकताः, क्षेत्राणि संबन्ध-योगदानोद्देश्यानि च कानि सन्ति ? इति एकदा पुनः चिन्तनीयम्।

**भाषाशिक्षणे शिक्षामनोविज्ञानम्-**

शिक्षामनोविज्ञानं तत्विज्ञानम् अस्ति यत् - शैक्षिकसमस्यानां विवेचनम्, विश्लेषणम्, समाधानञ्च करोति। शिक्षा मनोविज्ञानात् पृथक् रूपेण न विद्यते। मनोविज्ञानं शिक्षया सह यदा दर्शनरूपेण विद्यते तदा अपि शिक्षया छात्रेषु सर्वाङ्गरूपेण विकसने सहायकम् अभवत्। स्किनर महोदयः भणति यत्-

* *शोधछात्रः, शिक्षाविभागः, राष्ट्रियसंस्कृतसंस्थानम् (मा.वि) मुम्बई परिसरः।*

शिक्षामनोविज्ञानं शैक्षणिकपरिस्थितिषु मानवीयव्यवहाराणाम् अध्ययनं करोति। ‘ शिक्षामनोविज्ञानं व्यक्तेः जन्मतः वृद्धावस्थापर्यन्तम् अधिगमानाम् अनुभवानां वर्णनं व्याख्याञ्च करोति । ” उपरोक्ततथ्यानाम् अवलोकनेन एतत् स्पष्टं भवति यत् -

1. शिक्षामनोविज्ञानस्य केन्द्रं मानवव्यवहार अस्ति।
2. शिक्षामनोविज्ञानम् अनुसन्धानेन निरीक्षणेन च प्राप्ततथ्यानां संग्रहो भवति।
3. शिक्षामनोविज्ञाने शिक्षासम्बन्धिसमस्यानां समाधान-प्रक्रियाणां पद्धतेश्च प्रतिपादनं भवति।

**भाषाशिक्षणे शिक्षामनोविज्ञानस्य आवश्यकता -**

कैली महोदयानाम् अनुसारम्

1. बालकस्य स्वभावस्य ज्ञानप्रदानकरणम् ।
2. बालकानां स्ववातावरणे सामञ्जस्य प्रतिस्थापनाय उन्मुखीकरणम् ।
3. भाषाशिक्षायाः स्व-उद्देश्यानां प्रति प्रयोजनानाञ्च परिचयप्रदानम् ।
4. शिक्षणे अधिगमे च विशिष्टसिद्धान्तानां प्रविधीनाञ्च ज्ञानप्रदानम् ।
5. बालकानां संवेगानां नियंत्रणाय, शैक्षिकमहत्वानाम् अभिज्ञानाय, चरित्रनिर्माणाय, मूल्य-गुण-मापनादि अनेकानेकसंप्रत्यायानाम् अधिगमे सहायताप्रदानम्।

अतः भाषाशिक्षणे ब्रूनर-जीन पियाजे-पावलव-थारण्डैकेत्यादिमहोदयैः अनेकानेकसिद्धान्तानां नियमानाञ्च प्रतिपादनं कृतं, परन्तु तत्र नैकशास्त्रीयप्रविधीनां सम्प्रत्ययानाम् उपरि एकदा विशिष्टरूपेण दृष्टिपातः भवेत् । अतः भाषाशिक्षणे उत्कृष्टशास्त्रीयसिद्धान्तानां मनोवैज्ञानिकसंप्रत्ययप्रतिमानानि अधोलिखिते अनुक्रमे द्रष्टव्यानि ।

**वंशानुक्रमानुसारं मनोवैज्ञानिकभाषाशिक्षणसंप्रत्ययः -**

अनुक्रमेऽस्मिन् भाषाशिक्षणसिद्धान्ते शास्त्रेषु वर्णितः संप्रत्ययः विविच्यते यत् यस्य आनुवांशिकीप्रकृतिः यथा भवति तथा एव तस्य अधिगमस्वभावः भवति। सः स्ववंशानुगुणम् एव आचरणानाम् अनुसरणं करोति । सः अपरेण सह यथा व्यवहरति सः धर्मः तस्य वंशपरम्परया एव प्राप्यते। मानवः वंशानुगुणम् एव कस्याऽपि विषयस्य संज्ञानं प्राप्नोति। एतादृशः मनोवैज्ञानिकसंप्रत्ययः अस्माकं शास्त्रेषु विद्यते। अतः भाषाशिक्षणे वंशक्रमानुसारमेव मनोवैज्ञानिकाधिगमप्रदानसंप्रत्ययः निर्देशनीयः।

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीसमाः ।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ।।
अथवा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ।। इति ।।

**व्यक्तिगतभिन्नतायाः मनोवैज्ञानिकभाषाशिक्षणसंप्रत्ययः -**

भाषाशिक्षणप्रक्रमे शास्त्रीयमनोवैज्ञानिकसंप्रत्ययानां महत्वमधिकं वर्तते। करुणरसाचार्येण महाकविना भवभूतिना उत्तररामचरिते शिक्षायाः वैय्यक्तिकभिन्नतायाः मनोवैज्ञानिकसंप्रत्ययस्य वर्णनम् अतीव मार्मिकरूपेण चकार। यथा-

वितरति गुरुः प्राज्ञे विद्यां यथैव जड़े न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा।
भवति हि पुनर्भूयान् भेदः फलं प्रति तद्यथा प्रभवति शुचिरविबिम्बग्राहे मणिर्न मृदादयः।। इति।।

**अधिगमप्रक्रियायाः मनोवैज्ञानिकभाषाशिक्षणसम्प्रत्ययः -**

अधिगमप्रक्रियाप्रकरणे मनोवैज्ञानिकशिक्षणसंप्रत्यये आत्मसाक्षात्कारः आवश्यको भवति। आत्मसाक्षात्कारेण शिक्षणाभ्यासः क्रियते, तदा शिक्षणाधिगमः अत्यन्तप्रभावपूर्णः भवति । यत्र विनयशीलता-जिज्ञासा-सेवाभावः प्रामुख्येन अन्तःकारकाणि भवन्ति । आत्मज्ञानाय अधिगमाय वा शास्त्रीयमनोवैज्ञानिकसंप्रत्ययानामोपरि ध्यानाकर्षणम् अवश्यं भवेत्।

**मानसिकस्वास्थ्यमनोवैज्ञानिकभाषाशिक्षणसम्प्रत्ययः -**

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।
युक्तस्वप्नावबोधस्य योगो भवति दुःख हा।। इति।।

एतद् अतिरिच्य अस्माभिः भारतीयशास्त्रीयपरम्परया ऋषिभिः गुरुजनेभ्यश्च प्राप्तविधिप्रविधीनाञ्च अनुप्रयोगापेक्षात् अनन्यविधीनां वर्णनम् अभवन्। यथा-

- शिक्षणविधयः मनोवैज्ञानिकभाषाशिक्षणसम्प्रत्ययः।
- निर्देशनपरामर्शस्य मनोवैज्ञानिकभाषाशिक्षणसम्प्रत्ययः।
- विशिष्टबालकस्य मनोवैज्ञानिकभाषाशिक्षणसम्प्रत्ययः।
- पाठ्यक्रमस्य निर्माणमनोवैज्ञानिकभाषाशिक्षणसम्प्रत्ययः।

**भाषाशिक्षणे मनोवैज्ञानिकसंप्रत्ययानाम् अधिगमापदानि -**

(क) भाषाशिक्षणे मनोवैज्ञानिकशिक्षणसंप्रत्ययानाम् विविधायामानामोपरि एकदा पुनर्विचारः भवेत्। यथा-

- शैक्षिकव्यवस्थायां वैश्विकपरिप्रेक्ष्येषु मनोवैज्ञानिकभाषाशिक्षणसम्प्रत्ययानामनुप्रयोगः भवेत्।
- छात्राणां योग्यतापरीक्षणे अन्तर्राष्ट्रीयस्तरे मानकीयमनोवैज्ञानिकगुणपरीक्षणस्य व्यवस्था भवेत्।
- शैक्षणिक-साहित्यिक-वैयाकरणक्षेत्रे मनोवैज्ञानिकभाषाशिक्षणसम्प्रत्ययानां विशेषबलप्रदानं भवेत्।
- छात्राणां परतन्त्रवैचारिकसंस्कृतेः सति आत्मवैचारिकतया मनोवैज्ञानिकभाषाशिक्षणस्य सम्प्रत्ययानामनुप्रयोगः करणीयः।

- छात्रेषु भाषा-अधिगमस्तरं परीक्षणे मनोवैज्ञानिकभाषाशिक्षणसम्प्रत्ययानाम् अनुगुणं प्रतिपुष्टेः व्यवस्था भवेत्।
- शिक्षणप्रशिक्षणसंस्थासु मनोवैज्ञानिकभाषाशिक्षणसम्प्रत्ययानाम् आधारितभाषाप्रयोगशालायाः प्रतिष्ठापनम् अनुप्रयोगञ्च आधिकाधिकं भवेत्।
- मनोवैज्ञानिकभाषाशिक्षणे आधुनिकमनोवैज्ञानिकसंप्रत्ययानामाधारितप्रश्नानामुपरि चिन्तनपद्धतेः विकासः भवेत्।
- भाषाशिक्षणे वर्तमनि भविष्ये वा का महती समस्या वर्तते, भविष्यति वा तेषां समग्रचिन्तनप्रक्रियायामोपरि पुनर्विचारः भवेत् ।
- भाषाशिक्षणे मनोवैज्ञानिकभाषाशिक्षणसम्प्रत्ययानाम् अनुप्रयोगः अधिकाधिकं भवेत्।
- स्वस्थनागरिकनिर्माणाय स्वस्थमनोवैज्ञानिकप्रतियोगीशिक्षणसंस्कृतिनां विकासः भवेत्। येन स्वस्थसमाजस्य स्थापनाभवितुं शक्नोति।

(ख) भाषाशिक्षणे निरपेक्षदृष्टिकोणैः तार्किक-वैचारिक-प्रायोगिकमनोवैज्ञानिकानां सम्प्रत्ययनामनुप्रयोगस्य आवश्यकता वर्तते। शिक्षणे अनेकानेकशैक्षिकमनोवैज्ञानिकायामानामोपरि विशिष्टचिन्तनस्य आवश्यकता अस्ति। यथा केवलम् एकस्मन्नेव पक्षे चिन्तनेन किमपि कार्यं सफलं न भवति ।

**उपसंहारः-**

प्राचीनभारतीयमनोवैज्ञानिकशिक्षणपद्धत्या सह, आधुनिक इलेक्ट्रोनिक्स संसाधनानां समन्वितानुप्रयोगः भवेत् । 'भाषाशिक्षणे शास्त्रीयमनोवैज्ञानिकसम्प्रत्ययानाम् अनुप्रयोगैः सह आधुनिकशिक्षायाः प्रमुखायामानां समन्वितानुप्रयोगः एव शिक्षायां नवाचारः भवति।

## अनुशीलित ग्रन्थसूची-


1. *Andrew Fraser, "Creativity and Innovation in Education: Moving Beyond Best Practice" Australian Council of Educational Leadership conference presentation, Sydney, Australia, 2007.*
2. *Uttararamacharitam, Chowkhambha Sanskrit Prathisthan, Varanasi.*
3. *www.ncsl.org.uk/networked-index.htm.*
4. *www.specialistschools.org.uk/default.aspa.*
5. *Richard Florida, The Rise of the Creative Class, Pluto Press, 2003.*
6. *Margaret Boden, The Creative Mind: Myths and Mechanisms, Basic Books, 1990.*
7. *Ken Robinson, The Element: How Finding Your Passion Changes Everything, 2009.*
8. *Ramayanam Gitapress Gorakhpur*
9. *Shrimad Bhagvadgeeta Gitapress Gorakhpur*

# साकल्यशिक्षा साकल्यविद्यालयस्य च सम्प्रत्ययः संसाधनानि उपलब्धता च

**परियोजनाकार्यस्य मार्गदर्शकः**

**डॉ. विनोदकुमारशर्मा**

**परियोजनाकार्यस्य सदस्याः**
**मम्मटवर्गः**

1. सोनालिका पात्र 2. ममता स्वाँई
3. नितेश वर्मा 4. पाठक भावेश
5. रविशंकर पाण्डेय 6. प्रमोद अशोक पोटे
7. सुजाता बेहरा 8. पद्मावति महाराणा

## साकल्यशिक्षा साकल्यविद्यालयस्य च सम्प्रत्ययः-

बालकस्य विशेषरूपेण ज्ञानं विद्यालयद्वारा एव अभिवर्धते तस्य भावनात्मकबौद्धिक-मानसिकतासुदृढा जायते तथा कौशलयोग्यतानां वृद्धिर्भवति । सामान्यविद्यालये पठनरतानां सामान्यछात्राणां क्षमतादिषु दृश्यमानाः महत्वहीनताद्याः परित्यज्य शिशुकेन्दिताध्यापनविधिभिः शिक्षाप्रदानम् । छात्राणां महत्त्व-हीनतादिभिः सम्बन्धं विना विद्यालयस्य सर्वेभ्यः छात्रेभ्यः विद्यालयीय-शैक्षिककार्यक्रमेषु भागग्रहणे सहायतां विदधाति साकल्यशिक्षा । विविधप्रकारकोत्तमाभ्यासैः सह उत्तमाध्यापनाय अधिगमाय च कारणभूता भवति इयं साकल्यशिक्षा साकल्यविद्यालयश्च । बालकानां विभिन्नावश्यकतां परिलक्ष्य पाठ्यक्रमस्य तथा कौशलानां निर्धारणं क्रियते । योग्यतां दृष्ट्वा शिक्षणविधीनां प्रयोगः क्रियते । तथा विशिष्टबालकानां कृते दक्षतापूर्वकप्रशिक्षणं प्रदीयते येन सकारात्मकवातावरणस्य निर्माणं भवति ।

## साकल्यशिक्षा साकल्यविद्यालयस्य च महत्वम् –

- अध्यापने सर्वे छात्राः समानाः भवन्ति । सम्पूर्णतया इयं शिशुकेन्द्रिता भवति ।
- छात्रेभ्यः सर्वेभ्यः विषयाधिगमे कार्यकरणे च समावसराः प्रकल्पनीयाः भवन्ति ।
- छात्र-अध्यापकेषु समूहलाभस्य सामुदायिकभावस्य च जागरणम् ।
- पाठ्यक्रमनिर्धारणे अभिभावकानां कृते अवसराः प्रकल्प्यन्ते ।
- छात्राणामावश्यकतानुसारं पाठ्यक्रमचयनाय अधिकारः ।

## साकल्यशिक्षा साकल्यविद्यालयस्य च प्रयोजनानि-

**विशिष्टानि प्रयोजनानि**– 1. नागरिकाधिकारः । 2. समताधिकारः । 3. समभावः ।

**सामान्यप्रयोजनानि**– 1. स्वाभिमानभावनानां जागरणम् । 2. वैविध्यमानवपरिवारस्य सदस्यता ।
3. वैविध्यपरिसरे समायोजनम् । 4. एकतासमूहभावस्य जागरणम् । 5. आजीविका ।
6. विभिन्नकौशलयोग्यतानां वृद्धिः । 7. आत्मसम्माननस्य परसम्माननस्य च भावः ।

**साकल्यशिक्षा शिक्षणविधयश्च -** आवश्यकतानुसारं दृश्यश्रव्योपकरणानां प्रयोगः ।

यथा - 1. अभिनयविधिः । 2. परियोजनाविधिः । 3. क्रीडाविधिः

**साकल्यशिक्षा पाठ्यक्रमश्च –**

- विज्ञानं तथा सामाजिकविज्ञानशिक्षणम् ।
- गणितशिक्षणम् । भाषाशिक्षणम् ।
- शारीरिकविज्ञानं योगप्रशिक्षणञ्च ।
- कला, नाटकम्, रङ्गमञ्चः ।

**साकल्यशिक्षा साकल्यविद्यालयस्य च संसाधनानि उपलब्धता च –**

**संसाधनानि उपलब्धता च**

मानवसंसाधनानि भौतिकसंसाधनानि

**मानवसंसाधनानि -**

एकस्मिन् साकल्यविद्यालये सामान्यविद्यालयमिव प्राचार्यशिक्षककर्मचारिणः इत्यादयः तु भवन्ति एव, एतान् अतिरिच्य चिकित्सकानां विशेषप्रावधानं, स्वच्छपरिष्काराय यथोपयुक्तं कर्मचारिणां व्यवस्था तथा विशेषनिरीक्षकाणां व्यवस्था भवति, येन बालकानां यथा समयं निरीक्षणं कर्तुं शक्नुयुः ।

**भौतिकसंसाधनानि–**

यथा सामान्यविद्यालयेषु भौतिकसंसाधनानि भवन्ति तत्रापि व्यवस्था भवति । बालकानाम् उपवेशनाय विशिष्टयान्त्रिक-आसन्दानां व्यवस्था ,विद्यालयपरिसरे चिकित्साकेन्द्रम् , शारीरिकस्वस्थतानिमित्तं योगकेन्द्रम् , जलशौचालयादीनां व्यवस्था, विशेषप्रावधान् – cctv, open head projector , दूरदर्शनम् , सङ्गणकः , श्यामपट्टः , भाषाप्रयोगशाला इत्यादीनि ।

**साकल्यविद्यालये सञ्चालनीयाः कार्यक्रमाः–**

**सर्वकारीयाभिकरणैः (Agencies of Government )**

- छात्रवृतिः ( Scholarship)
- प्रवेशशुल्कात्मुक्तिः (Fees exemption) निर्दिष्टायौ शैथिल्यञ्च (Age relaxation)
- आवागमनाय विशेषसौविध्यम् , यात्राव्यये उपदानं वा (Travelling concession)
- पाठ्यक्रमस्य संरचना । अध्यापकानां नियुक्तिः ।
- सौविध्यानां उपकरणानाञ्च प्रकल्पनम् । विद्यालयानां स्थापनं कक्षानामायोजनम् ।

**सर्वकारीयेतराभिकरणैः ( Non-government agencies)**

- चिकित्साशिबिरसंघटनम् (Medical camp organization)
- जागरूकताकार्यक्रमाः (Awareness program)
- सहयोगः (Co-operation)

**छात्रवृत्तिः**

छात्रवृत्तिः इत्यस्य आङ्गलभाषायाम् SCHOLARSHIP इति नाम भवति। सर्वकारेण छात्राणां कृते आर्थिकसहायतारूपेण धनं दीयते । छात्रवृत्तिः मेधावी छात्रेभ्यः एवं निर्धनछात्राणां कृते प्रदीयते । छात्रवृत्तिः चित्वा दीयते छात्रेभ्यः । छात्रवृत्तिः प्रदानेन छात्राः पठितुम् आग्रहिणः भवन्ति । अनया योजनया विद्यार्थिन उपकृताः भवन्ति ।

**शुल्कात्मुक्तिः (Fees Exemption) -**

शुल्कात्मुक्तिः मेधावीछात्राणां कृते, दिव्याङ्गानां कृते, अनुसूचितजाति-जनजातिछात्राणां कृते विविधप्रकारशुल्कात् पूर्णतया आंशिकतया वा मुक्तिः प्रदीयते । शुल्कात्मुक्तेः माध्यमेन छात्राणाम् उन्नति भवति । पठितुम् आग्रही भवति । येषां मेधाविच्छात्राणाम् आर्थिकसौविध्यं न भवति ते शुल्कमुक्ति-माध्यमेन अग्रिमपठने लाभान्विताः भवन्ति ।

**निर्दिष्टाऽऽयौ शैथिल्यम् (Age relaxation) -**

साकल्यशिक्षायाः फलितार्थः न केवलं छात्रवृत्तेः निशुल्कशिक्षायाश्च प्रसारेण उत्तमाध्यापकानां नियुक्तेः माध्यमेन सम्भवति । बालकः यस्मिन् भौतिक-सामाजिक-सांस्कृतिक-शैक्षिकपरिस्थितिषु जीवनं यापयति तदैव तस्य परिवेषः इति ज्ञायते । परन्तु यदि परिवेशः सम्यक् नास्ति तर्हि बालकस्य आयुः अधिकतरः भवति परन्तु तस्य बौध्दिकस्तरः अतिन्यूनः भवति । केषाञ्चन् बालकानां बुद्धिः , इन्द्रियक्षमता, बाह्यावयवाः च सामान्याः भवन्ति । परन्तु केचन कार्येषु क्षमतासु काठिन्यम् अनुभवन्ति । अत एव प्रथमतः आयुमापनं कृत्वा बौद्धिकस्तरानुगुणं पाठनीयाः । यदि बालकस्य आयुस्तरस्य न परीक्षणं भवति तर्हि –

- बालकः समीचीनरीत्या भावग्रहणे अवबोधे च अक्षमः भवति ।
- अवधानविस्तारः न्यूनः भवति । बुद्धिः विकासश्च मन्दं मन्दं जायते ।
- एकाग्रता सुष्ठु न भवति । स्मृतेः धारणायाश्च विस्तारः न्यूनः भवति ।

**आवागमनाय विशेषसौविध्यम् , यात्राव्यये उपदानं वा (Travelling facility/ concession) –**

आवागमनाय विशेषसौविध्यम्, यात्राव्यये उपदानं वा सर्वेषां कृते न भवति, एतत् तु केषाञ्चन् कृते भवति । यथा छात्राणां कृते, वयस्कानां कृते, रोगीणां कृते, दिव्याङ्गानां कृते भवति । छात्राणां कृते पञ्चाशत् प्रतिशतं Travelling Concession लभ्यते ।

**पाठक्रमसंरचना –**

विद्यालये सर्वेषां छात्राणां कृते एकः पाठ्यक्रमः भवितव्यः । एतत् द्वारा सर्वेछात्राः समानरूपेण सुविधां प्राप्नुवन्ति । आजीविकापरकस्य पाठ्यक्रमस्य निर्माणं करणीयम् । पाठक्रमस्य संरचना सरलसुगमबोधगम्या भवेत् । येन छात्राः शीघ्रतया अवगन्तुं शक्नुयुः । जीवनोपयोगी पाठ्यक्रमस्य संरचना करणीया । विशिष्टाणां सामान्यछात्राणाञ्च कृते तादृशस्य पाठ्यक्रमस्य निर्माणं करणीयं येन सर्वे छात्राः सरलतया अवगन्तुं शक्नुयुः ।

**सौविध्यानाम् उपकरणानाञ्च प्रकल्पनम् –**

विद्यालयपरिसराभ्यन्तरे विविधप्रकारकप्रकोष्ठाः सौविध्यानि चाऽनिवार्यतया प्रकल्पनीयानि भवन्ति । ते प्रकोष्ठाः सौविध्यानि च स्थूलतया चतुर्धा विभज्यते । तद्यथा -

- पाठ्यक्रमसम्बद्धानां प्रकोष्ठानां सौविध्यानि ।
- सह- पाठ्यक्रमसम्बद्धानां प्रकोष्ठानां सौविध्यानि ।
- प्राशासनिकसम्बद्धानां प्रकोष्ठानां सौविध्यानि ।
- न्यूनतम – सौविध्यानि चेति ।

**उपकरणानि (Tools) -** उपकरणानि नाम शिक्षणे सहायकानि वस्तूनि, तानि च यथा—श्यामफलकम् सुधाखण्डः मार्जनी सूचीदण्डादीनि।

**उपस्करणानां प्रकाराः -** उपस्करण-उपकरणानाञ्च त्रयः प्रकाराः भवन्ति । तानि च यथा -

- अत्यावश्यकानि – आसन्दाः , उत्पीठिकाः , श्यामफलकम् , सुधाखण्डः, मार्जनी , सूचीदण्डः
- अभीष्टानि- मञ्चः ,वेदिका ,सूचना-फलकम् , दण्डदीपः ,व्यजनानि , कपाटिकाः
- वैकल्पिकानि- Water basin , Dustbin .

**अध्यापकानां नियुक्तिः**

उत्तम-शिक्षकः छात्राणां बौद्धिकस्तरानुगुणम् आवश्यकतानुसारं ज्ञानप्रदाने कौशलविकासे अन्तर्निहितशक्तीनां बहिरानयने च सक्षमः भवति ।

**शिक्षकः नाम कः ?**

- व्यवहार-परिवर्तनकारः ।
- नागरिकनिर्माता ।
- ज्ञान-सूचनयोः प्रदाता ।
- समाजोद्धारकः ।

- कौशलविकासकर्ता।
- मित्रं मार्गदर्शकः दार्शनिकश्च।

**शिक्षकाणां नियुक्तिः**

- निर्दिष्ट-शैक्षिकयोग्यता।
- प्रशिक्षणयोग्यता।
- निर्दिष्टविषये प्रावीण्यम्।
- अन्यविषयेषु मौलिकज्ञानम्।
- शिक्षणे सम्प्रेषणे च कुशलता।
- प्रतियोगितापरिक्षायां साक्षात्कारे वा उत्तीर्णः भवेत्।
- निष्पक्षतयैव शिक्षकाणां नियुक्तिः।

**विद्यालयस्थापनं कक्ष्याऽऽयोजनञ्च –**

कक्ष्यायां साकल्यशिक्षायाः अन्तर्गते विद्यालयानां स्थापनं, कक्षाणाम् आयोजनम् अत्यन्तम् आवश्यकम् अस्ति। यदि कक्षाणामायोजनं सम्यक् नास्ति, तर्हि पठनसमये बहुबाधाविघ्नं समुत्पद्यते। अत एव निम्नलिखितसामग्री आवश्यकी अस्ति।

- छात्र◌ेभ्यः उपवेष्टुम् उपस्करणानि भवेयुः।
- छात्रेभ्यः Dual desks (15 degrees ) श्रेष्ठतमाः। Rocks in Dual desks।
- शिक्षकाय उत्पीठिका , सुधाखण्डः , मार्जनी, सूचीदण्डः .।
- Stands , almirah, desks, etc…..

विद्यालयस्य स्थापनाऽपि अत्युत्तमतया अनिवार्या। उत्तमविद्यालये कक्षाप्रकोष्ठः, पुस्तकालयः , कार्यालयः उद्यानम् सेवासदनम् सभागारः कलागृहम् इत्यादीनाम् अनिवार्यता भवति । प्राथमिकविद्यालयाय U, C, O, आकारे, माध्यमिकविद्यालयाय – C, E, H, I, L, N, O, T, U, आकारे, उच्चमाध्यमिकविद्यालयाय – I T H E N आकारे कक्ष्याणां निर्माणं भवेयुः। एवं प्रकारेण सौविध्यानाम् आवश्यकम् अपेक्षिता वर्तते। यदि एवं भावेन कार्यसम्पादनाय उत्तमरूपेण शिक्षा प्रदानं कार्य प्रचलति तर्हि साकल्यशिक्षा चरितार्थं भवतीति।

**चिकित्साशिबिरसंगठनम् -**

मानवस्य कृते स्वच्छता स्वास्थ्यमुभयमपि अत्यधिकम् आवश्यकं वर्तते। यदा स्वच्छता भवति तदा स्वस्थता भवति। स्वास्थ्यपरिरक्षायैः भारतसर्वकारेण वा राज्यसर्वकारेण चिकित्साविभागतः चिकित्साशिबिराण्यपि आयोज्यन्ते। शिबिराणि ग्रामे नगरे विद्यालये विविधस्थानेषु भवन्ति।

**चिकित्साशिबिराणाम् आयोजनस्य आवश्यकता –**

विद्यालये अधिकसंख्यकाः छात्राः पठन्ति । तेषु केचन समृद्धपरिवारतः आगच्छन्ति ।तत् पठनार्थं स्वास्थ्यम् अत्यधिकं आवश्यकं वर्तते । स्वास्थ्यरक्षणाय एव विद्यालये सार्वभौमिकतया सर्वेषां कृते चिकित्साशिबिराणि आयोज्यन्ते । छात्रेषु बह्व्यः वेदनाः भवन्ति, यथा- उदरवेदना ,शिरोवेदना, कर्णवेदना, ज्वरः इत्यादयः सामान्यरोगाः भवन्ति । तेषां प्राथमिकोपचाराय निशुल्कं चिकित्साशिबिरम् आयोज्यते। एवञ्च विद्यालये ये क्रीडकाः भवन्ति । तेषां कृतेऽपि प्राथमिकोपचारशिबिराणाम् आयोजनदायित्वं दीयते। प्रतिमासं तु शिबिरस्य आयोजनम् उत्तमं भवति ।

**जागरुकताकार्यक्रमाः (Awareness programme)**

जागरुकता अर्थात् सजगजीवनम्, चैतन्यपूर्णं जीवनम् , चिन्तनाधारितजीवनम् , आसंसारस्य ज्ञानम् , उचितानुचितस्य ज्ञानम् , जीवनलक्ष्यस्य ज्ञानम् इत्यादिनां विविधविषयाणां ज्ञानं जागरुकता इत्यभिधीयते । साकल्यशिक्षायामपि विविध जागरुकता कार्यक्रमाः आयोजनीयाः । तेन छात्राणां संसारस्य विविध गतिविधीनां ज्ञानं भवति । तदर्थं एते कार्यक्रमाः साकल्यविद्यालये आयोजनीयाः । यथा – राष्ट्रियैकता , स्वच्छभारताभियानम् , पर्यावरण-जागरुकता, आत्मजागरुकता , सामाजिकजागरुकता , स्वास्थ्यं, भष्टाचारः, संत्रासवादः ,जन-धन-योजना, महिला सशक्तीकरणम् इत्यादयः ।

**सहयोगः**

सहयोगः नाम ये जनाः विना शुल्केन, सर्वकारस्य आदेशं विना जनानां सहायतां कुर्वन्ति । एकः अन्यस्य सहयोगेन देशस्य मनुष्यस्य उन्नति भवति । गृहे सहयोगस्य आदानप्रदानं भवति । NGO संस्था , अनौपचारिकशिक्षासंस्थायाः सदस्याः जनानां कृते शुल्कं विना सहाय्यं कुर्वन्ति ।

**निष्कर्षाः**

साकल्यशिक्षायां सर्वेषां विकासः भवति। अनया समाजे राष्ट्रे च समतासद्भावादिगुणानां विकासः भवति । साकल्यशिक्षया लोकतन्त्रमभिवर्धते, सुरक्षितञ्च भवति । साकल्यशिक्षा शिक्षाशास्त्रिणां बुद्धिमताञ्च नूतनचिन्तनात्मकावधारणा वर्तते । अनया वैय्यक्तिकजीवने समाजिकराष्ट्रियजीवने च समृद्धि भवति । जनेषु जनशिक्षा भवति अनया जनशिक्षणमपि भवति । साकल्यशिक्षा वञ्चितानां दलितानां विशिष्टानां बहिष्कृतानाञ्च कल्याणं कल्पयति ।

**सन्दर्भग्रन्थाः**


1. *शर्मा , अलका – समावेशी शिक्षा ।*
2. *नागपाल चिराग, हुड्डा माधुरी, सांगवान सुरेखा – विशिष्टशिक्षा ।*
3. *विकिपीडिया- समावेशी शिक्षा ।*

# मानवाऽधिकाराणां संरक्षणे राष्ट्रियमानवाऽधिकाराऽऽयोगस्य भूमिका

**परियोजनाकार्यस्य मार्गदर्शकः**

**डॉ. वि. यस् . वि. भास्कर रेड्डि**

**परियोजनाकार्यस्य सदस्याः**
**आनन्दवर्धनवर्गः**

1. अनिल किशन 2. कबिता जेना
3. सुरेश जोशी 4. बनवारीलाल नंगवाडा
5. सरोजकुमार महाकुड 6. प्रवेश पाण्ड्या
7. बिनायक बारिक 8. मालती दलाई

**मानवाऽधिकारः(Human Rights)-**

मनुष्यः प्रकृतितया सामाजिकः वर्तते । अतः केचन प्राकृतिकाः अधिकाराः सन्ति । ते अधिकाराः मनुष्याणां जन्मजाताऽधिकाराः, एते अधिकाराः कालक्रमेण मानवसभ्यतायाः उपरि आगताः सन्ति। परन्तु एतेषाम् अधिकाराणां व्यवहारः आवश्यकताश्च साम्प्रतिकसमाजे अत्यन्तमावश्यकम् । मानवाधिकारः इत्युक्ते मानवस्य कृते प्रदीयमानः अधिकारः एव । अतः ते सर्वेऽपि अधिकाराः मानवाऽधिकारत्वेन उच्यन्ते, यैः व्यक्तेः जीवनं स्वतन्त्रता , समानता एवञ्च प्रतिष्ठायुक्तः भवति । मानवाऽधिकारस्य का आवश्यकता इति कथनेन ज्ञायते यत्- देशेऽस्मिन् विद्यमानानां जनानां सुखमयजीवनयापनाय, स्वजीवने संवर्धनाय, स्वेच्छया कार्यकरणाय, भ्रमणाय, अभिव्यक्तये चास्य आवश्यकता वर्तते ।

मानवाधिकाराणां स्वरुपनिर्णयः कश्चन कष्टकरः विषयः वर्तते । कारणं यत् प्रत्येकं राष्ट्रस्य नियमप्रणाली, अर्थव्यवस्था, सामाजिकव्यवस्था, राजनैतिकव्यवस्था, सांस्कृतिकव्यवस्था च भिन्नाः वर्तन्ते । अतः प्रत्येकं मानवेन जाति-धर्म-वर्ण-भेदानामपि स्वभावेन प्राप्ताः अधिकाराः मानवाऽधिकाराः इत्युच्यन्ते । एते अधिकाराः मनुष्यस्य मौलिकावश्यकतानां कृते विद्यमानाः सन्ति । पुनः ये अधिकाराः मानवसमाजस्य मर्यादायाश्च संरक्षणे सहायकाः भवन्ति, ते एव अधिकाराः मानवाऽधिकाराः उच्यन्ते।

**मानवाधिकारान्दोलनस्योत्पत्तिः (Genesis of Human Rights Movement)**

भारते औपनिवेशिककाले 1820 तमे वर्षे मानवाधिकारान्दोलनसम्बद्धसूचनाः ज्ञातुं शक्यन्ते । तस्मिन् समये जनाः मानवाऽधिकाराणां विषये सचेतनाः नासन् । तदा औपनिवेशिक-शासनस्य अमानवीयकार्याणाम् एवं सामाजिककुरीति-कुप्रथादीनां सीमावृद्धिः जाता आसीत् । यथा- i) बाल्यविवाहः ii) देवदासीप्रथा iii) बहुविवाहः iv) सतीप्रथा v) शिशुबली vi) नरबली इत्यादयः। उपर्युक्त-अमानवीय-सामाजिक-कुरीति-कुप्रथादीनां द्वारा यदा मानवाऽधिकाराणामुपरि प्रभावः अपतत् , तदा मानवाधिकाराणां सुरक्षायै ब्रह्म-समाजस्य संस्थापकः राजा-राममोहन-राय महोदयेन मानवाधिकारान्दोलनस्य शुभारम्भं कृतम् ।

मानवाधिकारस्य प्रभावेन सर्वप्रथमं 1823 तमे वर्षे जनरल लार्ड-विलियम् बैंटिक महोदयः सती-प्रथायाः अधिनियामकरुपेण उच्छेदं कृतवान् । विशेषतः महिलाधिकाराणां सुरक्षायै मानवाधिकारः आन्दोलनस्य पृष्ठभूमिः । एवं प्रकारेण भारतस्वाधीनतायाः प्राप्तिर्पूर्वं एवञ्च स्वाधीनतायाः प्राप्त्यनन्तरं यदा यदा मानवाधिकाराणामुपरि संकटमपतत्, तदा तदा विविधैः सामाज-सुधारकैः विज्ञैश्च स्वाधीनतान्दोलनेन साकं मानवाधिकारान्दोलनं कृतम् । यथा-

| **क्र.** | ***आन्दोलनस्य नाम*** | ***प्रमुख-नेता*** | **वर्षम्** |
|---|---|---|---|
| 1 | ब्रह्मसमाजः | राजाराममोहनरायः | 1828 |
| 2 | प्रार्थनासमाजः | आत्मारामपांडुरंगः | 1867 |
| 3 | आर्यसमाजः | दयानन्दसरस्वती | 1875 |
| 4 | अलिगड-आन्दोलनम् | सैयदअहमदखान | 1875 |
| 5 | रामकृष्ण-मिशनः | स्वामीविवेकानन्दः | 1897 |
| 6 | होमरूल-आन्दोलनम् | एनीबेसेण्ट-बालगंगाधरतिलकश्च | 1916 |
| 7 | जालियॉवालाबाग हत्याकाण्डः | जनरल-डायर | 1919 |
| 8 | खिलाफत-आन्दोलनम् | महात्मागान्धिः | 1920 |
| 9 | पूर्णस्वराजस्य घोषणा | जवाहरलाल-नेहरू | 1930 |
| 10 | भारतस्वाधीनता आन्दोलनम् | महात्मागान्धि प्रभृतयः | 1920-47 |

मानवाऽधिकारस्य महत्वं मुख्यतः द्वितीये विश्वयुद्धात्परं दृश्यमानम् आसीत् । तदानीन्तन काले संयुक्तराष्ट्रसंघस्य महासभया पारितेन मानवाधिकाराणां सार्वभौमिकघोषणा (UDHR / Universal Declaration of Human Rights 1948) मानवाऽधिकारः इति विषये प्रथमतया दृष्टिनिक्षेपा कृता वर्तते ।

**मानवाऽधिकाराणां सार्वभौमिकघोषणायामुल्लिखिता अधिकाराः (Declaration of UDHR)-**

1. सर्वे मानवाः स्वतन्त्राः समुत्पन्नाः वर्तन्ते अपि च गौरवदृशा अधिकारादृशा च समानाः एव वर्तन्ते। एते सर्वे चेतनातर्कशक्तिभ्यां सुसम्पन्नाः सन्ति । अपि च सर्वेऽपि बन्धुत्त्व-भावनया परस्परं व्यवहरन्तु ।
2. अस्याम् अभिघोषणायां निर्दिष्टाः सर्वेऽपि अधिकाराः सर्वाण्यपि च स्वातन्त्र्याणि विनैव जाति-वर्ण-धर्म-लिंग-भाषा-राजनैतिक-तदितर-मन्तव्यादिभेदम्, राष्ट्रियं सामाजिकाधारं तदितरः स्तरञ्च अविगण्य, अधिगन्तुं सर्वोऽपि जनः प्रभवति । एतदतिरिक्तं कस्याश्चिदपि प्रभुसत्तायाः नियमान्तर्गतं, स्वाधीनस्य आत्मप्रशासने परतन्त्रस्य वा वास्तव्यस्य प्रदेशस्य देशस्य वा राजनैतिक-सीमा-निबन्धनान्ताराष्ट्रिक-स्तराधारेण न कोऽपि भेदः विधास्यते ।
3. सर्वोऽपि जनः जीवन-स्वातन्त्र्यं सुरक्षाधिकारं संधते ।
4. न कमपि जनं दासत्त्वेन पराधीनत्वेन वा धारयितुमनुज्ञास्यते, दासव्यापारः पूर्णरुपेण प्रतिषिद्धः स्थास्यति ।

5. न कमपि जनं विरूद्धावमानननात्मकं व्यवहारं दण्डं वा क्रूरममानवीयं प्रतोदनं वा प्रवर्तयितुम् अनुज्ञास्यते।

6. विधेः समक्षे सर्वेपि जनः सर्वत्र अभिज्ञातुम् अधिकारं संधत्ते।

7. विधेः समक्षे सर्वेऽपि तुल्याः समानाश्च वर्तन्ते। अपि च विनैव कमपिभेदं विधेः तुल्यं संरक्षणमवाप्तुम् अर्हन्ति। अस्याः अभिघोषणायाः उल्लंघने कमपि भेदं एतादृग्भेदं वा अभिलक्ष्यं कामपि चेष्टां विरुध्यसमान-संरक्षणार्हाः सर्वेऽपि वर्त्तन्ते।

8. विधिना संविधानेन वा प्रदत्तानां मौलिकाधिकाराणामुल्लंघनकार्याणां कृते, योग्यैः राष्ट्रीय-न्यायपीठैः संस्तुतानां प्रभाविनां समुपायानां प्रयोगार्थं हि सर्वोजनोऽस्ति।

9. न कोऽपिजनः स्वेच्छया निग्रहितुं धर्तुं निष्कासयितुं वा अनुज्ञास्यते।

10. सर्वेऽपि जनाः स्वं विरुध्य प्रवर्तितस्य कस्यापि आपराधिकाक्षेपस्य, स्वीयाधिकाराणां दायित्वानाञ्च विनिर्धारणस्य च कृते स्वाधीनेन निष्पक्षेण च न्यायपीठेन विधीयमानस्य समुचितस्य सार्वजनिकस्य श्रवणस्य च कृते सर्वोऽपि जनः पूर्णां समानतां धारयन्ति।

11. प्रत्येकमपि जनः विधेरनुसरणेण यावदवधि सार्वजनिकाभियोगप्रकरणे प्रमुखापराधसिद्धिं नैव भजते, तावत्पर्यन्तं निर्दुष्टः इत्यामंस्यते। अपि च स्वीय-प्रतिरक्षार्थं तेन जनेन सर्वमपि आवश्यक-प्रतिभूतिजातम् उपपादनीयं वर्तते। अन्ताराष्ट्रिकस्य राष्ट्रिकस्य च विधेरन्तर्गतं प्रखुखापराध-निष्प्रभावकस्य कस्यापि कार्यस्य कारणात् न कोपि प्रमुखापराधार्थम् अपराधीति गणयिष्यते। न वा प्रमुखापराधकाले प्रवर्तनीयदण्डदानात् नाधिकतरो दण्डः कस्मिश्चिदपि प्रवर्तनीयो भविता।

12. द्वादशानुच्छेदः न कस्यापि व्यक्तिगते पारिवारिके च जीवने, गृहे, पत्रव्यवहारे च स्वेच्छया हस्तक्षेपोऽनुज्ञास्यते, न वा कस्यापि ख्यातिं सम्मानं वाक्रान्तुं कोऽपि शक्ष्यति। एतादृक् हस्तक्षेपाक्रमणानि विरुध्य प्रत्येकमपि जनः विधिसंरक्षणं संधते।

13. प्रत्येकमपि राष्ट्रस्य सीम्नि आवासस्य गमनागमनस्य च स्वातन्त्र्याधिकारं प्रत्येकमपि जनः संधारयति। स्वदेशोपेतं कमपि देशं त्यक्तुं स्वदेशं च प्रत्यागन्तुं प्रत्येकमपि अधिकृतोऽस्ति।

14. उपद्रवेभ्यो रक्षितुमन्यदेशेषु शरणमधिगन्तुं प्रत्येकमपि अधिकारं संधत्ते। संयुक्तराष्ट्रसंघस्य सिद्धान्तानाम् उद्देश्यानाञ्च प्रतिकूलकार्येभ्यः राजनीतिकेतरापराधेभ्यश्च समुत्थितेषु वास्तविकाभियोग-प्रकरणेषु अधिकारोऽयं नैव प्रभविता।

15. न कोऽपि स्वेच्छया स्वीयराष्ट्रियतातो वञ्चितः, न स्वीयराष्ट्रीयतापरिवर्तनाधिकारात्प्रत्याख्यातो भवेत्

16. जाति-धर्म-राष्ट्रीयता-नियमनं विनैव पूर्णवयस्काः स्त्री-पुरुषाः परिवारं प्रतिष्ठापयितुं विवाहाधिकारवन्तो वर्तन्ते। विवाहार्थं, विवाहावसरे विवाहविच्छेदे वा ते समानाधिकारान् संधारयन्ति। विवाहेच्छुकानां पूर्णस्वतन्त्र-सहमत्यैव विवाहसंस्कारः अनुष्ठेयोऽस्ति। परिवारस्तु समाजस्य स्वाभाविको मौलिकश्च वर्गी

यैकांशो वर्तते। अपि चायं समाजेन राष्ट्रेण वा संरक्षणीयोऽस्ति।

17. प्रत्येकमपि अन्येषां सहयोग-पुरस्सरमेकाकी एव वा सम्पत्संधारण-स्वामित्वाधिकारं संधत्ते। न कोऽपि स्वेच्छया स्वीयसम्पत्स्वामित्वाधिकारात् वञ्चितं भवेत्।

18. प्रत्येकमपि विचाराणां चेतनायाः धर्मस्य च स्वातन्त्र्याधिकारं संधत्ते । अस्मिन् अधिकारे स्वीयं धर्मं विश्वासं वा शिक्षयितुम् अभ्यस्तुम् अर्चितुं परिपालयितुं वा वैय्यक्तिके सामाजिके च जीवने , अन्यैश्च सह सामुदायिकजीवने एकाकिना वा स्वीयं धर्मं विश्वासं स्वातन्त्र्यञ्च परिवर्तयितुमपि प्रत्येकं जनः स्वातन्त्र्यं धारयति।

19. प्रत्येकमपि मन्तव्याभिव्यक्त्योः अधिकारं संधत्ते । सीमाव्यवधानम् अविगणय्य, केनापि सञ्चार-माध्यमेन विचाराणां सूचनानाञ्च आदानप्रदानार्थं विनैव हस्तक्षेपं कश्चिदपि जनः स्वीयमन्तव्य संधारणार्थम् अधिकारेऽस्मिन् अर्हिष्यते।

20. प्रत्येकमेव जनः शान्तिपूर्णरीत्या सम्मिलितुं संघटनानि च विरचयितुं अर्हो वर्तते। केनचिदपि संघटनेन सह आत्मानं संयोजयितुं न कोऽपि विवशीकर्तुं शक्यते।

21. स्वीयराष्ट्रस्य प्रशासने प्रत्यक्षरीत्या अथवा निष्पक्षनिर्वाचित-प्रतिनिधि-माध्यमेन प्रत्येकं जनः सहभागिभवितुमर्हति । प्रत्येकं जनस्तदीये राष्ट्रे लोकसेवायाः तुल्यमधिकारं संधत्ते । लोकेच्छया प्रशासनाधिकारे विरचयिष्यते, इयमिच्छा कालबद्धैः नियमोचितैश्च निर्वाचनैः प्रकाश्यम् आगन्त्रीः, इमानि निर्वाचनानि च वैशिकं तुल्यं गुप्तं मतदानेन अथवा तुल्यमेवेतरेण मतदानविधिना भवितारः।

22. प्रत्येकमेव जनः सामाजिकत्वात् , सामाजिक-सुरक्षायाः अधिकारं संधारयति। असौ हि राष्ट्रीयप्रयासेन आन्तराष्ट्रीयसहयोगेन च प्रत्येकं राज्यस्य संघटनसंसाधनानुरूपं स्वीयविभाज्यार्थिक-सामाजिक-सांस्कृतिकाधिकाराणां प्रतिष्ठायै, स्वीयव्यक्तित्वस्य उन्मुक्त (सर्वाङ्गीण) विकासार्थञ्च संसिद्धिमर्हति।

23. प्रत्येकमपि निवृत्तितां विरूध्य संरक्षणम् अवाप्तुम् , अनुकूलकार्यस्थितीनां न्यायीकरणमवाप्तुं स्वतन्त्र-वृत्तिता-चयनं विधातुं कार्याणि चानुष्ठातुमधिकारं धत्ते । प्रत्येकं विनैव भेदं समकार्यार्थं समानवेतनमानं (पारिश्रामिकं) प्राप्तुम् अधिकृतोऽस्ति । कार्यनिरतः प्रत्येकमपि जनः स्वस्य स्वीयपरिवारस्य च मानवीय-गौरवयुक्तस्य अस्तित्वस्य संरक्षणार्थं समुचितानुकूल-पारिश्रमिकादानस्याधिकारं धारयति। आवश्यके सति चासौ सामाजिक-संरक्षणस्य अन्योपायैः एतत्पूरयितुम् अर्हिष्यते । स्वीयहितानां संरक्षणार्थं प्रत्येकं श्रमिकसंघटनैः साकमात्मनं संयोजयितुमेतादृक् संघटनं वा संरचयितुम् अधिकृतोऽस्ति।

24. कार्यहोराणां समुचित-नियमनपुरस्सरम्, सवेतनञ्च नियतावधिकावकाशेन सह विश्रामाधिकारः प्रत्येकस्मै प्रदेयोऽस्ति।

25. प्रत्येकं जनः खाद्य-वस्त्र-आवास-चिकित्सोपचर्यादिभिः आवश्यकसामाजिक-सेवाभिश्च सह स्वस्य स्वीयपरिवारस्य च अनामयतायै स्वस्थतायै च पर्याप्तं जीवनस्तरं संधारयितुम् अधिकृतोऽस्ति । अपि च नियन्त्रण-शून्यासु परिस्थितिषु अन्यस्मिन् जीविकोपार्जनाभावे वृद्धावस्थायां, वैधव्यप्राप्तौ, अयोग्यतायां,

रुग्णतायां निवृत्तितायां च सत्याम्, प्रत्येकमपि सुरक्षाधिकारं सन्धारयति । मातृत्वस्य शिशुत्वस्य च कृते विशिष्टसाहाय्योपचर्याजातं प्रदेयं भविता । अवैधाः वैधाश्च सर्वेऽपि बालाः, समानं सामाजिकं संरक्षणमवाप्तुम् अर्हिष्यन्ति ।

26. प्रत्येकमपि जनः शिक्षाधिकारं संधत्ते । प्राथमिकेषु मौलिकस्तरेषु च शिक्षा निःशुल्का वर्तिता । प्राथमिकी शिक्षा अनिवार्या भविता । प्राविधिकी व्यावसायिकी च शिक्षा सामान्यतया उपपादयिष्यते । अपि च उच्चतरशिक्षा सर्वेषामपि कृते योग्यताधारेण समानरूपेण प्राप्या भविता । शिक्षैषा मानवीयव्यक्तित्वस्य सर्वाङ्गीण-विकासं प्रति निर्दिष्टा भविता । अपि चैषा मौलिक-स्वातन्त्र्याणां मानवाऽधिकाराणां च कृते सम्मान-सम्वर्धिका भविता । सर्वेस्वपि राष्ट्रेषु जातीयेषु धार्मिकेषु वा शिक्षैषा सख्यसहिष्णुता-सद्भाव-संवर्धिका वर्त्तिता । अपि चैषा शान्ति-संधारणार्थं संयुक्त-राष्ट्रसंघस्य कार्याणि इतोऽप्यग्रे प्रसारयिष्यति । बालानां कृते प्रदेयां शिक्षां चेतुं पितरौ प्राथम्याधृतम् अधिकारं धारयतः ।

27. विविधकलानाम् आनन्द-सन्दोहमनुभवितुं वैज्ञानिकपरिणामान् लाभाञ्च संविभक्तुं विभिन्नानां समुदायानां सांस्कृतिक-जीवने च स्वतन्त्रतया सहयोक्तुं सर्वोऽपि जनः अधिकारयुक्तोऽस्ति । कस्यापि वैज्ञानिक-साहित्यिक-कलात्मकानां निर्माणानां यस्यासौ रचयितास्ति, नैतिकानां वस्तुगतानां हितानां संरक्षणार्थं प्रत्येकं जनोऽधिकारं संधत्ते ।

28. अस्याम् अभिघोषणायां निर्दिष्टानाम् अधिकाराणां स्वातन्त्र्याणाञ्च प्राप्तये सामाजिक-अन्ताराष्ट्रिक-व्यवस्थायाञ्च पूर्णतया एतान् प्राप्तुं प्रत्येकमपि जनोऽर्हिष्यते ।

29. प्रत्येकं जनः समुदायस्य कृते कर्तव्यदायित्वं धारयति, येन हि स्वीय-व्यक्तित्वस्य पूर्ण-स्वतन्त्रः विकासः सम्भवेत् । स्वीयाधिकार-स्वातन्त्र्याणां क्रियान्वयने प्रत्येकं जनः अन्येषामधिकार-स्वातन्त्र्याणि प्रति समुचिताभिरज्ञानादर-संरक्षणदृशा नूनं व्यवहरिष्यति । अपि चासौ लोकतान्त्रिक-समाजे सामान्यकल्याणं सार्वजनिक-व्यवस्थां नैतिकतायाः समुचितावश्यकताश्च प्रतिपूर्णं दायित्वं निर्वक्ष्यति । एतेऽधिकाराः एतानि स्वातन्त्र्याणि च संयुक्तराष्ट्रसंघस्य उद्देश्यानि सिद्धान्ताञ्च विरुध्य न कथमपि प्रयोक्ष्यन्ते ।

30. अस्याम् अभिघोषणायां निर्दिष्टानाम् अधिकाराणां स्वातन्त्र्याणाञ्च न कोऽप्यंशः प्रणाश-लक्ष्याधारेण किमपि कार्यमनुष्ठातुं एतादृक्कार्यानुष्ठानार्थं वा कस्यचित् राष्ट्रस्य वर्गस्य जनस्य वा समीहितसिद्ध्यर्थम् अन्यथा व्याखातुं नैव शक्ष्यते ।

**राष्ट्रियमानवाऽधिकाराऽऽयोगः( NHRC / National Human Rights Commission) -**

आदौ 1948 तमे वर्षे मानवाऽधिकारस्योपरि संयुक्तराष्ट्र-संघस्य महासभया मानवाऽधिकाराणां *सार्वभौमिकघोषणा* (UDHR) कृता । मानवाऽधिकार-सार्वभौमिकघोषणायाः सदस्याः मानवं नागरिकत्वम् आर्थिकं सामाजिकाऽधिकाराञ्च प्रोत्साहनं दातुम् आग्रहं प्रकटयन्ति । राष्ट्रियमानवाधिकारायोगः मानवाधिकारसंरक्षणाध्यादेशः (1993) इत्यस्यानुसारम् अक्टुबर मासस्य द्वादशदिनाङ्के संस्थापितः । अयमायोगः मानवाऽधिकारसंरक्षणाऽधिनियमस्य द्वारा (Protection of Human Rights Act /

PHRA ) 1993 तमे वर्षे सप्टेम्बरमासस्य 21 तमे दिनाङ्के वैधानिकाधारः प्राप्तो वर्तते। अस्मिन् वर्षेऽपि भारतसर्वकारः अस्याधिनियमस्य माध्यमेन मानवाधिकाराणां संरक्षणे मुख्यरुपेण दायित्वं निर्वहणम् आरब्धम् । एवञ्च राष्ट्रियमानवाऽधिकाराऽऽयोगः *पैरिससिद्धान्तस्य* अनुरुपः भवति, यः राष्ट्रियमानवाऽधिकार-संस्थानानां स्थापनायै तेषां सञ्चालनाय च संघटितो वर्तते । भारते राष्ट्रियमानवाऽधिकाराऽऽयोगः मानवाधिकाराणां संरक्षणाय, प्रचारप्रसाराय प्रमुखं दायित्वं निर्वहति।

NHRC इत्यऽस्मिन् संघठने एकाध्यक्षः अष्टसंख्यकाः सदस्याश्च (1+8) भवन्ति। ते यथा-

1. एकः अध्यक्षः — सर्वोच्चन्यायालयस्य भूतपूर्वः वर्त्तमानः वा मुख्यन्यायाधीशः।
2. एकः सदस्यः — वर्त्तमानः अथवा भूतपूर्व-सर्वोच्चन्यायालयस्य न्यायाधीशः।
3. अन्यःसदस्यः — वर्त्तमानः अथवा भूतपूर्वः उच्चन्यायालयस्य मुख्यन्यायाधीशः।
4. द्वौ सदस्यौ — न्यायक्षेत्रे सुज्ञातौ विद्वांसौ।
5. एकः सदस्यः — राष्ट्रिय-महिला-आयोगस्य अध्यक्षः।
6. एकः सदस्यः — राष्ट्रियाऽनुसूचितजाति-आयोगस्य अध्यक्षः।
7. एकः सदस्यः — राष्ट्रियाऽनुसूचितजनजाति-आयोगस्य अध्यक्षः।
8. एकः सदस्यः — राष्ट्रियाऽल्पसंख्यकाऽऽयोगस्य अध्यक्षः।

अस्यां NHRC संस्थायां विशेषतः अध्यक्षेन साकम् अन्येषां सदस्यानां कार्यकालः पञ्चवर्षाणि यावत् भवति। तदनन्तरं नूतनाध्यक्षाः सदस्याश्च नियुक्ताः भविष्यन्ति।

**मानवाऽधिकाराणां संरक्षणे *रा.मा.अ.आयोगस्य* भूमिका-**

NHRC इत्युक्ते राष्ट्रियमानवाऽधिकाराऽऽयोगः (National Human Rights Commission) इति। अस्याऽऽयोगस्य स्थापनानन्तरं मानवाधिकाराणाम् उपरि तत्सम्बद्धगणनानाम् उपरि स्वव्यापकप्रभावं प्रदर्शयति। राष्ट्रियमानवाऽधिकाराऽऽयोगः स्वतन्त्रताऽखण्डताभ्यां मानवप्रतिष्ठां संरक्षयति। आभारतं यत्र कुत्रापि मानवाऽधिकाराणां हननं समस्याः वा जायते तदानीं राष्ट्रियमानवाऽधिकाराऽऽयोगः दृढसंकल्पतया स्वीय-सफलतापूर्वकं जनादेशेन सह प्राथमिकतामावहति।

भारते राष्ट्रियमानवाऽधिकारऽऽयोगः प्रबलतया विविधघटनासु मानवाधिकाराणां संरक्षणाय हस्ताक्षेपं करोति। यथा - HIV रोगपीडितानां भेदभावः विषये सर्वेभ्यः राज्यसर्वकारेभ्यः चतुर्विंशति होरात्मकसमये प्रतिवेदनज्ञापनाय आदिष्टम्। तत्र कतिनां निग्रहणं, कतिनां मरणं, कतिनां महिलानाम् उत्पीडनम् इत्येसां सर्वासां सूचनाः स्वीकृताः। अस्यां घटनायां NHRC इत्यनेन मानवाधिकाराणां हनने सति शीघ्रं सक्रिया प्रतिक्रिया कृता। दमितानां शमितानाञ्च उपरि अत्याचारेण मानवाऽधिकाराणां हननं तथा च घटनायाः अंशानां दमनम् अपराधीणां रक्षणं न भवेत्, तादृशम् अभियानं विहितम्। एवं प्रकारेण उत्तरप्रदेशे नोयडा इत्यस्य निठरीग्रामे शिशूनां यौनशोषणं हत्यादि अपराधविषये स्वस्य दृढहस्ताक्षेपः NHRC इत्यनेन कृतः।

अनेन इदं वक्तुं शक्यते यत्— भारतीयानां दैनन्दिनकार्ये , राजनैतिककार्ये, शिक्षायां व्यवसाये इत्यादि अनेकमानवीयाधिकारेषु निर्भीकतया स्वातन्त्र्येण स्वीयहस्तक्षेपेन मानवीयाधिकाराणां संरक्षणं करोति।

**राष्ट्रियमानवाऽधिकाराऽऽयोगस्य कार्याणि अनुष्ठानानि वा** -

आयोगः निम्नलिखितानां कासाञ्चन कृत्यानां पालनं करोति। यथा- *रा. मा.अ.आयोगः* कस्यामपि घटनायां स्वप्रेरणया वा पीडितजनस्य अथवा अन्यजनेन प्राप्तसूचनया वा उच्चन्यायालय उच्चतम-न्यायालयनिर्देशानुसारञ्च प्रस्तुत-प्रस्तावस्य पत्राणाम् उपरि प्रतिक्रियां करोति। यथा-

- संविधानस्य वा मानवाऽधिकारणां संरक्षणे तद् समये प्रवृत्तविधिः वा अधिनियमद्वारा संरक्षणोपायानां पुनः अवलोकनेन च प्रभावपूर्वकं प्रतिक्रियायाः कृते उपचाराः संशोधनं करोति।
- मानवाऽधिकार-सम्बन्धितसन्धयः एवञ्च अन्तराष्ट्रियलेखानाम् अध्ययनं तथा च तेषां प्रभावपूर्णं क्रियात्मकं कार्याणां प्रस्तावं प्रस्तौति ।
- मानवाऽधिकाराणां क्षेत्रे अनुसन्धानं सम्वर्धनञ्च करोति।
- समाजे विभिन्नवर्गाणां मध्ये मानवाऽधिकाराणां जागरणाय प्रसाराय च प्रयासाः विधीयन्ते।
- मानवाऽधिकारणां क्षेत्रे निर्सर्वकारीय संघटनानां तेषां प्रयासानाञ्च प्रोत्साहः क्रियते।

एवमनेकानि कार्याणि अयमायोगः सम्पादयति, येन मानवाऽधिकाराणां सम्वर्धनं संरक्षणञ्च सञ्जायते।

**रा. मा.अ.आयोगस्य शक्तयः-**

आयोगेन अस्याधिनियमस्य अधीने आक्षेपानाम् अन्वेषणसमये, अधोलिखितविषयानाञ्च सम्बन्धे नागरिक-प्रक्रिया-संहितायां (1908) वर्णितनियमानुसारं विचाराः क्रियन्ते। यथा -

- साक्षीनामन्वेषणे, उपस्थितिकरणे, शपथे परीक्षाकरणे च ।
- कस्याश्चित् घटनायाः अभिलेखनपत्राणां प्रकटने प्रस्तुतिकरणे च।
- शपथपत्राणामुपरि साक्ष्यग्रहणे।
- कस्यचित् न्यायालयात् वा कार्यालयात् लोकाभिलेखानां वा तासां प्रतिलिपिनां प्राप्तये।
- साक्षीनां वा अभिलेखानां परीक्षणे।
- कस्यचित् विषयस्य प्रस्तुतीकरण-साक्षीकरणेत्यादि पक्षानामुपरि स्वीय- प्रभावपूर्णप्रतिक्रियायै।

**आयोगस्यान्वेषणक्षेत्रम् (Scope of NHRC)-**

आयोगः अनुसन्धानाय केन्द्रसर्वकारस्य राज्यसर्वकारस्य च अनुमत्या सर्वकारीय- अधिकारीणां वा अन्वेषणाऽभिकरणस्य सेवानाम् उपयोगः कर्तुं शक्यते । अनुसन्धानप्रयोजनाय अपेक्षिकाधिकारीणाम् अभिकरणस्य वा उपयोगमधोलिखितकार्येषु कर्तुमर्हति। यथा—

- व्यक्ते उपस्थित्यर्थं , परीक्षणाय च ।
- अभिलेखानां प्रकटने च प्रस्तुतीकरणे ।
- कस्याऽपि कार्यालयस्य कमपि लोकाऽभिलेखं वा तस्य प्रतिलिपिं प्राप्तये ।
- कस्यापि अधिकारिणः अभिकरणस्य च उपयोगः निश्चिताऽवधो करणे।
- कस्यापि घटनायाः अभिलेखानां वा तथ्यानाम् अध्ययने।

**राष्ट्रियमानवाऽधिकाराऽऽयोगस्य सीमा / क्षेत्रम् -**

मानवाऽधिकाराणां संरक्षणे NHRC आयोगः स्वीय हस्तक्षेपं तु करोति एव । किन्तु तस्य कार्यान्वयस्य काश्चन सीमाः वर्तन्ते। यथा —

- प्रायः आयोगस्यास्य कार्यक्षेत्रं सम्पूर्णभारते भवति।
- जम्मूकश्मीरराज्यविषये समवर्तीसूच्यां निर्धारितस्य विषयस्य एव निर्णयनं भवति।
- नियमानुपालने सुनिश्चितीकरणे NHRC इत्यस्य निर्णयः आत्यन्तिको न भवति।
- भारतीयगुप्तचरविभागे हस्तक्षेपाय अस्याधिकारः नास्ति।
- भारतीयसतर्कताविभागेषु हस्तक्षेपाय अस्याधिकारः नास्ति।
- व्यक्तिनां निजजीवने हस्तक्षेपाय अस्याधिकारः नास्ति।

***उपसंहारः(Conclusion)-***

राष्ट्रियमानवाऽधिकार-संरक्षणाऽधिनियमस्य (2006) अनुसारं भारतीय-नागरिकाणां जन्मतः मृत्युपर्यन्तं सार्वभौमिकतया, अविच्छेदात्मकतया, अपरित्यागात्मकतया च केचना अधिकाराः सन्ति । एतेषामधिकाराणां माध्यमेन नागरिकाः उत्कृष्टतमजीवनयापने, अभीष्टानुसारं जीवनयापने अधिनिवासे च दास्यमुक्तसमाजस्य निर्माणे, न्यायिकसौविध्यशोषणदि अमानवीयपरिस्थितिनां निवारणे, चिकित्सा-शिक्षादि प्राथमिकाधिकारणां प्राप्तये अधिकारिणः भवन्ति । अतः रा.मा.अ.आयोगः (NHRC) एतादृशानां मानवाधिकाराणां प्राप्तये संरक्षणे च स्वीयाधिपत्येन नैसर्गिकतया महत्वपूर्णमुत्तरदायित्वम् आवहति । प्राचीनकालादद्यावधिपर्यन्तं मानवजीवनस्य प्रत्येकेऽस्मिन् पदे दृश्यमानानां दुराचाराणामत्याचाराणाञ्च उन्मूलनेन समाजे समतायाः स्वतन्त्रतायाश्च च भावना संस्थापयति आयोगोऽयम्।

## अनुशीलिताः -


1. *nhrc.nic.in*
2. *https://en.wikipedia.org/wiki/National_Human_Rights_Commission_of_India*
3. *http://www.ohchr.org/EN/UDHR/Pages/Language.aspx?LangID=skt*
4. *https://pledge.mygov.in/nhrc/*
5. *http://nhrc.govmu.org/*

# सक्रियपाठ्यचर्यानुभवोत्पादने शिक्षकस्य भूमिका

**परियोजनाकार्यस्य मार्गदर्शकः**

**डॉ. सुनीलकुमार शर्मा**

**परियोजनाकार्यस्य सदस्याः**
**वामनवर्गः**

1. विश्वजीत बेहेरा 2. संयुक्ता महाराणा
3. ममतारानी पण्डा 4. सागरीका मिश्र
5. मानसी पात्र 6. प्रतिभा बेहेरा
7. भास्करप्रसाद चतुर्वेदी

**प्रस्तावना (Introduction)**

सम्पूर्णविश्वे विद्यायाः केन्द्रं विद्यालयः भवति। विद्यालयादेव छात्राणां सर्वाङ्गीणविकासः भवति। विद्यालयस्य सञ्चालनाय मानवसंसाधनानां भौतिकसंसाधनानां वित्तीयसंसाधनानाञ्च आवश्यकता भवति। तथा च एतेषां व्यवस्था शैक्षिकप्रशासनं करोति। विद्यालयं सम्यग्रूपेण सञ्चालनाय पाठ्यचर्यायाः औपचारिकरूपेण निर्धारणमपिशैक्षिकप्रशासनमेव करोति। यथा – पाठ्यक्रमः, पाठ्यसहगामीक्रियाः, समयसारिणी, परीक्षा, मूल्याङ्कनं वार्षिकोत्सवश्चेत्यादयः। विद्यालये मानवसंसाधनरूपेण प्राचार्यः, शिक्षकाः छात्राः कर्मचारिणश्च भवन्ति। ते परस्परं मिलित्वा विद्यालयीय – समस्तक्रियाकलापानां सञ्चालनं कुर्वन्ति। एवं शिक्षणे शिक्षकाणां महत् योगदानं भवति। शिक्षकाः विद्यालये समस्तक्रियाकलापानां सञ्चालनं कुर्वन्ति। अतः विद्यालये शिक्षकस्य मुख्या भूमिका भवति। पाठ्यचर्यायाः कृते शिक्षकाः मार्गदर्शकाः, अभिप्रेरकाः, सुगमकर्तारः, प्रबन्धकाश्च भवन्ति।

**पाठ्यचर्या (CURRICULUM)**

पाठ्यचर्या आङ्ग्लभाषायां curriculum इति कथ्यते । curriculum इति शब्दः लैटिनभाषायाः currere इति शब्दात् निष्पन्नो वर्तते , यस्यार्थः भवति धावनक्षेत्रमिति । पाठ्यचर्यायां ते समस्तानुभवाः सम्मिलिताः भवन्ति यान् बालकः स्व-विद्यालये प्राप्नोति । पाठ्यचर्येयम् अनियोजितमनेकाङ्गी च भवति । विद्यालये जायमानानां संम्पूर्णक्रियाकलापानां समूहः भवति पाठ्यचर्या। पाठ्यचर्या पाठ्यक्रमस्य आधारस्तम्भ अपि भवति । पाठ्यचर्या छात्राणां जीवन-शैक्षिकोद्देश्यानाञ्च प्राप्तुमेकं साधनम्। पाठ्यचर्यायां शिक्षायाः प्राथमिकोच्चस्तरयोश्च पाठनीयांशाः वर्णिताः सन्ति । एतस्यां तादृशं बोधनकार्यं सम्मिलितं भवति । यस्यानुसारेण छात्राः स्वीयलक्षणानि , आदर्शान् , अभिलाषाञ्च च सम्पादयितुं शक्नुवन्ति ।

**पाठ्यचर्यायाः प्रकाराः -**

1. **बाह्यपाठ्यचर्या** – पाठ्यक्रमस्य तथा अन्यशैक्षिकगतिविधीनां बाह्यसंस्थाद्वारा यदा निर्धारणं क्रियते तदा भवति बाह्यपाठ्यचर्या । एतस्याः पाठ्यचर्यायाः क्रियान्वयनाय निर्देशानां रूपरेखाणां चापि निर्धारणं बाह्यसंस्थाद्वारा लिखितरूपेण क्रियते ।

2. **आन्तरिकपाठ्यचर्या** – अध्यापकसमूहेन विद्यार्थिसमूहेन च संयुक्तरूपेण निर्धारिता पाठ्यचर्या आन्तरिकपाठ्यचर्या । एतस्यां पाठ्यचर्यायां शैक्षिकोद्देश्यानां पूर्तये शिक्षकछात्रसमूहेन विविधप्रकारकक्रियाणां (पाठ्यक्रमस्य विषयाणां , विषयवस्तूनां , अन्यशैक्षिकगतिविधीनां च ) निर्धारणं क्रियते।
3. **सामाजिकपाठ्यचर्या** – सामाजिकदृष्ट्या विद्यार्थीनाम् अनुभवानां विकासाय या पाठ्यचर्या निर्मीयते सा भवति सामाजिकपाठ्यचर्या । अत्र सामाजिकावश्यकतानां पूर्तये वस्तुनिष्ठरीत्या विषयवस्तूनां क्रियाविधीनां च चयनं भवति। यथा – कौशलाधारितप्रशिक्षणाय पाठ्यचर्या।
4. **शून्यपाठ्यचर्या** - पूर्णत अनिर्धारिता वा पाठ्यचर्या शून्यपाठ्यचर्या भवति।

**पाठ्यचर्यायाः महत्वम्**

- पाठ्यचर्या अधिगमाय प्रेरयति – पाठ्यचर्यायाम् अनेके विषयाः सम्मिलिताः भवन्ति । तत्र शिक्षाविद्भिः सर्वप्रथमं छात्राणाम् उत्तमाधिगमः कथं भवतीति चिन्तनं कृत्वा तस्य निर्माणं कुर्वन्ति। अतः छात्राणाम् उत्तमाधिगमनाय पाठ्यचर्या प्रेरयति।
- छात्रान् दिशानिर्देशनं प्रददाति – पाठ्यचर्या छात्राणां सर्वाङ्गीणविकासस्याधारः वर्तते । छात्रेषु मौलिकतासर्जनशीलतयोः गुणानां विकासे सहायं करोति।
- समाजाय हितकारिणी – छात्राः समाजस्य प्रमुखम् अङ्गं भवन्ति । छात्रजीवनस्य हेतुः समग्रतायाः निर्धारणं पाठ्यचर्यामाध्यमेन क्रियते।
- शैक्षिकवातावरणम् – उत्तमपाठ्यचर्यायाः निर्माणे विद्यालयस्य शैक्षिकवातावरणम् उत्तमं भवति । अतः यथा विहितसमये समस्तविद्यालयीयकार्यक्रमाणां व्यवस्थापनं भवति, यथा – छात्राः समयेन विद्यालयम् आगच्छन्ति, समयेन प्रार्थनां कुर्वन्ति, कक्ष्यायाम् अध्यापकः समयेन अध्यापयति । एवं प्रकारेण शैक्षिकवातावरणम् उत्तमं भवति।

**सक्रियपाठ्यचर्यानुभवोत्पादने शिक्षकस्य भूमिका-**

एकस्य अध्यापकस्य सक्रियपाठ्यचर्यायाः सन्दर्भे भूमिका गत्यात्मिका एव स्यात् यतोहि शिक्षकस्य व्यवहारान् एव विद्यार्थिनः अनुकुर्वन्ति । विद्यालये शिक्षकः यत् किमपि करोति तत् सर्वं पाठ्यचर्यायाम् अन्तर्भूतः भवति । विद्यालये शिक्षकस्य भूमिका अतीवमहत्वपूर्णा भवति । यतोहि शिक्षकः एव तादृशः प्रयोजकः यः विद्यार्थीनां रूचि-योग्यता-क्षमता च इत्यादीनाम् अनुसारेण विद्यालये पाठ्यचर्यायाः क्रियान्वयनं सञ्चालनञ्च करोति। योग्यशिक्षकः सैव वर्तते यः विद्यालयक्रियां सफलतया सञ्चालयति, यया छात्राणां विकासः जायते।

शिक्षकस्य अनुपस्थितौ शिक्षणस्य पाठ्येतरक्रियाणाम् आयोजनं न सम्भवति । अतः विद्यालये शिक्षकस्य कानिचन कर्तव्यानि दायित्वानि च अधः आलोच्यन्ते। ते यथा -

- पाठ्यक्रियाणां सफलतया सञ्चालनम् ।
- पाठ्येतरक्रियाणां सम्यग्रीत्या निर्वहणम् ।
- अधिगमकाठिन्यानां निवारणम् ।
- अनुशासनसमस्यानां दूरीकरणम् ।
- विद्यालये उत्तमवातावरणनिर्माणम् ।
- उपयुक्तशिक्षणोपकरणानां चयनम् ।
- व्यक्तित्वसम्बन्धितविविधपक्षाणां विकाससम्पादनम् ।

शिक्षकः पाठ्यचर्यायां समन्वितानां विविधक्रियाणां माध्यमेन छात्रेभ्यः विविधान् अनुभवान् प्रयच्छति । यैः छात्राः लाभान्विताः भवन्ति । अन्यशब्देषु यदि अन्तःक्रियायां शिक्षकः सक्रियः अस्ति तर्हि विद्यार्थिनः अपि सक्रियाः भवन्ति । अत्र शिक्षकस्य सक्रियत्वे विद्यार्थीनां निष्क्रियत्वम् अपेक्षितं न वर्तते अतः लक्ष्यं तु विद्यार्थीनां सक्रियत्वं तदर्थम् अध्यापकस्य व्यवहारः अत्र सक्रियः इति कथ्यते । सक्रियपाठ्यचर्यानुभवोत्पादने शिक्षकस्य भूमिकाः निम्नलिखिताः वर्तन्ते । यथा-

**पाठ्यक्रमः-**

कस्यापि शिक्षायाः वा प्रशिक्षणस्य निर्द्धारितविषयोपविषयाणां तत्सम्बन्धितसामग्रीणाञ्च व्यवस्थितीकरणं समरूपीकरणं प्रस्तुतीकरणञ्च पाठ्यक्रमः उच्यते । पाठ्यक्रमः प्रायः कस्यापि शिक्षणपरिषदा (Board) निर्मीयते । समुचितपाठ्यक्रमस्य शिक्षायाम् अत्यधिकमहत्वपूर्णं स्थानं वर्तते । अध्यापकः एतादृशपाठ्यक्रमस्य निर्माणं कुर्यात् यः छात्राणां स्तरानुगुणं भवेत् । येन छात्राः सम्यगवगत्य ज्ञानार्जयितुं शक्यन्ते । पाठ्यक्रमे अध्ययनस्य सर्वविधसामग्री विशेषोद्देश्यपूर्णा स्यात् । शिक्षकः पाठ्यक्रमस्य निर्माणम् एतादृशं कुर्यात् येन छात्राः सरलरीत्या अनायासेन अधिगन्तुं शक्नुवन्ति ।

**विषये नैपुण्यम्-**

शिक्षकान् भाषाविषये सर्वप्रथमः स्वाधिकारः, उच्चारणे लिप्यादिविषयाणां ज्ञानं तस्य उत्तमोत्तमं भवेत् । तदैव शिक्षकः स्वविषये दक्षतां प्राप्नोति । नैपुण्यतां प्राप्य शिक्षकः पाठ्यचर्यां क्रियान्वयनसमये पाठ्यक्रममुत्तमतया पाठयितुं समर्थः भवति । कक्षायां छात्रानुत्तमप्रकारेण ज्ञानं दातुं शक्नोति ।

**अध्ययनक्षेत्रे सहनशीलता-**

विद्यालये अध्ययनम् अध्यापनं च मुख्यरूपेण छात्रशिक्षकयोर्मध्ये भवति । शिक्षकः अध्यापयति छात्राः अध्ययनं कुर्वन्ति । अतः तयोः द्वयोर्मध्ये पारस्परिक - सहनशीलतायाः भावः भवेत् । शिक्षकः एतान् विषयान् विज्ञाय पाठयति चेत् अपेक्षितफलानि प्राप्नोति । तदैव अध्ययनक्षेत्रे उत्तरोत्तरवृद्धिः भवितुमर्हति । तेन पाठ्यचर्यायाः साफल्यं भवति ।

## सामाजिकजीवनेन सह शैक्षिकसिद्धान्तानां साम्यम् –

मानवः सामाजिकप्राणी अस्ति। सामाजिकजीवनयापनाय शिक्षायाः महदावश्यकता वर्तते। अतः शिक्षकः पाठनसमये छात्राणां सामाजिकविकासार्थम् अवधानं ददाति। शिक्षकः सर्वेषां शिक्षाशास्त्रिणां शैक्षिकसिद्धान्तान् छात्राणां समक्षे उपस्थापयति । येन छात्राः तान् सिद्धान्तान् स्वसामाजिकजीवने व्यवहरन्ति । अतः पाठ्यचर्यायाम् उत्तमसामाजिकजीवने केचन बिन्दवः सन्ति, तैः छात्राणां सर्वाङ्गीणविकासः सम्भवति । अतः विद्यालये छात्राणां सर्वाङ्गीणविकासाय पाठ्यचर्यायां निम्नाङ्कितबिन्दवः सन्ति। यथा — 1. समानताशिक्षा । 2. नैतिकतायाःशिक्षा। 3. एकतायाः शिक्षा। 4. अनुशासनस्यशिक्षा। 5. उत्तमचारित्रिकशिक्षा। 6. सामाजिकशिक्षा चेति।

## पाठ्यसहगामिक्रियाणाम् आयोजनम्-

पाठ्यपुस्तकेन सह कक्षाकक्षतः बहिः संचालितान् गतिविधीन् पाठ्यसहगामिक्रिया उच्यते। आभिः क्रियाभिः बालकस्य सर्वांगीण –विकासो भवति। पाठ्येतरक्रिया अद्य पाठ्यसहगामिक्रिया इति नाम्ना ज्ञायते, इमाः पाठ्यचर्याया अभिन्नाङ्गत्वेन स्वीक्रियन्ते । विद्यालये पाठ्यसहगामिक्रियाणाम् आयोजनस्य बहुमहत्वम् अस्ति। यथा –

1. शारीरिकविकासे सहायकक्रियाः - विभिन्नशारीरिकक्रियाभिः बालकानां शारीरिकविकासो भवति।

2. नैतिकगुणानां विकासः - एताभिः क्रियाभिश्छात्राः सेवा-सहयोग-सहानुभूति-सत्यता-न्यायप्रियता–धैर्य-दृढता-आज्ञापालनादिगुणानां विकासो भवति। छात्रेभ्यः नैतिकमूल्यानामात्मसात्करणस्य अवसरो मिलति।

3. विशिष्टरूचीनां विकासः – पाठ्यसहगामिक्रियाभिः छात्रेषु भिन्नविषयान् प्रति रूचीनां विकासः क्रियते।

4. अवकाशस्य सदुपयोगः – पाठ्यसहगामिक्रियाभिः छात्राः अवकाशकाले समयस्य सदुपयोगं कुर्वन्ति।

5. अनुशासनसम्पादने सहायिकाः – पाठ्यसहगामिक्रियाभिः छात्रेषु नेतृत्वभावनायाः उत्तरदायित्व-भावनायाश्च विकासो भवति। विद्यालये अनुशासनस्थापने सारल्यं भवति। पाठ्यसहगामिक्रियायाः एतद् सर्वं महत्वं विचार्य विद्यालयपाठ्यचर्यानिर्माणसमये पाठ्यसहगामिक्रियाः तस्यां पाठ्यचर्यायामन्तर्भवन्ति।

## पाठ्यसहगामिक्रियाः-

1. **वादविवादः**— वादविवादेन छात्रः स्वविचारान् तर्कान् च समुचितशैल्यां प्रकटयितुं समर्थो भवति। तस्य मौखिकाभिव्यक्तिः सशक्ता भवति श्रवणकौशलस्य च विकासो भवति।
2. **अन्त्याक्षरी** – क्रीडेषा प्राचीनकालादारभ्य प्रचलति, अनया छात्रैस्सह अध्यापकानां विदुषाञ्च व्यवहारे संस्कृतसाहित्यं प्रति रूचेः वृद्धिः जायते।
3. **निबन्धलेखनम्** – निबन्धलेखनस्य प्रतियोगिताऽऽयोजनं कृत्वाऽपि विविधभाषाध्यापनं रूचिकरं कर्तुं शक्यते। अनेन छात्रेषु स्वाध्यायप्रवृत्तिः लिखिताभिव्यक्तिक्षमताश्च विकसति।

4. **कथालेखनम्**— श्रवणकौशलस्य विकासाय अध्यापकः कथा श्रावयेदिति महत्वपूर्णमस्ति। भाषणाभ्यासनिमित्तम् अध्यापकेन बालकानां मुखात् कथाः वाचनीयाः ।
5. **गानम्**— छात्राः नृत्यसंगीतमाध्यमेन लोकसंस्कृतेः लोकगीतानाञ्च ज्ञानं प्राप्नोति । अध्यापकः सांस्कृतिकगीतानां लोकगीतानाञ्च समवेतस्वरेण कक्षायाम् अभ्यासं कारयेत् ।
6. **कथाकथनम्** – भाषाशिक्षणे कथानां महत्स्थानमस्ति । छात्राणां कल्पनाशक्तिः वर्धिता भवति ।
7. **प्रहेलिका-** विद्यालये अध्यापकाः प्रहेलिकां प्रस्तुत्य छात्राः तासाम् उत्तराणि वक्तुं निर्दिश्यन्ते । यः सर्वाधिकानि उत्तराणि ददाति स एव विजयी भवति । अनया क्रीडया छात्रेषु संस्कृतावगमन-क्षमतायाः विकासो भवति । ते सम्यग्रूपेण चिन्तयित्वा विवेकेन उत्तरमन्वेष्टुं प्रयत्नं कुर्वन्ति ।
8. **प्रतियेगिता**— विद्यालये राष्ट्रियान्तराष्ट्रियमहत्वस्य विषयेषु निबन्ध–वाद–विवाद-सामान्यज्ञानाधारिताणां प्रतियोगितानाम् आयोजनं कर्तुं शक्यते । छात्राणां भाषणशक्तेः तर्कशक्तेः मानसिकशक्तेश्च विकासो भवति । उक्तञ्च -

आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया ।
पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च ॥ इति

**उपसंहारः-**

पाठ्यचर्या विद्यालये जायमानानां सम्पूर्णक्रियाकलापानां समूहः भवति । पाठ्यचर्या पाठ्यक्रमस्य आधारस्तम्भः तथा च छात्राणां कृते जीवनोद्देश्यानि शैक्षिकोद्देश्यानि च प्राप्तुम् एकं साधनं भवति । पाठ्यचर्यायां ते समस्तानुभवाः सम्मिलिताः भवन्ति यान् बालकः स्वविद्यालयनिर्देशेन प्राप्नोति । पाठ्यचर्या चतुर्धा भवति यथाः – (1) बाह्यपाठ्यचर्या (2) आन्तरिकपाठ्यचर्या (3) सामाजिकपाठ्यचर्या (4) शून्यपाठ्यचर्या चेति । शिक्षकः पाठ्यचर्यान्तर्गते शिक्षणकार्यं सम्पादयति । छत्राणां सर्वाङ्गीणविकासाय शिक्षकः विद्यालयस्य पाठ्यचर्यान्तर्गतं सम्पूर्णाक्रियाकलापानां सञ्चालनं सम्यक्तया करोति, स्वविषयमपि परिश्रमेण पाठयति । राष्ट्रविकासाय विद्यालयस्य महत् योगदानं भवति । जनाः इतः एव विभिन्नज्ञानं प्राप्नुवन्ति ।

**सन्दर्भग्रन्थसूची -**


1. *डॉ. मदनमोहनझा, विद्यालयप्रबन्धनम् , श्रुतिप्रकाशनम् (पुरी) ॥*
2. *रमनविहारी लाल , ज्ञान और पाठ्यचर्या, आर. लाल. बुक डिपो.मेरठ ।*
3. *डाँ. आर.ए. शर्मा, विद्यालय प्रबन्धन , आर. लाल. बुक डिपो., मेरठ ।*
4. *एन.आर स्वरूप सक्सेना, शिक्षा – सिद्धान्त , आर. लाल. बुक डिपो., मेरठ ।*

# अधिगममूल्याङ्कने केन्द्रीयप्रवृत्तिमापनानाम् अनुप्रयोगः

**परियोजनाकार्यस्य मार्गदर्शकः**

**डॉ. सचिन कुमार**

**परियोजनाकार्यस्य सदस्याः**
**कुन्तकवर्गः**
1. अर्चना राउत 2. रूपश्री साहु,
3. भारती माहुन्त 4. रश्मि राणी पण्डा,
5. दिलीपकुमारमिश्रः 6. सुचित्रा सेढ़,
7. प्रत्युष कुमार साहु

**प्रस्तावना —**

व्यक्तिः जन्मतः मरणपर्यन्तं किमपि नूतनम् अधिगच्छत्येव । नूतनज्ञानस्य कौशलानां आचारव्यवहाराणाञ्च प्राप्तिरेव अधिगमः इत्युच्यते । जीवः जन्मन आरभ्य आत्मान् धर्तुम् इन्द्रियैः गात्रैः क्रियां प्रतिक्रियाञ्च करोति, अपि च परितः विद्यमानवातावरणेन सह सामञ्जस्यं विदधाति । सामञ्जस्यसम्पादनवेलायां क्रियाप्रतिक्रियाभिः विविधान् अनुभवान् अर्जयति, अर्जितानुभवाधारेण स्वीयव्यवहारे परिवर्तनम् आनयति एतदेव व्यवहारपरिवर्तनम् अधिगमः इत्युच्यते । अनुभवैः व्यवहारपरिवर्तनमेव अधिगमः ।

**अधिगमपरिभाषाः —**

1. वुडवर्थ – नवीनज्ञानस्य नूतनप्रतिक्रियाणाञ्च प्राप्तिप्रक्रिया अधिगमः ।
2. स्किनर – व्यवहारे उत्तरोत्तरसामञ्जस्य प्रक्रियैव अधिगमः ।
3. गिलफोर्ड – व्यवहारकरणेन व्यवहारे आगतं परिवर्तनम् अधिगमः ।

**मूल्याङ्कनम् —**

मूल्याङ्कनम् आधुनिकवैज्ञानिकसम्प्रत्ययः वर्तते । मूल्याङ्कने गुणात्मकं परिमाणात्मकञ्च भेदौ अन्तर्भवतः । मूल्याङ्कनेनैव कस्यचित् वस्तुनः उत्तमानुत्तमयोः गुणयोः विचक्षणज्ञानं प्राप्यते, अर्थात् कस्यचित् वस्तुनः योग्यायोग्ययोः उत्तमानुत्तमयोः गुणदोषाणां निरीक्षणं तस्य मूल्याङ्कनञ्च प्रचलतीत्यर्थः । शिक्षाक्षेत्रे मूल्याङ्कनस्य व्यापकप्रयोगः विद्यते । एतेन छात्राणाम् उपलब्धिः व्यवहारपरिवर्तनस्य स्तरः च ज्ञायते । शैक्षिकोद्देश्यानां प्राप्तये पाठ्यक्रमः शिक्षणपद्धतयः शिक्षणोकरणानि कक्ष्याशिक्षणम् इत्यादीनां साफल्यस्तरोपि मूल्याङ्कनेन ज्ञायते ।

कस्यचित् वस्तुनः अथवा प्रक्रियायाः मूल्यनिश्चयः मूल्याङ्कनम् इत्युच्यते । शिक्षणप्रक्रियायाः अधिगमानुभवानाञ्च उपयोगितायाः निर्णयप्रक्रिया शैक्षिकमूल्याङ्कनम् इत्युच्यते । मूल्याङ्कनमेका निरन्तरप्रक्रिया वर्तते । एतत् व्यक्तेः भावनाभिः चिन्तनैः क्रियाभिः सम्बद्धापेक्षितव्यवहारिकपरिवर्तनद्वारा व्यक्तिविकासाय स्पृह्यति । मूल्याङ्कनस्य क्षेत्रम् अतीवव्यापकमस्ति । मूल्याङ्कनम्

अधिगमोद्देश्यकेन्द्रितं भवति । सम्पूर्णव्यक्तित्वस्य परीक्षणं मूल्याङ्कनेन संभवति । संख्यारूपेण प्राप्तदत्तांशस्य विश्लेषणं व्याख्यानञ्च एतत् करोति । अनुदेशनसमये छात्राणाम् अधिगमप्रगतेः नियन्त्रणाय निर्माणात्मक मूल्याङ्कनम् उपयुज्यते । मूल्याङ्कनं छात्रेभ्यः अध्यापकेभ्यश्च अधिगमसाफल्यासाफल्यानां विषये सतत् प्रतिपुष्टिप्रदानमस्ति । कस्यचित् विषयस्य वा अध्यायस्य शिक्षणात्परम् अध्यापकः छात्राणां प्रगतेः मूल्याङ्कनम् करोति । मूल्याङ्कनं प्रत्येकं छात्रस्य कक्ष्याप्रकोष्ठस्य च अधिगमस्तरं द्योतयति । छात्राणाम् अधिगमसमस्यानां निदानम् उपचारश्च मूल्याङ्कनस्य मुख्योद्देश्यं वर्तते ।

**सांख्यिकी** —

सांख्यिकी इत्यस्य आङ्गलभाषायां 'Statistics' इति समानार्थकशब्दः वर्तते । अयं लेटिनभाषायाः 'Status' इति शब्दात्निष्पन्नः अस्ति । बौले-महोदयस्य मते सांख्यिकी गणनायाः विज्ञानम् इति वक्तुं शक्यते (Statistics may be called the science of counting) । सांख्यिकी अनुमानानां संभाव्यतानाञ्च विज्ञानं वर्तते ( Statistics may be called the science of estimates and possibility.) । सांख्यिकी विविधसर्वेक्षणैः प्रयोगैश्च प्राप्तदत्तांशस्य संग्रहणेन , वर्गीकरणेन व्याख्यानेन च सम्बद्धा भवति । सांख्यिकी गणितस्यैव शाखा वर्तते , सांख्यिकी ज्ञानविज्ञानयोः आधारः वर्तते । विविधपरीक्षासु छात्रैः प्राप्ताङ्कानां विश्लेषणे व्याख्याने च शिक्षकाय उपकरोति । सांख्यिक्याः साहाय्येन छात्रेषु वैयक्तिकविभेदाः सरलतया ज्ञातुं शक्यन्ते ।

**केन्द्रीयप्रवृत्तिमापनानि** —

सांख्यिक्यां केन्द्रियप्रवृत्तिमापनानि अन्यतमः विषयः भवति । दत्तांशस्य आवृत्तिवितरणसारण्यां व्यवस्थापनेन व्याख्यानं निष्कर्षाश्च सरलतया दृष्ट्वा दत्तांशस्य स्वभावं नावगम्यते । दत्तांशस्य पुनः संक्षिप्तीकरणं कृत्वा एकया संख्यया सारांशं बोध्यते चेत् समूहस्य सामर्थ्यं सरलतया अवगन्तुं शक्यते । स च प्राप्ताङ्कः समूहस्य प्रतिनिधिः भवेत् , तादृशप्राप्ताङ्काः केन्द्रियप्रवृत्तिमापनानि इति कथ्यन्ते । रॉस-महोदयस्यानुसारम् – 'केन्द्रियप्रवृत्तिमापनं सोऽङ्कः भवति यः सम्पूर्णदत्तांशस्य श्रेष्ठतमः प्रतिनिधिः भवति ', अर्थात् दत्तांशे बहवः अङ्काः भवन्ति परन्तु तेष्वङ्केषु एकं केन्द्रबिन्दुम् आश्रित्य अधिकाः अङ्काः तिष्ठन्ति । अयमङ्कः संपुर्णसमूहस्य प्रतिनिधिः भवति । अतः केन्द्रीयप्रवृत्तिमापनम् इति सार्थकनामधेयं वर्तते । एतानि केन्द्रीयप्रवृत्तिमापनानि त्रिविधानि भवन्ति । तद्यथा क्रमेण – १. मध्यमानम् (Mean) २. मध्यमाङ्कः (Median) (३) बहुलाङ्कः (Mode) ।

**केन्द्रीयप्रवृत्तिनां लक्षणानि** —

- केन्द्रीयप्रवृत्तिमापनं सम्पूर्णसमूहस्य प्राप्ताङ्कानां प्रतिनिधिः भवति ।
- केन्द्रीयप्रवृत्तिमापनं सामूहिकोपलब्धिं संक्षिप्ततया प्रस्तौति ।
- व्यवस्थितदत्तांश-अव्यवस्थितदत्तांशयोश्च केन्द्रीयप्रवृत्तिमापनानि सरलतया गणयितुं शक्यन्ते ।

- केन्द्रीयप्रवृत्तिमापनैः दत्तांशस्य विश्लेषणं व्यख्यानञ्च सरलतया भवति।
- केन्द्रीयप्रवृत्तिमापनानाम् आदर्शमध्यमं भवति। अतः संख्याशास्त्रे अस्य महत्प्राधान्यं वर्तते।

**केन्द्रीयप्रवृत्तिमापनानां आवश्यकता –**

**मध्यमानम् –**

- केन्द्रीयप्रवृत्तिमाध्यमेन अत्यधिकशुद्धमानस्य ज्ञानार्थम्।
- अंकवितरणस्य प्रत्येकम् अंकाय महत्त्वप्रदानार्थम्।
- अंकवितरणस्य मध्ये अधिकतमघनीकृताङ्कानां केन्द्रीयमानस्य गणनार्थम्।
- पूर्णतः वितरितस्य अंकवितरणस्य केन्द्रीयमानस्य गणनार्थम् ।
- मध्यमानस्य आधारेण बहुलांकस्य गणनार्थम्।
- मानकविचलनस्य गणनायै मध्यमानस्यावश्यकतायाम्।
- मध्यमानस्याधारेण सहसम्बन्धगुणांकस्य गणनार्थम्।

**मध्यमाङ्कः-**

- अपूर्णवितरितस्य अंकवितरणस्य केन्द्रीयमानस्य गणनार्थम् ।
- असामान्य-अंकवितरणस्य केन्द्रीयमानस्य गणनार्थम् ।
- बहुलाङ्कस्य गणनार्थं मध्याङ्कस्यावश्यकतायाम्।
- शीघ्रमेव केन्द्रीयप्रवृत्तिज्ञानार्थम्।
- सामान्यकेन्द्रीयप्रवृत्तेः ज्ञानादेव उद्देश्यस्य पूर्णतायाम्।
- अंकवितरणे केन्द्रस्य वास्तविकमध्यबिन्दोः ज्ञानमेव उद्देश्यप्राप्त्यर्थम् ।
- अत्यधिकं मध्यमानयुक्तानां सीमान्तानां गणनार्थम्।

**बहुलाङ्कः**

- केन्द्रीयप्रवृत्तिं शीघ्रतया ज्ञातुम् ।
- वितरणे यदि केचन अङ्काः वर्गान्तरादि वा अवशिष्टानि स्युः।
- व्यापारस्यवाणिज्यजगति उपभोक्तावस्तूनां निर्माणे बहुलाङ्कज्ञानस्य विशेषमहत्त्वमस्ति।

इत्थम् उपर्युक्तविवेचनेन सांख्यिक्यां केन्द्रीयप्रवृत्तिमापनानाम् आवश्यकता विवेचिता । अधुना सोदाहरणम् एतानि प्रस्तूयन्ते –

**मध्यमानम् ( MEAN )**

सामान्यगणितशास्त्रे AVERAGE इत्यस्यैव सांख्यिक्यां मध्यमानम् इत्युच्यते । एतत् M इति सङ्केतेन द्योत्यते । फर्गुसनमहोदयस्य मते प्रदत्तानाम् अङ्कानां योगे, प्राप्तस्य योगफलस्य प्रदत्ताङ्कानां

संख्या ( N ) विभज्यते सति या संख्या प्राप्यते, सैव मध्यमानम् इति कथ्यते (Mean is the sum of a set of measurements divided by the number of measurements in the set' ) । मध्यमानस्य मापनं द्विविधं भवति – अव्यवस्थितदत्तांशमध्यमानं व्यवस्थितदत्तांशमध्यमानञ्च । अधुना सोदाहरणम् मध्यमानस्य विवेचनं क्रियते –

## अव्यवस्थितदत्तांशमध्यमानम् –

प्रथमं यथा दत्तांशां प्राप्ताः स्युः, तथैव संस्थाप्य गण्यते, तद् अव्यवस्थितदत्तांशमध्यमानम् इत्युच्यते ।

**सूत्रम् = $M = \sum X \setminus N$**

**सूत्रस्य पदानां विवरणम् -** M = मध्यमानम् X = प्रदत्ताः अङ्काः

X = प्रदत्ताङकानां योगः N = प्रदत्ताङकानां संख्या ।

उदाहरणम् – प्रदत्तांशाः = 10, 13, 11, 15, 12, 22, 18, 16, 21, 20,

$$M = \sum X \;/\; N$$

$$M = \frac{10+13+11+15+22+18+16+21+20}{10}$$

$$M = \frac{1230}{40}$$

Therefore M =30.75 (Ans)

## व्यवस्थितदत्तांशमध्यमानम् –

अपरम् अङ्कानां व्यवस्थीकरणेन मध्यमानानयनम् 'व्यवस्थितदत्तांशमध्यमानम्' कथ्यते । अस्य सूत्रम् (दीर्घविधिः) $M = \sum fx \;/ n$

**सूत्रस्य पदानां विवरणम् - $M = \sum fx/N$**

M = मध्यमानम् F = वर्गस्य आवृत्तिः X = वर्गस्य मध्यबिन्दुः N= आवृत्तेः योगः

सारण्यां विद्यमानदत्तांशस्य मध्यमानं गणयता तत्रादौ वर्गविस्तारे प्रत्येकं वर्गस्य मध्यबिन्दुं ज्ञात्वा सारण्यां लिखेत् । प्रत्येकस्मिन् वर्गे महत्तमङ्कं न्यूनताङ्कं च योजयित्वा 2 संख्यया विभज्यते चेत् मध्यबिन्दुः प्राप्यते ।

**मध्यविन्दुः = महत्तमाङ्कः + न्यूनतमाङ्कः / 2**

**उदाहरणम् –**

| **वर्गविस्तारः ( C.I )** | **आवृत्तिः ( x )** | **मध्यबिन्दुः ( x )** | **fx** |
|---|---|---|---|
| 10-14 | 1 | 12 | 12 |
| 15-19 | 5 | 17 | 85 |
| 20-24 | 7 | 22 | 154 |
| 25-29 | 6 | 27 | 162 |
| 30-34 | 8 | 32 | 256 |
| 35-39 | 5 | 37 | 185 |
| 40-44 | 3 | 42 | 126 |
| 45-49 | 3 | 47 | 141 |
| 50-54 | 1 | 52 | 52 |
| 55-59 | 1 | 57 | 57 |
| | **N = 40** | | **$\sum fx = 1230$** |

$M = \sum fx \;/\; N$

$M = 1230 \;/\; 40$

$M = 30.75$ ( Ans)

**लघुविधिः –** दत्तांशस्य परिमाणं बृहत् भवति चेत् मध्यमानगणनायां लघुविधिः प्रयोक्तव्या।

सूत्रम् $M = A.M + (\sum fd/N)/\ C.I.$

**सूत्रस्थपदानां विवरणम् –**

M = मध्यमानम् A.M = कल्पितमध्यमानम्। F = प्रत्येकं वर्गविस्तरस्य आवृत्तिः।
D = विचलनम्। Fd = आवृत्तिविचलनयोः गुणाङ्कः। N = दत्तांशानां संख्या।

अत्र विद्यमानदत्तांशस्य कल्पितमध्यमानं विचलनञ्च ज्ञातव्यम्। यस्य वर्गविस्तारस्य आवृत्तिः अधिका भवति , तस्य वर्गविस्तारस्य मध्यबिन्दुः एव कल्पितमध्यमानं (A.M) भवति। ततः परं स्तम्भद्वयं योजयित्वा d तथा fd इत्यनयोः गणनां कुर्यात्। कल्पितमध्यमानवर्गस्य विचलनं शून्यं (0) भवति। आरोहवर्गविस्तारे ततः ऊर्ध्वं 1, 2, 3 इत्याद्यङ्काः अधश्च -1,-2,-3 अङ्काः स्थाप्यन्ते। अवरोहवर्गविस्तारे विपरीतक्रमेण कल्पितमध्यमानवर्गतः ऊर्ध्वं -1,-2,-3 अङ्काः अधश्च 1, 2, 3 इत्याद्यङ्काः लिख्यन्ते। ततः परम् अनन्तरस्तम्भे आवृत्तिविचलनयोः गुणाङ्कः लिख्यते।

**उदाहरणम् –**

| वर्गविस्तारः | आवृत्तिः | D_ | f.d_ |
|---|---|---|---|
| 10-19 | 10 | -3 | -30 |
| 20-29 | 10 | -2 | -20 |
| 30-39 | 9 | -1 | -9 |
| 40-49 | 5 | 0 | 0 |
| 50-59 | 6 | +1 | 6 |
| 60-69 | 4 | +2 | 8 |
| 70-79 | 3 | +3 | 9 |
| 80-89 | 3 | +4 | 12 |
| | **N= 60** | | **$\sum$fd = 24** |

M = A.M+_($\sum$fd/N) C.I.

M = 44.5+_ -24/60 X10

M = 44.5 — 4

M = 40.5 (Ans)

## मध्यमाङ्कः (Median)

कस्यचित् दत्तांशस्य मध्यबिन्दुः एव मध्यमाङ्कः भवति । मध्यबिन्दुरयं दत्तांशं भागद्वयं करोति । अयं MDइति सङ्केतेन द्योत्यते । आचार्यबौलेवर्यस्य मते कस्मिंश्चित् मापने प्रदत्ताः अङ्काः येन बिन्दुना समभागद्वये विभज्यन्ते , सः बिन्दुः मध्यमाङ्कः इति व्यपदिश्यते । (The median is the point that divides a ranked distribution of measurements in to two equal parts.) लिंक्विस्ट मते अङ्कानां वितरणे यस्य बिन्दोः अधः 50% अङ्काः , उपरि 50 % अङ्काः भवन्ति, सः बिन्दुः मध्यमाङ्कः इति कथ्यते ।

**मध्यमाङ्कस्य गणना** – अव्यवस्थितदत्तांशस्य मध्यमाङ्कः ज्ञातव्यश्चेत् प्रदत्तान् अङ्कान् आरोहणक्रमे अथवा अवरोहणक्रमे व्यवस्थापयेत् । ततः परम् अङ्कानां संख्या (N) ज्ञातव्या । यदि N समसंख्या ( Even no.) भवति तर्हि N+1/2 तमः अङ्कः मध्यमाङ्कः भवति । यदि N विषयसंख्या ( Odd no.) भवति तर्हि N/2 तमः अङ्कः मध्यमाङ्कः भवति ।

उदाहरणम् 1. – प्रदत्तांशाः - 10, 13, 11, 15, 12, 22, 18, 16, 21, 20

आरोहणक्रमः – 10, 11, 12, 13, 15, 16, 18, 20, 21, 22

दत्तांशेऽस्मिन् अङ्कानां संख्या ( N ) 10 वर्तते । अतः N+1/2 तमः अङ्कः। षष्ठः अङ्कः मध्यमाङ्कः भवति । अतः दत्तांशस्य मध्यमाङ्कः Md= 16 इति ज्ञायते ।

उदाहरणम् 2. – प्रदत्तांशाः - 5, 7, 6, 5, 0, 4, 3, 0, 2

अत्र अङ्काः आरोहणक्रमेण लिख्यन्ते चेत् 0, 0, 2, 3, 4, 5, 5, 6, 7 एषः क्रमः भवति । दत्तांशेऽस्मिन् अङ्कानां संख्या ( N ) 9 वर्तते । अतः N / 2 तमः अङ्कः Md भवति । अर्थात् 10/2 तमः अङ्कः अर्थात् पञ्चमोङ्कः मध्यामाङ्कः भवति । अतः Md = 4 ।

**व्यवस्थितदत्तांशस्य मध्यमाङ्कः -** Md = L+ ( N/2- C.F/Fm) C. I

**सूत्रस्थपदानां विवरणम्**

L = मध्यमाङ्कवर्गस्य निम्नसीमा N = आवृत्तेः योगः FM = मध्यमानवर्गस्य आवृत्तिः । C.F = मध्यमानवर्गविस्तारस्य अधः विद्यमानसञ्चितावृत्तिः। C.I = वर्गविस्तारस्य परिमाणम्

**उदाहरणम्**—

| **वर्गविस्तारः** | **आवृत्तिः** | **सञ्चितावृत्तिः** |
|---|---|---|
| 10-14 | 1 | 1 |
| 15-19 | 3 | 4 |
| 20-24 | 2 | 6 |
| 25-29 | 4 | 10 (cf) |
| 30-34 | 5 (fm) | 15 |
| 35-39 | 3 | 18 |
| 40-44 | 3 | 21 |
| 45-49 | 2 | 23 |
| 50-54 | 2 | 25 |
| | **N = 25** | |

Mdn = L + ( N/ 2 – C.f / fm ) C. I

Mdn = 29 . 5 N= , CF. = 10 , FM= 5

Mdn = 29.5 + ( 25/2 - 10/5 ) 5

Mdn = 29.5 + 2.5

Mdn = 33 (Ans )

## बहुलाङ्कः ( Mode ) -

दत्तांशे योङ्कः बहुवारं संभवति सोङ्कः तस्य दत्तांशस्य बहुलाङ्कः भवति । बहुलाङ्कः प्रायः समूहक्रेन्द्रस्य समीपे भवति । क्रो महोदयौ भणितौ – प्राप्तदत्तांशे यस्य अङ्कस्य आवृत्तिः अधिवारं संभवति, सोङ्कः बहुलाङ्कः इति व्यपदिश्यते । अयं Mo इति सङ्केतेन द्योत्यते ।

**बहुलाङ्कस्य गणना** – अव्यवस्थितदत्तांशस्य बहुलाङ्कः ज्ञातव्यश्चेत् प्रदत्ताङ्कान् आरोहणक्रमे अथवा अवरोहणे व्यवस्थापयेत् । तत्र कस्य अङ्कस्य वारं वारं आवृत्तिः भवतीति निरीक्षणं कुर्यात् । अधिकवारम् आवृत्तिसंख्यैव तस्य दत्तांशस्य बहुलाङ्कः भवति ।

**उदाहरणम्** – प्रदत्तांशाः - 8, 9, 9, 13, 13, 14, 13, 17, 16, 17, 16, 18, 20, 17,

एतत् आरोहणक्रमे लिखामश्चेत् 8, 9, 9, 13, 13, 13, 14, 16, 16, 17, 17, 17, 18, 20 एवं भवति । अत्र अधिकवारम् आवृत्ताङ्कः 17 वर्तते । अतः दत्तांशस्य बहुलाङ्कः Mo = 17 भवति ।

**व्यवस्थितदत्तांशस्य बहुलाङ्कः** – आवृत्तिविवरणसारण्यां यस्य वर्गविस्तारस्य आवृत्तिः अधिकतमं भवति सः वर्गविस्तारः बहुलाङ्कवर्गविस्तारः(mode class ) इति कथ्यते । बहुलाङ्कवर्गविस्तारम् आश्रित्य L, FO, F1, F2 , इत्यादीनां निश्चयः क्रियते ।

सूत्रम् MO = L + ( fo-f1 / 2fo- (f1+f2 ) C. I

**सूत्रस्थपदानां विवरणम्** –

MO = बहुलाङ्कः । L = बहुलाङ्कवर्गविस्तारस्य निम्नसीमा ।

FO = बहुलाङकवर्गस्य आवृत्तिः । F1 = बहुलाङ्कवर्गापेक्षं पूर्ववर्गस्य आवृत्तिः ।

F2 = बहुलाङ्कवर्गापेक्षं परवर्गस्य आवृत्तिः । C.I = वर्गविस्तारस्य परिमाणम्

**व्यवस्थितदत्तांशस्य बहुलाङ्कः** –

| वर्गविस्तारः | आवृत्तिः |
|---|---|
| 10-14 | 1 |
| 15-19 | 5 |
| 20-24 | 7 |
| 25-29 | 6 f1 |
| 30-34 | 8 fo - बहुलाङ्कवर्गः |
| 35-39 | 5 f2 |
| 40-44 | 3 |
| 45-49 | 3 |
| 50-54 | 1 |
| 55-59 | 1 |

L = 29.5, F1 = 6, F2 =5, C.I =5

Mo = 29.5+ ( 8-6 /2X8-(6+5) ) X 5

Mo = 29.5 +2

यदि कस्यचित् दत्तांशस्य मध्यमाङ्कं मध्यमानञ्च ज्ञातं भवति, तर्हि बहुलकमनेन सूत्रेण सरलतया गणयितुं शक्यते।

बहुलाङ्कः = ( 3xमध्यमाङ्कः ) – (2x मध्यमानम् )

Mo = 3 mdn - 2m

मानवव्यवहाराध्ययनाय मनोविज्ञानम् उपकरोति । मनोविज्ञाने अधिगमस्य गुणवत्ता, वेगः, अधिगमपरिवेशम् अवलम्बते । अनुकूलपरिवेशः अधिगममुत्तेजयति , प्रतिकूलपरिवेशः अवरोधः आनयति । ततः परं शारीरिकमानसिकपरिपक्वता ,पूर्वार्जितज्ञानं कौशलानि च आश्रित्य व्यक्तिः अधिगमं प्राप्नोति । अत एव अधिगमप्रक्रिया कस्मिंश्चित् परिवेशे विशिष्टज्ञानकौशलप्राप्त्या व्यवहारपरिर्वतनेन च समाप्तिं न याति, आजीवनं निरन्तरञ्च प्रचलति।

संख्यारूपेण विद्यमानदत्तांशस्य विश्लेषणं व्याख्यानञ्च सरलेन अधिगमकृते सांख्यिकी अत्यन्तं आवश्यकी भवति । सांख्यिकी गणितस्यैव शाखा वर्तते । सांख्यिकी ज्ञानविज्ञानयोः आधारः वर्तते तथा शैक्षिकसमस्यानां समाधनाय अनुसन्धानकार्येषु अत्यन्तम् उपकरोति । केन्द्रीयप्रवृत्तिमापनं सम्पूर्णसमूहेन प्राप्ताङ्कानां प्रतिनिधिः भवति। केन्द्रीयप्रवृत्तिमापनैः दत्तांशस्य विश्लेषणं व्याख्या च सरलतया भवति । विज्ञानशास्त्रं , जीवशास्त्रं , रसायनशास्त्रं, भौतिकशास्त्रं, खगोलशास्त्रं, वाणिज्यं, कृषिः, समाजशास्त्रं, वैद्यशास्त्रं, मनोविज्ञानं, शिक्षा इत्यादिक्षेत्रेषु अनुसन्धाने प्रायः सर्वकार्येषु सांख्यिकी अत्यन्तम् उपकरोति।

## सन्दर्भग्रन्थसूची


1. *डा. बि . पद्ममित्रश्रीनिवासः, शिक्षायाः मनोवैज्ञानिकाधाराः, जगदीश संस्कृत पुस्तकालय, जयपुरम्।*
2. *डा. एच्. के. कपिल, सांख्यिकी के मूल तत्त्व, विनोद पुस्तक मन्दिर, आगरा*
3. *डा. फतह सिंह, शिक्षामनोविज्ञानम्,*

शिक्षारश्मिः 2018, ISSN : 2395 - 7921

# अष्टादशशास्त्राणां परिचयः

परियोजनाकार्यस्य मार्गदर्शकः

**डॉ. देवदत्त सरोदे**

परियोजनाकार्यस्य सदस्याः

दण्डिवर्गः

1. अर्चना दूबे 2. रितुपमा माझी
3. मोनालिसा महापात्र 4. प्रियङ्का
5. गीताञ्जली पण्डा 6. माधबि साहु
7. वैभव सूरज आर्य 8. गौराङ्ग महान्ति

## अष्टादशशास्त्राणि

नहि ज्ञानेन सदृशः पवित्रमिह विद्यते । ज्ञानं मनुजस्य तृतीयं नेत्रमिति नैकानि वचांसि ज्ञानस्य महिमानं कीर्तयन्ति सन्ति । इह पुनः किमिदं ज्ञानमिति जिज्ञासायामुच्यते ज्ञानं नाम प्रमा, यथार्थबोधः, स च बोधः कस्यापि विषयवस्तुनो भवितुमर्हति। यदि कस्यापि विषयस्य ज्ञानं क्रमबद्धरीत्या समग्रतया तर्कप्रमाणपुरस्सरं बुद्धिगम्यरीत्या प्रस्तूयते तर्हि तच्छास्त्रं भवितुमर्हति । यत्जीवने पुरुषार्थचतुष्टयसम्पादनज्ञानं नियच्छति तच्छास्त्रं भवति , यच्च लोके सद्वर्तननैतिकमूल्यान्वितमादर्शजीवनं बोधयति रामादिवत् वर्तितव्यमिति न तु रावणादिवदिति तच्छास्त्रं भवति।

शास्तीति शास्त्रम् । शिष्यते अनेन इति शास्त्रम् । शासु अनुशिष्टौ इत्यस्मात् धातोः सर्वधातुभ्यः ष्ट्रन् इति औणादिकसूत्रेण, करणसाधने ष्ट्रन् प्रत्यये 'शास्त्रम्' इति पदं सिद्ध्यति , अथवा शासनात् शास्त्रम् – शास्त्रं नाम सदसद्विवेकं करोति , संदेहपदेषु वस्तुषु प्रमाणमिव राजते , सन्मार्गं नयति, बुद्धिं विशारदीं करोति, ज्ञाननेत्रमुन्मीलयति , मार्गदर्शनं विदधाति , विज्ञानं विकचीकरोति । शिष्यते अनेन इति शास्त्रम् । शासु अनुशिष्टौ इत्यस्मात् धातोः सर्वधातुभ्यः ष्ट्रन् इति औणादिक -सूत्रेण, करणसाधने ष्ट्रन् प्रत्यये शास्त्रम् इति पदं सिद्ध्यति । शास्त्रस्य परिभाषा यथा-

शास्ति यत् साधनोपायं , पुरुषार्थस्य निमित्तम् ।
तथैवबन्धनोपायं , तत् शास्त्रम् इति कथ्यते ।

कुमारिलभट्टेन उक्तम् यथा-

प्रवृत्तिर्वा निवृत्तिर्वा , नित्येन कृतकेन वा ।
पुसांयेनोपदिश्यते , तच्छाशास्त्रमभिधीयते ।।

शास्ति च त्रायते च इति शास्त्रम् । शासनात् शास्त्रम् शिष्यते अनेन इति शास्त्रम् । अर्थात् या शिक्षा अस्मान् शास्ति, अस्मभ्यम् अनुशासनं प्रदाय अस्माकं रक्षां मार्गदर्शनं च करोति तन्नाम शास्त्रम् इति । शास्त्रम् अस्मान् रामादिवत् प्रवर्तितव्यम् न रावणादिवत् इति बोधयति । धार्मिकसन्दर्भे शास्त्रं मुनिभिः

निर्मितम् प्राचीनग्रन्थः यत्र जनानां हिताय बहूनि उचितकर्त्तव्यानि वर्णितानि सन्ति अपि च अनुचितकार्याणि निषिद्धानि सन्ति। अपरस्मिन् शब्दे शास्त्रं सः धर्मग्रन्थः वर्तते यः जनानां हिताय उपदिशति। अनेन प्रकारेण मानवजीवनाय शास्त्रमतीव महत्त्वपूर्णमस्ति। शास्त्रम् अष्टादशविधम् भवति। यथा-

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्मशास्त्रं पुराणञ्च विद्या: ह्येता: चतुर्दश॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः।
अर्थशास्त्रं चतुर्थञ्च विद्या: ह्यष्टादश एताः॥

सर्वप्रथमं षड् अङ्गानि यथा - शिक्षा, कल्पः, व्याकरणम्, छन्दः, निरुक्तम्, ज्यौतिषम्। चत्वारः वेदाः यथा- ऋक्, साम्, यजुः, अथर्वश्चेति। पुनः मीमांसाशास्त्रम्, न्यायशास्त्रम्, धर्मशास्त्रम्, पुराणशास्त्रम्। अर्थशास्त्रम्, आयुर्वेदशास्त्रम्, धर्नुवेदशास्त्रम्, गान्धर्वशास्त्रम् इति एतानि अष्टादशशास्त्राणि भवन्ति।

## शिक्षा

**शिक्षाशब्दस्य व्युत्पत्तिः -** शिक्ष् भाव अ + टाप् = आ शिक्षा भवति। शिक्षा नाम " शिक्षयति या सा शिक्षा " शक्तो भवितुमिच्छा शिक्षा" इति व्युत्पत्तिः शिक्षाशब्दस्य प्रदर्शिता । शिक्षाशास्त्रं वेदाङ्गेषु प्रथमाऽङ्गं वर्तते । अस्य प्रयोजनं वेदमन्त्राणाम् उच्चारणे शुद्धता सम्पादनम् । चतुर्षु वेदेषु स्वरस्य अत्यधिकप्राधान्यं वर्तते। स्वरेण वा मन्त्राणां उच्चारणेनैव मन्त्रार्थानां ज्ञानं भवति। अतएव उच्यते " शिक्षा घ्राणं तु वेदस्य " एवमेव सायणाचार्यस्य ऋग्वेदभाष्यभूमिकायां-" स्वरवर्णाद्युच्चारणप्रकारः शिक्ष्यते उपदिश्यते वा च यत्र सा शिक्षा " इति। अनेन इदं स्पष्टं यत् वेदमन्त्राणां शुद्धोच्चारणं शिक्षा। वस्तुतः वेदाः ज्ञानदृष्ट्या भावदृष्ट्या च अत्यधिकाः प्रौढाः वर्तन्ते । मन्त्रे प्रयुक्तशब्दानां तेषाम् अर्थानां समुचित-गहनाध्ययनाय पठनाय च शिक्षा अत्यधिकं सहायं करोति। शिक्षायां स्वरः , वर्णः . मात्रा , बलं , साम , सन्तानम् इत्यादीनां विषयाणाम् अध्ययनं भवति।

- **वर्णाः -** अकारादिवर्णाः
- **स्वरः -** उदात्तानुदात्तस्वरिताः स्वराः।
- **मात्रा -** ह्रस्वदीर्घप्लुताः मात्राः।
- **बलम् -** स्थानप्रयत्नो गृह्यते। आभ्यान्तरप्रयत्नः बाह्यप्रयत्नश्च।
- **साम -** निषादषड्जादि।
- **सन्तानम् -** विकर्षणादि।

इत्यादीनि शिक्षाया: प्रयोजनानि सन्ति । आदौ गुरुः कस्यापि मन्त्रस्य स्वरेणसहितम् उच्चारणं करोति। तत्पश्चात् शिष्याः तदुच्चारणं श्रुत्वा अवधानपूर्वकं तन्मन्त्रस्य उच्चारणं कुर्वन्ति। तत्र कथं वर्णः उच्चारणीयः तेषां वर्णानां किमुच्चारणस्थानम् ? कः यत्नः ? कः स्वरः ? इत्यादि सर्वविधविषयाणामुपरि

गुरु: शिक्षया अवधानं ददाति। वेदेषु विद्यमानमन्त्राणाम् उच्चारणं सम्यक् न क्रियते तर्हि विविधेषु शब्देषु शब्दानां अनर्थो भवति। यथा- पाणिनीयशिक्षायामुच्यते –

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥ इति।

अस्य श्लोकस्य भावार्थ: वेदमन्त्राणाम् अशुद्धोच्चारणे वा मिथ्याप्रयोगे यजमानस्य हानिः भवति। अतः वेदाङ्गेषु शिक्षा अवश्यमेव पठनीया।

**प्रमुखशिक्षाग्रन्थाः –**

- ऋग्वेदीयशिक्षाग्रन्थः – पाणिनीयशिक्षा।
- यजुर्वेदीयशिक्षाग्रन्थाः – याज्ञवल्क्यशिक्षा – व्यासशिक्षा- भारद्वाजशिक्षा – माण्डव्यशिक्षादयः।
- सामवेदीयशिक्षाग्रन्थाः – नारदशिक्षा – शाकटायनशिक्षादयः।
- अथर्ववेदशिक्षाग्रन्थः – माण्डूकीशिक्षा।

**वेदाङ्गेषु अन्यतमं कल्पशास्त्रम्**

भारतीय-बृहत्तमवैदिकसाहित्ये कल्पः द्वितीयं स्थानमर्हति। कल्पस्य वैदिकसाहित्ये अत्यधिकं महत्वं वर्तते यतोहि वेदेषु निहितं कर्मकाण्डं सूत्रबद्धं कर्तुम् अयमेव उपकरोति। भारतीयवैदिकसाहित्ये-धर्मशास्त्रीय-विविधविधानां वैदिककर्मानुष्ठानानां नीतिनियमानां व्यवहाराणां च संक्षिप्तविवेचनमेव कल्पसूत्रम् इति वक्तुं शक्यते। कल्पशब्दस्य अर्थो भवति वेदविहितानां कर्मणाम् अनुपूर्वेण सम्पादनं नाम कल्पशास्त्रम्। कल्पन्ते समर्थ्यन्ते यज्ञयागादि प्रयोगाः यत्र इति कल्पः। सूत्रशब्दस्य अर्थः भवति - संक्षेपः, अल्पाक्षरत्वे सति बह्वर्थबोधकत्वं सूत्रत्वम् अतएव कल्पसूत्रस्य अर्थः भवति यज्ञयागादिनियमानां संक्षेपतया कथनम्। कल्पसूत्राणि चतुर्धा विभज्यन्ते। 1. श्रौतसूत्रम्, 2.धर्मसूत्रम् (धर्मशास्त्रम्), 3. गृह्यसूत्रम्, 4- शुल्बसूत्रम्। यज्ञसम्पादनं केवलं वेदैः भवितुं न शक्नोति। अतः सूत्राणां सहायतां विना ब्राह्मणानां वेदानां वा यज्ञविधिज्ञानम् अत्यन्तं कठिनतमम् असम्भवं च भवति। अतः कुमारिलभट्ट-महोदयेन कल्पानां वैशिष्ट्यविषये उक्तं तत्-

वेदादृतेऽपि कुर्वन्ति कल्पैः कर्मणि याज्ञिकाः।
न तु कल्पैर्विना केचिन्मन्त्रब्राह्मणमात्रकात्॥ इति।

वस्तुतः ब्राह्मणकाले यज्ञानां प्रचारः अत्यधिकमासीत्। विस्तृत-बृहत्विशालयज्ञानां सम्पादने तत् कालगणनानां ग्रन्थानाम् आवश्यकताऽनुभूयते स्म। तत् कालनिर्णयः सर्वविधज्ञानं कल्पसूत्राणां माध्यमेनैव भवति।

**कल्पसूत्राणां प्रकाराः –**

कल्पसूत्रस्य प्रकाररूपाणि कल्पसूत्राणि चतुर्विधानि भवन्ति यथा –1. श्रौतसूत्रम्, 2. धर्मसूत्रम् (धर्मशास्त्रम्), 3. गृह्यसूत्रम्, 4. शुल्बसूत्रम् इति।

- **श्रौतसूत्रम्** – अत्र श्रुतिद्वारा प्रतिपादितानां श्रौताग्नीनां विधीयमानानां चतुर्दशानां यज्ञानां विवेचनमस्ति । श्रौतसूत्रेषु श्रुतिप्रतिपादितानां सप्तहविर्यज्ञानां सप्तसोमयज्ञानाम् इति चतुर्दशयज्ञानां विधिविनियोगादिकञ्च प्रतिपाद्यते । तत्र प्रमुखानि श्रौतसूत्राणि सन्ति, आश्वलायनश्रौतसूत्रम्, शांखायनश्रौतसूत्रम्, बोधायनश्रौतसूत्रम्, आपस्तम्बश्रौतसूत्रम्, मानवश्रौतसूत्रम्, कात्यायनश्रौतसूत्रम् च गृह्यन्ते।
- **गृह्यसूत्रम् -** येषु गृह्याग्निना सम्पाद्यमानानां संस्काराणां , गार्हस्थ्यजीवनसम्बद्धानाम् अनुष्ठानानाम् आचारविचाराणाञ्च विवेचनमस्ति । प्रत्येकं वेदस्य कृते भिन्नभिन्नगृह्यसूत्रम् यथा - आश्वलायनगृह्यसूत्रम्, शाङ्खायनं गृह्यसूत्रम्, गोभिलीयगृह्यसूत्रम् । यजुर्वेदसम्बन्धितगृह्यसूत्रम् - शुक्लयजुर्वेदस्य एकमेव गृह्यसूत्रं भवति पारस्करगृह्यसूत्रम् । कृष्णयजुर्वेदे नवगृह्यसूत्राणि भवन्ति । यथा — 1. बोधायनम्, 2. भारद्वाजम्, 3. आपस्तम्बम्, 4. हिरण्यकेशी, 5. वैखानसम्, 6. अग्निवेश्यम्, 7. मानवम्, 8. वाराहम्, 9. काण्वगृह्यसूत्रम्।
- **धर्मसूत्रम् -** धर्मसूत्रेषु वर्णानाम् आश्रमाणाञ्च कर्तव्यानि आचरणनियमाः, प्रायश्चित्तानि , राज्ञः कर्तव्यानि , अपराधस्य च दण्डविधानानि वर्णितानि । धर्मस्य विवेचनं मुख्यतया भवति धर्मसूत्रे, धर्मसूत्रेषु मानवानाम् आचार-विचारः कर्त्तव्यः । नीतिः धर्मः शीलानि व्यवहारः कर्म-राजकर्म अन्यत् च सामाजिकनियमादिकं वर्ण्यते । मन्वादिस्मृतयः हिन्दुजनानां शासनग्रन्था: भवन्ति । तत्र प्रमुखाः ग्रन्थाः सन्ति , बोधायनधर्मसूत्रम्, कृष्णयजुर्वेद-हिरण्यकेशी-कृष्णयजुर्वेद-गौतमधर्मसूत्रम्-मानवधर्मसूत्रम्, सामवेदसम्बन्धितधर्मसूत्रम् ऋग्वेदे वसिष्ठधर्मसूत्रम् बृहस्पतिधर्मसूत्रम् शङ्खलिखितधर्मसूत्रम्।
- **शुल्बसूत्रम्**— वैदिकसनातनधर्म: यज्ञयागकेन्द्रितधर्म: । यागानुष्ठाननिमित्तम् यज्ञवेदीनिर्माणमपेक्षितम् तदर्थं शुल्बस्य उपयोग: क्रियते । शुल्बस्य अर्थ: भवति , मापनस्य रज्जुः। शुल्बसूत्रेषु शुल्बसूत्रेण यज्ञस्य परिधे: , यज्ञस्थानस्य वेदीनिर्माणविधेश्च अत्र वर्णनं भवति । शुल्बसूत्रं भारतीयरेखागणितस्य प्राचीनतमः ग्रन्थ: इति उच्यते । अधुना केवलं यजुर्वेदसम्बन्धितशुल्बसूत्रम् उपलब्धम् । शुक्लयजुर्वेदसम्बन्धितम् एकमेव शुल्बसूत्रं भवति । कृष्णयजुर्वेदसम्बन्धितानि षड्विधानि शुल्बसूत्राणि भवन्ति । यथा — 1. बोधायनशुल्बसूत्रम् 2. आपस्तम्बशुल्बसूत्रम् 3. मानवशुल्बसूत्रम् 4 . मैत्रायणीयशुल्बसूत्रम् 5. वाराहशुल्बसूत्रम् 6. वाधुलशुल्बसूत्रम् 7. हिरण्यकेशीशुल्बसूत्रम् ।

इत्थं वैदिककर्मकाण्डस्य परिरक्षणार्थं मानवजीवनं व्यवस्थापयितुञ्च प्रवृत्तानि शास्त्राणि कल्पसूत्राणि सन्तीति।

**व्याकरणम्** — वेदस्य षडङ्गानि भवन्ति। यथा –

शिक्षाकल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्यौतिषामयनं चक्षुः वेदाङ्गानि षडेव तु॥ इति।

1. शिक्षा 2. कल्पः 3. व्याकरणम् 4. निरुक्तम् 5. छन्दः 6. ज्यौतिषम्। एतेषु षट्सु अङ्गेषु व्याकरणं तृतीयस्थानं स्वीकरोति। व्याकरणं शास्त्रं शब्दशास्त्रम् इति कथ्यते। मुख्यतः व्याकरणशास्त्रं द्विविधं वर्तते। यथा – 1. प्राचीनव्याकरणम् 2. नव्यव्याकरणम् इति।

प्राचीनव्याकरणस्य प्रणेता महर्षि पाणिनि अस्ति। व्याकरणं वेदपुरुषस्य मुखरूपेण कल्पितमस्ति। पण्डिताः व्याकरणस्य विषये कथयन्ति । यत् - व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन इति व्याकरणम्। संस्कृतवाङ्मये प्रयुक्तानां शब्दानां शुद्धाशुद्धयोः विचारः व्याकरणेनैव क्रियते।

व्याकरणशास्त्रस्य उत्पत्तिकथा तैत्तिरीयसंहितायां वर्णिता अस्ति। महर्षेः यास्कस्य निरुक्तग्रन्थे व्याकरणस्य अनेकेषां परिभाषिकशब्दानां प्रयोगः समुपलभ्यते। व्याकरणशास्त्रे वर्णानामुच्चारणस्थानं , समासः, सन्धिः, अव्ययम् , प्रत्ययः , इत्यादयः सन्ति। मानवविचाराणाम् अभिव्यक्तिपूर्वकं परिष्कृता परिमार्जिता भाषाविश्लेषणार्थं व्याकरणम् आवश्यकम्। व्याकरणशास्त्रस्य पञ्चप्रयोजनानि सन्ति। यथा – रक्षा , ऊहः, आगमः , लघुः, असन्देहः इति॥

**निरुक्तम्**

**निरुक्तस्य परिचयः –**

वैदिकधर्मस्य परमप्रमाणगन्था: वेदा:। वेदानाम् अर्थबोधाय वेदाङ्गानि रचयामासु: आचार्या:। तत्र आद्यं वेदाङ्गं यास्कप्रणीतं निरुक्तशास्त्रम्। वेदानां विशिष्टपदानां कोश: निघण्टु इति उच्यते , निघण्टो: व्याख्यानमेव निरुक्तम्। अर्थावबोधे निरपेक्षतया पदज्ञानम् यत्र उक्तम् तत् निरुक्तम् इति उच्यते। निरुक्तं श्रोत्रमुच्यते, इति वचनात् वेदपुरुषस्य निरुक्तशास्त्रं श्रोत्रभूतं विद्यते। निर् इत्युपसर्गपूर्वकात् वच् धातोः क्त प्रत्यये निरुक्तशब्दः निष्पन्नः भवति। निरुक्तम् इति शब्दस्य प्राचीनतमः प्रयोगः देवताध्यायब्राह्मणे मुण्डकोपनिषदि छन्दोग्योपनिषदि च प्राप्यते। सम्प्रति अस्य वेदाङ्गस्य प्रतिनिधिभूतौ द्वौ एव। प्रथमः निघण्टुः द्वितीयश्च निरुक्तं निघण्टुः प्राचीनतमः वैदिकः शब्दकोशः अस्ति। अत्र पञ्च अध्यायाः सन्ति। तेषु अध्यायेषु 1341 शब्दाः परिगणिताः। निघण्टोः प्रारम्भिकम् अध्यायत्रयं नैघण्टुक इति नाम्ना, चतुर्थः अध्यायः नैगम अथवा एकपदिकनाम्ना, अन्तिमः अध्यायः दैवताकाण्ड इति नाम्ना च ज्ञायते। निघण्टौ प्रथमः गो इति शब्दः अन्तिमश्च देवपत्नी इति। अतः एव गवादिदेवपत्यन्तशब्दसमाम्नायः इति नाम्ना

निघण्टुः ज्ञायते । निरुक्तशास्त्रम् अस्यैव निघण्टोः निर्वचनात्मिका व्याख्या वर्तते । अत्र निघण्टोः 230 शब्दानां धात्वर्थमूलिकया प्रक्रियया च अभिप्रायः स्पष्टीकृतः वर्तते । अध्यायानाम् अवान्तरतिभागः पादेषु अस्ति । निरुक्ते प्राधान्येन पञ्चविषयाः वर्णिताः सन्ति – वर्णागमः, वर्णविषयः, वर्णविकारः, वर्णनाशः विविधेषु अर्थेषु धातूनां प्रयोगश्चेति । तद्यथा-

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगः तदुच्यते पञ्चविधं निरुक्तम्।। इति।

**निरुक्तस्य विषयवस्तु** –

निरुक्तशास्त्रस्य अभ्युदयः वैदिकवेदविद्यायाः सहायकरूपेण अभवत् । प्रारम्भिके वैदिककाले वैदिकदेवतानां स्वरूपं स्पष्टीकर्तुं तेषां नाम्नां निर्वचनं भवति स्म ।

**निरुक्तस्य महत्त्वम्-**

निरुक्ते वैदिकशब्दानां निरुक्तिः वर्तते । निरुक्तः इति शब्दस्य अर्थः अस्ति निरुक्तिः, निरुक्तस्य सर्वमान्यसिद्धान्तः यत् सर्वे शब्दाः धातुभ्यः एव निर्मिताः भवन्ति । अतः निरुक्ते शब्दानां व्याख्यावसरे धातुना सह प्रत्ययानां निर्देशनं प्रदर्शयति । अतः यास्काचार्यस्य मते सर्वे शब्दाः यौगिकाः वैयाकरणः शाकटायनः अपि इदमेव मतं प्रकटीकरोति महाभाष्यकारेण पतञ्जलिनाऽपि अस्मिन् विषये प्रोक्तं— नाम च धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम् । शब्दानां व्युत्पत्तिः बहुधा भवति । आचार्यशब्दस्य व्युत्पत्तिं करोति यास्काचार्यः- आचारं ग्राहयति आचिनोत्यर्थान्, आचिनोतिबुद्धिमिति वा इत्येवमयं निर्वचनप्रकारः नितान्तं वैज्ञानिकः अस्ति ।

**छन्दः**

शास्त्रेषु छन्दःशास्त्रस्य अन्यतमं स्थानं वर्तते । पिङ्गलाचार्येण प्रणीतं "छन्दोवीचितिः" इति प्राचीनं छन्दःशास्त्रं वर्तते । यस्मिन् शास्त्रे छन्दसां निशेषतः सङ्ग्रहणं लक्षणादीनां च विशिष्टं निरूपणं विधीयते। निरुक्तकारेण छन्दःशब्दस्य व्युत्पत्तिः छाद्यते छन्द्यते वा अनेन इत्येषा प्रदर्शिता । वैयाकरणसिद्धान्तानुसारेण भौवादिकात् चदि आह्लादे दीप्तौ च इत्यस्मात् छन्दः शब्दं व्युत्पाद्य, चन्देरादेश्च इति औणादिकसूत्रेण असुन् प्रत्ययं विधाय आदिमस्य चकारस्य छत्वे कृते सति छन्दःशब्दः निष्पद्यते । संस्कृतवाङ्मये छन्दःशास्त्रस्य परम्परा प्राचीनकालात् सुप्रतिष्ठिता वर्तते । एतद्विषयकं प्रत्येकम् उदाहरणं वैदिकसंहितासु विलोक्यते । संहिताकाले एव छन्दसां नियमनव्यवस्था अपि विकसिता अभूत् ।

**छन्दसां प्रकाराः-**

छन्दसां विभागद्वयं वर्तते- वैदिकच्छन्दांसि, लौकिकच्छन्दांसि चेति । वैदिकमन्त्रेषु प्रयुक्तानि छन्दांसि वैदिकच्छन्दांसि रामायणमहाभारतादिलौकिकग्रन्थेषु च प्रयुक्तानि छन्दांसि लौकिकच्छन्दांसि उच्यन्ते । यद्यपि लौकिकछन्दसाम् उदयः विकासाश्च वैदिकछन्देभ्यः एव सञ्जातः तथापि द्वयोः कश्चन सूक्ष्मभेदः

विद्यते। लौकिकच्छदसः अवतारविषये क्रौञ्चवधस्य घटना सुप्रसिद्धा वर्तते। शोकः श्लोकत्वमागतः महर्षे वाल्मीकेः हृदयपटले समुद्भूतः शोकः श्लोकत्वेन अवतीर्णः।

मा निषाद प्रतिष्ठां त्वमगम शाश्वतीः समाः।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥ इति।

**ज्यौतिषशास्त्रम्**

वेदाङ्गेषु ज्यौतिषम् अन्यतमम् अङ्गं वर्तते । तथा चोक्तम् – ज्यौतिषामयनं चक्षुः ॥ इति॥ ज्यौतिषशास्त्रे नक्षत्राणां गणना , ग्रहाणां स्थितिः ,होरा , वासरः , वर्षम् , कुण्डलिः , मासानां विषये वर्णितम् अस्ति। यथा –

वेदा हि यज्ञार्थमभिप्रवृत्ताः, कालाभिपूर्वा विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं , यो ज्यौतिषं वेद स वेद यज्ञम्॥ इति।

ज्यौतिषशास्त्रं तु वेदस्य नेत्रस्थानीयमस्ति। ज्यौतिषशास्त्रं त्रिधा विभज्यते, यथा – 1. संहिता 2. सिध्दान्तः 3. होरा इति। ज्यौतिषशास्त्रं विना अहोरात्र - पक्ष – मास – ऋतु – संवत्सराणां शुभत्वाशुभत्वज्ञानमपि सम्भवं नास्ति। नारदेन उक्तं यत् -

अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम्।
प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ॥ इति।

व्यावहारिकरूपेण कालस्य षड्भागाः सन्ति। यथा – 1.वत्सरः 2 . अयनम् 3. ऋतुः 4 . मासः 5. पक्षः 6 . तिथिः/ दिवसः इति। यज्ञादिकार्याणां सम्पादनाय वैवाहिकविषयज्ञानार्थं यात्रादिकसम्पादनाय चापि ज्यौतिषस्य आवश्यकता भवत्येव।

**ऋग्वेदः**

संस्कृतसाहित्ये वेदानां स्थानं सर्वोपरि वर्तते । साम्प्रतिकसमये चत्वारः वेदाः उपलभ्यन्ते । सायणाचार्येण उक्तम् यत् – इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकं साधनं यो वेदयति स वेदः । चतुर्षु वेदेषु बृहत्तमः वेदः ऋग्वेदः । 'ऋच्यते स्तूयते यया सा ऋक्' । ऋचां समूहः ऋग्वेदः । ऋचः इति शब्दस्य मन्त्रः इत्यर्थः। ऋग्वेदे एकविंशतिः शाखाः सन्ति। ऋग्वेदे 10580 मन्त्राः सन्ति। ऋग्वेदः एव ऋक् संहिताशब्देन अभिधीयते । अस्य वेदस्य ऋत्विक् होता विद्यते । ऋग्वेदः मण्डलाष्टकभेदेन द्विधा । ऋग्वेदे मण्डलक्रमानुसारेण 10 मण्डलाः, 85 अनुवाकाः, 1028 सूक्ताः, 10552 मन्त्राः सन्ति। अष्टकक्रमानुसारेण च 8 अष्टकाः , 64 अध्यायाः , 2024 वर्गाः , 10552 मन्त्राः सन्ति। 'ऋषयः मन्त्र द्रष्टारः न तु कर्त्तारः' । पाश्चात्यविद्वांसः ऋग्वेदस्य प्रथमं दशमञ्च मण्डलमर्वाचीनं इति मन्यन्ते । द्वितीय मण्डलस्य ऋषिरस्ति गृत्समदः, तृतीय मण्डलस्य विश्वामित्रः, चतुर्थस्य वामदेवः, प्रञ्चमस्य अत्रिः, षष्ठस्य भरद्वाजः, सप्तमस्य वशिष्ठः च। अष्टममण्डलस्य मन्त्राणामृषिः कण्वस्थाङ्गिरसवंशोद्भवाः सन्ति। नवममण्डलेऽखिलाः मन्त्राः

सामदेवताविषयकाः सन्ति।

1. ब्राह्मणम् — ऐतरेयब्राह्मणम्, कौषीतकब्राह्मणम्।
2. आरण्यकम् — ऐतरेयआरण्यकम्, सांङ्खायनारण्यकम्।
3. उपनिषद् — ऐतरेयउपनिषद्, कौषितक्युपनिषद्।
4. शाखाः- शाकलशाखा, वाष्कलशाखा, आश्वालायनशाखा, शांखायनशाखा, मण्डुकायनशाखा च। सम्प्रति ऋग्वेदस्य प्रचलिता संहिता शाकलशाखीया एव वर्तते।

**यजुर्वेदः**

आध्वर्यकर्मसम्पादनाय यजुषां संकलनं यत्रास्ति सा "यजुर्वेदसंहिता" इत्युच्यते । यजुश्शब्दस्य व्याख्या भिन्नभिन्नरूपेण भवति। यथा – अनियताक्षरावसानो यजुः, "गद्यात्मको यजुः ", शेषे यजुश्शब्दः , "यजुर्यजते", एकप्रयोजनं साकांक्षं पदजातमेकं यजु इति। परन्त्वेतेषां तात्पर्यमेकमेव भवति ऋक्सामादिभ्यो भिन्नानां गद्यात्मकमन्त्राणामभिधानमेव यजुरिति। तैत्तिरीयसंहिताभाष्यभूमिकायां सायणाचार्यः लिखति –

" भित्तिस्थानीयो यजुर्वेदश्चित्रस्थानीयावितरौ तस्मात्कर्मसु यजुर्वेदस्यैव प्राधान्यम्" इति।

यजुर्वेदः विष्णोः स्वरूपं भवति, "यजूंषि विष्णुः" इत्युक्तत्वात् । यजुर्वेदः प्राणतत्त्वं मनस्तत्त्वं च प्रतिपादयति । अत उच्चते – प्राणो वै यजुः इति । यजुर्वेदो वायुमन्तरिक्षं च वर्णयति । अत उच्चते – "अन्तरिक्षलोको यजुर्वेदः" इति । तैत्तरीयोपनिषदि अयं क्षत्रियाणां वेद इत्युच्चते । यथा –"यजुर्वेदं क्षत्रियस्याहुर्योनिम्" इति। यजुर्वेदस्य प्रधानदेवता "वायुः"।

**यजुर्वेदस्य विभागः –**

यजुर्वेदः द्विधा विभज्यते। यथा – शुक्लयजुर्वेदः, कृष्णयजुर्वेदश्चेति। तत्र ब्रह्मसम्प्रदायस्य प्रतिनिधिः कृष्णयजुर्वेदः, आदित्यसम्प्रदायस्य च शुक्लयजुर्वेदोऽस्ति । शुक्लयजुर्वेदे केवलं मन्त्रा भवन्ति, किन्तु कृष्णयजुर्वेदे मन्त्रैस्सह तत्प्रयोगविधिव्याख्यानञ्च वर्तते। शुक्लयजुर्वेदस्य मन्त्रा याज्ञवल्क्येन आख्यायन्ते। उक्तञ्च शतपथब्राह्मणे – आदित्यानीमानि शुक्लानि यजूंषि, वाजसनेयेन याज्ञवल्क्येन आख्यायन्ते इति। शुक्लयजुर्वेदस्य मन्त्रसंहितासु वाजसनेयीसंहिता माध्यन्दिनसंहिता वा, काण्वसंहिता इति संहिताद्वयं प्रसिद्धमस्ति । कृष्णयजुर्वेदस्य तैत्तिरीयसंहिता, मैत्रायणीसंहिता, काठकसंहिता, कपिष्ठलकठसंहिता इत्यादयः प्रसिद्धास्सन्ति।

**शुक्लयजुर्वेदस्य विषयवस्तु –**

शुक्लयजुर्वेदे (40) अध्यायाः । तेषु 303 अनुवाकाः, अनुवाकेषु 1975 कण्डिकास्सन्ति । समग्रवेदेऽस्मिन् 29625 शब्दाः, 88875 अक्षराणि च भवन्ति । शतपथब्राह्मणाधारेण यजुषामक्षराणि 288000 भवन्ति । अष्टौ बृहतीसहस्राणि यजुषामिति । अत्र प्रथमयोर्द्वयोरध्याययोः दर्शपौर्णमासयागौ वर्ण्येते । तृतीयाध्याये दैनिकाग्निहोत्रचातुर्मास्ययज्ञसम्पर्कीय-मन्त्रास्सन्निविष्टास्सन्ति ।

चतुर्थाध्यायादष्टमाध्यायं यावदग्निष्टोमयागस्योल्लेखः क्रियते । नवमदशमाध्याययोः वाजपेयराजसूययागसम्बन्धिनो मन्त्रा विद्यन्ते । वाजपेययाग एकाहयाग इत्युच्चते । 11 तः 18 अध्यायेषु अग्निचयनमन्त्राः, षोडशाध्याये ( रुद्राध्याये ) शतरुद्रीयहोमः, अष्टादशाध्याये वसोर्धारामन्त्राः, 19-21 अध्यायेषु सौत्रामणियागः, 22-25 अध्यायेषु अश्वमेधयागः, 26-29 अध्यायेषु खिलमन्त्राः, त्रिंशाध्याये पुरुषमेधयागः, एकत्रिंशाध्याये पुरुषसूक्तम्, 32-33 अध्याययोः सर्वमेधयागः, 34 अध्याये शिवसङ्कल्पमन्त्राः, 35 अध्याये पितृमेधमन्त्राः , 36-39 अध्यायेषु प्रवर्ग्ययागमन्त्राः वर्णिताः सन्ति । पुरुषसूक्ते ऋग्वेदापेक्षया (6) मन्त्राः अधिकाः अत्र विद्यन्ते । चत्वारिंशत्तमोऽध्यायः ज्ञानकाण्डमित्युच्यते । एषः ईशावास्योपनिषत् इति नाम्ना प्रसिद्धः । संस्कृतसाहित्ये एषा सर्वप्राचीनोपनिषद्भवति । शुक्लयजुर्वेदस्य माध्यन्दिनकाण्वसंहितयोर्विषयवस्तु प्रायस्समानं भवति । उभयोरध्यायसंख्या (40) एव ।

**कृष्णयजुर्वेदस्य विषयवस्तु –**

कृष्णयजुर्वेदस्य पञ्चाशीतिसंख्याकाश्शाखास्सन्ति । तास्वधुना चतस्रश्शाखा एव समुपलभ्यन्ते । यथा – तैत्तिरीयशाखा , मैत्रायणीयशाखा , कठशाखा , कपिष्ठलशाखा च । तैत्तिरीयसंहितायां सप्तकाण्डाः , 44 प्रपकाठकाः , 631 अनुवाकास्सन्ति । शुक्लयजुर्वेदे वर्णिता अनेके विषया अत्र समाना भवन्ति । विशिष्टतया पौरोडाश-यजमान-वाजपेय-राजसूययागा भिन्नतयाऽत्र वर्णिताः । विशिष्टो वेदभाष्यकारस्सायणाचार्यः अस्याश्शाखाया एव भवति । मैत्रायणीसंहिता गद्यपद्योभयात्मको भवति । अत्र चत्वारः काण्डास्सन्ति । यथा – आदिमकाण्डः, मध्यमकाण्डः, उपरिकाण्डः, खिलकाण्डश्चे ति । प्रथमे काण्डे एकादश प्रपाठकाः भवन्ति । तत्र दर्शपौर्णमासयागः, अध्वरम्, आधानम्, पुनराधानम्, चातुर्मास्यम् वाजपेय इत्यादियागाः वर्णिताः ।

**सामवेदः**

सामानि यो वेत्ति स वेदतत्त्वम् इति वचनाज्ज्ञायते यत्सामवेदस्सर्ववेदप्रधानः । गीतायां स्वयं भगवान् श्रीकृष्ण उक्तवान् यत् – वेदानां सामवेदोऽस्मि इति । यः जागरणशीलः पुरुषस्स एव सामगानं कर्तुं समर्थो भवति । यथोक्तं – यो जागार तम् ऋचः कामयन्ते, यो जागार तं सामानि यन्ति इति । ऋचस्साम रसः, साम्न उद्गीथो रसः, रसतमः परमः पराध्र्यः ....उद्गीथः इति छान्दोग्योपनिषदि उक्तम् । अर्थात् सामवेदः प्रणवस्य ॐकारस्य प्रतिपादकोऽस्ति । साम इत्युक्ते तया सह सम्बन्धः, अमो नाम स्वरो यत्र वर्तते तत्साम इति ज्ञायते । सामवेदस्य द्वौ भागौ स्तः – अर्चिकः गानं च आर्चिकोऽपि द्विभागात्मकः – पूर्वोत्तरभेदाभ्याम् । सामसंहितायाः संकलनमुद्गातुः कृते कृतम् जैमिनीयसूत्रानुसारं गीतिः एव साम । छान्दोग्योपनिषदि स्वर एव साम इत्यक्तम् । बृहदारण्यकोपनिषदि गानम् एव साम इति प्रतिपादितम् । यासाम् ऋचामुपरि सामगानं क्रियते ता ऋचः सामयोनिः इति उच्यन्ते । गीतिषु सामाख्याः । आङ्गूष्यं साम इति ऋग्वेदे । आङ्गूष्यं नाम स्तोत्रम् । या ऋक् तत्साम इति छान्दोग्योपनिषदि । ऋचि अव्यूढं साम इति छान्दोग्ये । अमोऽहमस्मि सा

त्वम्, सामाहमस्मि ऋक्त्वम्, द्यौरहं पृथिवी त्वम् । ताविह सं भवाव प्रजामजनयावहै इति अथर्ववेदे । विशिष्टा काऽपि गीतिः सामेत्युच्यते इति मीमांसासूत्रे ।

**सामवेदस्य विषयवस्तु -**

सामवेदस्यार्चिकद्वयं वर्तते – पूर्वार्चिकमुत्तरार्चिकं च । पूर्वार्चिके षट्प्रपाठका अध्याया वा सन्ति । प्रत्येकं प्रपाठके /अध्याये द्वौ खण्डौ स्तः । प्रत्येकं खण्डे पुन एका दशतिः , प्रतिदशतिं च दशसंख्यकात् न्यूनाः अधिका वा मन्त्रा विद्यन्ते । प्रथमप्रपाठकः आग्नेयकाण्डः, द्वितीयाध्यायतः चतुर्थाध्यायं यावत् ऐन्द्रपर्व, पञ्चमोऽध्यायः पवमानपर्व, षष्ठप्रपाठक आरण्यकपर्व इत्युच्यते । प्रथमाध्याययतः पञ्चमाध्यायं यावत् ऋचः ग्रामगान नाम्ना उच्यते । पूर्वार्चिकेऽस्मिन् 650 मन्त्राः विद्यन्ते । उत्तरार्चिके नव प्रपाठकाः सन्ति । प्रथमपञ्चप्रपाठकानां द्वौ द्वौ भागौ स्तः । अवशिष्टचतुर्णां प्रपाठकानां त्रयस्त्रयो भागास्सन्ति । उत्तरार्चिके मन्त्राणां संख्या 1225 । ऋग्वेदस्य 1504 मन्त्रास्सामवेदे उद्धृतास्सन्ति । सामवेदस्य अक्षरसंख्या 1,44,000 भवति । उक्तं च शतपथब्राह्मणे – चत्वारि बृहतीसहस्त्राणि साम्नाम् इति ।

सामवेदस्सङ्गीतसाहित्यस्य मौलिकं शास्त्रमित्युच्यते । मध्यम-गान्धार-ऋषभ-षड्ज-निषाद-धैवत-पञ्चमैस्सप्तभिः स्वरैस्सामगानं भवति । गानपद्धतिश्चतुर्धा विभज्यते । यथा- (1) वेयगानम्, (2) अरण्यगानम्, (3) ऊहगानम्, (4) ऊह्यगानञ्च । षट् सामविकारास्सन्ति । यथा – (1) विकारः (2) विश्लेषणम् (3) विकर्षणम् (4) अभ्यासः (5) विरामः (6) स्तोभश्चेति । छान्दोग्योपनिषदाधारेण साम सप्तविधं भवति । यथा – (1) हिङ्कारः (2) प्रस्तावः (3) आदिः (4) उद्गीथः (5) प्रतिहारः (6) उपद्रवः (7) निधनमिति । ऋग्वेदस्य ये ये विषयास्सन्ति प्रायशस्त एव क्रमबद्धतया अत्र प्रतिपादिताः । ऋग्वेदवदत्रापि अग्न्यादिदेवसम्बन्धिसूक्तानि वर्तन्ते ।

**सामवेदस्य शाखाः-**

सामवेदस्य एकसहस्त्रशाखा आसन्निति विदुषामभिप्रायः । यथोक्तं भगवता पतञ्जलिना – सहस्त्रवर्त्मा सामवेदः इति । सामवेदस्य आद्याचार्यः जैमिनिरेव भगवतीति स्वीक्रियते । तदनन्तरं तत्पुत्राः शिष्याश्च सामाध्ययनं कृत्वा सामशाखानां विस्तारं कृतवन्तः । तेषु सुमन्तु-सुस्वान्-सुकर्मा-हिरण्यनाभ-पौष्यञ्जि-कार्त्ता-लौगाक्षि-माङ्गलिपु-कुल्य-कुसीद-कुक्षीप्रमुखा आसन् । वायुपुराणे ब्रह्मा-प्रपञ्चहृदय-दिव्यावदान्-चरणव्यूह-जैमिनिगृह्यसूत्रादीनां पर्यायलोचनया ज्ञायते यत्सामवेदस्य त्रयोदशशाखा आसन् । तासु त्रयाणामाचार्याणां शाखा एव समुपलभ्यन्ते । यथा- कौथुमीयशाखा, राणायनीयशाखा, जैमिनीयशाखा च । कृतर्षेरनुयायिनः कार्त्ता इत्युच्यन्ते । एते चतुर्विंशतिधा भवन्ति । यथोक्तं मत्स्यपुराणे-

चतुर्विंशतिधा येन प्रोक्ता वै सामसंहिता ।
स्मृतास्ते प्राच्यसामानाः कार्तानामेह सामगाः ॥

एवं सामशाखावर्तिनः द्विधा विभज्यन्ते । प्राच्याः, उदीच्यश्च ।

**अथर्ववेदः**

सर्वपुरातनं चतुर्णां वेदानां मध्ये अन्तिमः वेदः भवति अथर्ववेदः । अभिचारक्रियायाः प्राधान्येन अथर्वणमर्षिणा सृष्टत्वात् अथर्ववेदः इत्युच्यते । यः अथर्ववेदे देवतानां स्मृतिः , चमत्कारः, चिकित्साः विज्ञानम्, दर्शनविषये वर्णितम् अस्ति । भूगोलः, खगोलः, वनस्पतिविद्याः, विभिन्नरोगाणां चिकित्सा, औषधीयवृक्षः इत्यादि अथर्ववेदस्य मूलसिद्धान्ताः भवन्ति । अथर्ववेदस्य अन्यानि ब्रह्मवेदः अंगिरोवेदः अथर्वाङ्गिरसवेदादीनि नामानि प्रमुखतां भजन्ते । अथर्वधातुः यत् कौटिल्यार्थकः तथा हिंसावाचकः अस्ति । अत एव अर्थवशब्दस्य अर्थोऽस्ति यत् अकुटिलवृत्या अहिंसावृत्याः च मनसः स्थैर्यप्राप्तकर्ता व्यक्तिः यथा-

अभिचारक्रियायाः प्राधान्येन तथा अथर्वणनामर्षिणा सृष्टत्वात् अथर्ववेद इत्युच्यते ।

अथर्वाङ्गिरसपदस्य व्याख्याकृते सति प्रतीयते यत् ऋषिद्वयेन दृष्टानां मन्त्राणां समूहरूपः एव अर्थववेदः अथर्वदृष्टाः मन्त्राः शान्तिपुष्टिकर्मयुक्ताः सन्ति, परन्तु अंगिरसदृष्टाः मन्त्राः अभिचारिकाः सन्ति । अनेन प्रकारेण ऋग्वेदादयस्त्रयो वेदा आमुष्मिकाणां फलानां प्रदातारः सन्ति किन्त्वथर्ववेदः ऐहिकमपि फलं प्रयच्छति। जीवनस्य सुख-सिद्ध्यर्थमिह अनेकेषामनुष्ठानानां निर्देशः कृतो वर्तते । वेदेऽस्मिन् मारण-मोहनोच्चाटनादीनां ज्वरापस्मारादिरोगविषकानाञ्च मन्त्राणां संग्रहोऽस्ति ।

अत्र 20 काण्डानि, 34 प्रपाठकाः, 111 अनुवाकाः 731 सूक्तानि, 5987 मन्त्राश्च सन्ति। अष्टादशतमं काण्डं श्राध्दविषयकं , विंशतितमश्च सोमयागवर्णनपरकम्, एतयोः काण्डयोर्मन्त्राः ऋग्वेदीया एव। यद्यपि पिप्पलाद-स्तौद-चारणवैद्यारण्याः नवशाखाः यत्र-तत्र वर्णिताः सन्ति। सम्प्रति अथर्ववेदस्य द्वे एव शाखे समुपलभ्येते। पिप्पलाद्- शौनकाख्ये। एकं ब्रह्मणं विद्यते-गोपथब्रह्मणं अत्र वेदे आरण्यकं नास्ति । प्रश्नोपनिषदः, मुण्डकोपनिषदः, माण्डूक्योपनिषदः तिस्रः उपनिषदः विद्यन्ते। तिस्रः शिक्षाः विद्यन्ते।

यथा - 1.माण्डूकीशिक्षा 2.शौनकीयाशिक्षा 3.अथर्ववेदशिक्षा द्वे कल्पसूत्रे विद्यते ।

यथा- वैतानश्रोतसूत्रम्, कौशिकगृह्यसूत्रम् भवति ।

**मीमांसादर्शनम्**

मीमांसते विचार्यते तत् मीमांसादर्शनम् । मीमांसादर्शनस्य प्रवर्त्तकः महर्षि जैमिनिः । भाष्यकारः शबरस्वामी । अतः अस्य भाष्यस्य नाम शाबरभाष्यम्, वार्त्तिककारश्च कुमारिलभट्टः । अस्मिन् शास्त्रे धर्मानुष्ठानेनैव अभिमतफलसिद्धिः भवति इति मतम् । धर्मस्य लक्षणं किम् धर्मप्रमाणं किम् इत्यादिशङ्कानां समाधानं पूर्वमीमांसाशास्त्रादेव सिद्धं भवति । एतद् शास्त्रं द्वादशाध्यायेषु विभक्तं भवति । प्रत्येकस्मिन् अध्याये त्र्यधिकाः पादाः सन्ति, एवं धर्मानुष्ठानविषये प्रमाणभूतस्य द्वादशलक्षणी इत्याख्यानं मीमांसाशास्त्रस्य सामान्यः परिचयः ।

## न्यायदर्शनम्

शास्त्रार्थविचारणे ईश्वरास्तित्वसाधने च न्यायदर्शनं भारतीयदर्शनेषु वैशिष्ट्यमाधत्ते । आन्वीक्षिकीति न्यायशास्त्रस्य प्राचीनं सुप्रसिद्धं नाम । न्यायदर्शनस्य प्रवर्त्तकः अक्षपादगौतमः । अस्य दर्शनस्य भाष्यकारः महर्षिः वात्स्यायनः । न्यायदर्शनं मुख्यतः पदार्थमीमांसा-प्रमाणमीमांसा चेति विभागद्वयेन विभक्तम् । पदार्थमीमांसाप्रकरणम् अक्षपादप्रणीतन्यायमतानुसारं प्रमाण-प्रमेयादिषोडशपदार्थनां विचारः प्रवर्तते । तेषां षोडशानां नामानि यथा- प्रमाणः, प्रमेयः, संशयः, प्रयोजनं, दृष्टान्तः, सिद्धान्तः, अवयवः, तर्कः, निर्णयः, वादः, जल्पः, वितण्डा, हेत्वाभासः, छलः, जातिः, निग्रहस्थानम् इति । न्यायदर्शने द्वादशप्रमेयानि सन्ति । अनुमानं त्रिविधं यथा- पूर्ववत्, शेषवत्, सामान्यदृष्टः । दर्शने अस्मिन् षोडशपदार्थानां तत्त्वज्ञानेन निःश्रेयससिद्धिः भवति । एतेषां पदार्थानां यथार्थज्ञानेन मुक्तिः सिद्ध्यति इत्येतेषां सिद्धान्तः । बौद्धानां जगत्क्षणिकत्ववादमस्वीकृत्य न्यायादर्शे जगतः स्थिरसत्तां सयुक्तिं प्रतिपादितवन्तः सत्कार्यवादिनो नैयायिकाः । एतेषां मते जगतः सत्ता शून्यवादिबौद्धानामिव न सुतरां मिथ्या । एवं पञ्चाध्यायात्मशरीरयुक्तस्य न्यायशास्त्रस्य परिचयः ।

## धर्मशास्त्रम्

धर्मशास्त्रं भारतीयशास्त्रेषु अन्यतमम् अस्ति । धर्मशब्दः धृ- धारणे इति धातोः व्युत्पन्नः । धर्मविषये महाभारते दृश्यते यत् 'धारणाद्धर्म इत्याहुः धर्मो धारयते प्रजाः' अत्र धर्मशब्दस्य स्वरूपं संक्षिप्ततया दृश्यते । धर्मः समाजस्य धारणं करोति तथा च कल्याणकारी मनुष्याणां मार्गनिर्देशनं करोति ।

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ इति ॥

धर्मार्थकाममोक्षेषु चतुर्षु पुरुषार्थेषु धर्मः प्रधानः विद्यते । धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रमुच्यते । धर्मशास्त्राणि स्मृतयः इति नाम्ना अपि व्यवह्रियन्ते । मनुस्मृतिः समाजशास्त्रस्य अद्वितीया कृतिरस्ति । मन्वत्रिविष्णुहारीतादिस्मृतयः विंशतिः सन्ति । देवल-चान्द्रायण-कपिलादिभिश्च विरचिताः स्मृतयः पञ्चाशत् सन्ति । आहत्य सप्ततिः स्मृतयः सन्ति । धर्मशास्त्रे सामान्यतया ये विषयाः प्रतिपाद्यन्ते ते त्रिषु भागेषु विभज्यन्ते । आचारः, व्यवहारः, प्रयश्चित्तञ्च इति । वर्णाश्रमधर्मः षोडशसंस्काराः गार्हस्थ्यधर्मः पञ्चमहायज्ञाः तीर्थयात्रादयः विषयाः धर्मशास्त्रे सन्निविष्टाः । अतः मानवजीवनं सुचारुरूपेण सम्पादयितुं धर्मशास्त्राणां बहुमहत्त्वं विद्यते ।

## पुराणम्

पुराकाले यत् अभवत् तन्नाम'पुराणम्' । पुरा भवम् पुराणम् अर्थात् 'प्राचीनार्थानां प्रतिपादिकं प्रमाणम्' । हिन्दुपरम्परायां पुराणानां महत्त्वम् अस्ति । वेदे यत् धर्मविषये वर्णितम् अस्ति तत् संक्षिप्ततया सरलतया बोधगम्यनार्थं पुराणे वर्णितमस्ति । पुराणे कथानां तथा च धर्मादिपालनविषये उल्लेखः वर्तते ।

पुराणस्य लक्षणम् उक्तम् –

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ।। इति।

सर्गः, सृष्टिः, प्रतिसर्गः, सृष्टिलयः पुनश्च सृष्टिः, वंशसृष्ट्यादौ वंशावलिः, के के मानवाः कदा कदा अजायन्त तथा वंशानुचरितम् इत्यादयः विषयः यत्र दृश्यते तन्नाम पुराणम् इत्यर्थः । पुराणानि अष्टादशः सन्ति ।

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अनापलिङ्गकूस्कानि पुराणानि प्रचक्षते ।। इति।।

- म द्वयम् – मत्स्यपुराणम्, मार्कण्डेयपुराणम् च ।
- भ द्वयम् - भविष्यपुराणम्, भागवतपुराणम् च ।
- ब्र त्रयम् - ब्रह्माण्डपुराणम्, ब्रह्मपुराणम्, ब्रह्मवैवर्तञ्च ।
- व चतुष्टयम्- वामन-वराह-विष्णु-वायुपुराणानि ।
- अ-अग्निपुराणम्, ना-नारदपुराणम्, प-पद्मपुराणम्, लि-लिङ्गपुराणम्, ग-गरूडपुराणम्, कू-कूर्मपुराणम्, स्क-स्कन्दपुराणम् ।

एषु पुराणेषु सर्वदीर्घं पुराणम् स्कन्दपुराणम् यत्र 81,000 श्लोकाः सन्ति । सर्वलघुपुराणं मार्कण्डेयपुराणम् यत्र 9000 श्लोकाः सन्ति इति मन्यन्ते ।

**आयुर्वेदः**

आयुर्वेदशब्दः आयुः वेदः पदद्वयं मिलित्वा भवति । यः आयुर्वेदः प्रचीनतमः चिकित्साप्रणाल्याः एका प्रणाली भवति । यः वेदः ऋग्वेदस्य उपवेदरूपेण परिचितः भवति । चरकसंहिता मध्ये वर्णितम् अस्ति-

हिताहितं सुखं दुःखमायुस्तस्य हिताहितम् ।
मानं च तच्च यत्रोक्तमायुर्वेदः स उच्यते ।। इति।

अर्थात् यत्र ग्रन्थे हितायुः, अहितायुः, स्वस्थजीवनविषये वर्णितम् अस्ति । सः आयुर्वेदरूपेण परिचितो भवति । यथा कथ्यते आयुर्वेदयति बोधयति इति आयुर्वेदः । अस्माकं देशे ऋग्वेदकाले चिकित्साविज्ञानं प्रादुरभूत् । अस्य शास्त्रस्य प्रथमोपदेष्टा ब्रह्मा, धन्वन्तरिः, इन्द्रः, भारद्वाजादि प्रभृतयः प्रवर्तकाः सन्ति । ऋग्वैदिककाले जलचिकित्सायाः एवं सूर्यरश्मिचिकित्सायाः उल्लेखः समुपलभ्यते । धर्मार्थकाममोक्षसिध्दयर्थं शल्य-शालाक्य-काम-भूतादि चिकित्साभिहिता वर्तते । सांख्ययोगादि प्रभृतिदर्शनम् अस्मिन् शास्त्रे बौद्धिकपक्षं प्रभावयति यथा हि- चरकसंहिता आर्युर्वेदशास्त्रस्य ग्रन्थोऽस्ति । ग्रन्थोऽयं चिकित्सापद्धतिं यावदेव नास्ति परिसीमितः । अपितु ग्रन्थेऽस्मिन् सांख्यादीनां दर्शनतत्त्वानामपि ज्ञानं वर्तते । अतः आयुर्वेदशास्त्रेऽपि दर्शनशास्त्रस्योपयोगः भवति ।

## धनुर्वेदशास्त्रम्

यजुर्वेदस्य उपवेदरूपेण धनुर्वेदः परिचितं भवति । अत्र धनुर्विद्यायाः सैन्यविज्ञानस्य च विषये वर्णितम् अस्ति । धनुर्विद्या सर्वपुरातनी प्राचीनविद्या भवति । अग्निपुराणे धनुर्विद्याविषये व्यासरूपेण उल्लेखो भवति । संस्कृतसाहित्ये विभिन्नानां शास्त्राणां यन्त्राणां च प्रयोगो समुपलभ्यते । अस्मिन् शास्त्रे युद्धविद्यायाः कौशलं वर्णितमस्ति । यज्ञोपद्रवकारिणां शमनाय अस्य वेदस्य उद्भवः जातः । एतस्मादेव शास्त्रात् विभिन्ना शस्त्रविद्या उत्पन्ना, धनुषः चालनाय अनेकाः प्रयोगाः अस्मिन् वेदे निगदिताः । यथा- आलीढम्, प्रभालीढम् इत्यादीनि । अस्मिन् शास्त्रे वेदान्तदर्शनस्याध्यात्मबलप्रभाविते सति दर्शनशास्त्रस्योपयोगो भवति ।

## गान्धर्ववेदः

सामवेदस्य उपवेदरूपेण सुप्रसिद्धोऽयं गान्धर्ववेदः । अस्य कल्पना गायनतत्त्वानाम् आधारीकृत्यैव भवति । भारतीयशास्त्रीयसंगीतस्योत्पत्तिः सामवेदेनैव । सामवेदे संगीतस्य विषये अत्यधिकगहनचर्चा विचाराः प्रतिपादिताः । विद्वांसः भारतीयशास्त्रीयसंगीतमाध्यात्मिकरूपेण अत्यधिकं मन्यन्ते । अतएव अस्य लक्ष्यं भवति मोक्षः ।

हिन्दुपरम्परायां ब्रह्मणः सकाशात् नारदमुनिः संगीतवादनं संगीतवररूपेण प्राप्तः । सामवेदमन्त्राणां उच्चारणं वा सामगानं सप्तस्वराणामनुसारेण भवति । ते सप्त स्वराः यथा –षडजः(सा) , ऋषभः (रे) , गान्धारः ( ग) , मध्यमः (म) , पञ्चमः (प) , धैवतः (ध) , निषादः (नि) । अस्मिन् प्रसंगे सुप्रसिद्धाः प्राचीननारदीयग्रन्थाः सर्वप्राचीना भवन्ति । तद् भिन्नं शार्ङ्गदेवस्य "संगीतरत्नाकरः" सोमनाथस्य " रागविबोध'' च गन्धर्वविद्यायाः प्रधानग्रन्थद्वयं वर्तते । प्राचीनग्रन्थेषु चतस्रः गानविद्याः प्रतिपादिताः यथा – 1.ईश्वरी 2.भारती 3.पावनी (हनुमान) 4. कल्लनाथीया च ।

गान्धर्ववेदस्य प्रचारः न केवलं भारतदेशे अपि तु विदेशेष्वपि अत्यधिकं सञ्जातः । सामगानमन्त्राणां श्रवणेन मनसि आनन्दः सञ्जायते । शरीरस्य विविधग्रन्थिनां रोगाणाम् अनायासेन, विना औषधेन च निवारणं भवति । संगीतं कस्य न हृदयं स्पृशति ? के तन्मादकतयाऽऽनन्दतुन्दिलाः न भवन्ति ? को वा तस्य ध्वनिबाणेन प्रेममूर्छितो न भवति ? सर्वेषामेतदुपास्यं सर्वैरेतद् ग्राह्यञ्च भवति । अतः गान्धर्वविद्यायाः अधुनाऽपि प्रासाङ्गिकता समाजेऽस्माकं वर्तते एव । प्राचीनगान्धर्वविद्यासम्बन्धितानां शास्त्राणां पुनरुद्धारोऽस्माकं सर्वेषां काम्यः ।

## अर्थशास्त्रम्

अथर्ववेदस्य उपवेदः अस्ति अर्थशास्त्रम् । मुख्यतः चत्वारः वेदाः सन्ति । चतुर्णां वेदानां चत्वारः उपवेदाः सन्ति । यथा – आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थवेदः इति । अर्थवेदस्य अन्य नाम अर्थशास्त्रम्

अस्ति। अर्थशास्त्रस्य प्रणेता कौटिल्यम् इति कथ्यते। अर्थशास्त्रं बहुप्राचीनशास्त्रं वर्तते । अष्टादशशास्त्रेषु अस्य शास्त्रस्य गणना भवति। अर्थशास्त्रस्य सर्वप्रथमम् आचार्यः महर्षिः बृहस्पतिः वर्तते। बृहस्पतेः ग्रन्थः सूत्ररूपेण प्राप्यते। अत्र अर्थशास्त्रसम्बन्धिः सर्वा वार्ता आगच्छति। अर्थस्य राजधर्मस्य च विशिष्टज्ञानम् अर्थविज्ञानम् । कौटिल्यस्य अर्थशास्त्रं राजनीतेः प्रमुखग्रन्थः वर्तते । अर्थशास्त्रं 50 अधिकरणेषु 50 अध्यायेषु 180 प्रकरणेषु च विभक्तम् अस्ति। अस्मिन् ग्रन्थे राजराष्ट्रानां च अर्थयुक्तः विधातुं प्रेरणा प्रदत्ता। एतस्य ग्रन्थस्यारम्भे उक्तं यत् –

पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः ।
प्रस्तावितानि प्रशस्तानि तत् संहत्यैक्यमिदमर्थशास्त्रं कृतम् ।। इति।

**सन्दर्भग्रन्थसूची -**


1. *https://en.wikipedia.org/wiki/Puranas*
2. *https://en.wikipedia.org/wiki/Vedas*
3. *https://en.wikipedia.org/wiki/Vedic_and_Sanskrit_literature*
4. *http://www.newworldencyclopedia.org/entry/Sanskrit_literature*
5. *https://www.britannica.com/topic-browse/Literature/South-Asian-Literature/Sanskrit-Literature*

# व्यक्तित्वस्य सिद्धान्ताः

परियोजनाकार्यस्य मार्गदर्शकः

**डॉ. देवदत्त सरोदे**

परियोजनाकार्यस्य सदस्याः
पाणिनिवर्गः

1. प्रियदर्शिनी राउत 2. प्रियरञ्जन आचार्य
3. नमिता राज 4. मिथाली मुधुस्मित मिश्रा
5. मोनालिसा दास 6. रूपलिता बारिक
7. प्रियांका बेहरा 8. प्रतिभा प्रियदर्शिनी होता

शिक्षया बालकस्य सर्वाङ्गीण विकास: भवति। अयं विकास: व्यक्तित्वेन अभिव्यज्यते । यदि बालकस्य व्यक्तित्वं सम्यक् भवति तर्हि बालकस्य विकास: जात इति मन्तव्यम् । व्यक्तित्वे शारीरिक:, मानसिक:, सामाजिक:, सांवेगिक: चारित्रिकादय: गुणा: अन्तर्भवन्ति । तदेतत् व्यक्तित्वं मनुजस्य शरीराकारेण इङ्गीतेन, चेष्टया भाषणेन व्यवहारेण नेत्रमुखादिभावैः परिलक्ष्यते । तद्यथा संसारे वयं ब्रूम:। प्रियभाषी, वाक्पटुः, स्पष्टवक्ता इत्यादिभि: पदै: वाच: स्वरूपं वाक्व्यक्तित्वं प्रकटीभवति। संस्कृतभाषायां व्यक्तित्वम् इतिपदं "वि" उपसर्गात् अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु इत्यस्मात् धातो: क्तिन् प्रत्यये कृते सति व्यक्ति तत: भावे "त्व" प्रत्यये कृते सति व्यक्तित्वम् इति पदं निष्पद्यते , अयं परोपकारी अयं सज्जन: अयं धर्मात्मा तथैव शूर: भीरु: दुर्जन: लोभी इत्यादिपदैः मनुष्यस्य अन्तर्निहितस्वरूपं मानसव्यक्तित्वं व्यवहारेण प्रकटीभवति। अयं मनस्वी अयं बुद्धिमान् अयं मूर्ख अज्ञानी इत्यादि पदै: बौद्धिकस्वरूपं बौद्धिकव्यक्तित्वं व्यज्यते।

यस्य कस्यापि मनुजस्य यत् किंचित् मनोवाक्कायैः स्फुटं वा अस्फुटं वा प्रत्यक्षं वा परोक्षं प्रकटी भवति , व्यज्यते, दृश्यते तद् व्यक्तित्वम् इत्युच्यते। व्यक्तित्वम् इति आङ्ग्लभाषायां Personality इति पदेन अभिधीयते। इदं पदं लैटिनभाषायां Persona इत्यस्माद् पदात् निष्पन्नम् अस्यार्थः नाटकेषु नटानां भिन्नमुखाकृतिसूचकं (Mask) विद्यते । Personality is defined as the set of habitual behaviors, cognitions and emotional patterns that evolve from biological and environmental factors.

साम्प्रतं व्यक्तिनिष्ठानां सामान्यविशेषगुणानां समष्टिरूपं व्यक्तित्वपदेनाभिधीयते । जगति प्रतिव्यक्ति स्व स्वविलक्षणगुणैः पृथक्त्वेन विलोक्यते । मनुजे केचन साधारणगुणाः भवन्ति केचन विशिष्टाः, एते विशिष्टाः अन्येभ्यः पुरुषेभ्यः इमं मनुजं विशिनष्टि अतः अयं जनः येन कारणेन येन हेतुना प्रत्यभिज्ञायते परिगृह्यते वा तदस्य विशिष्टं व्यक्तित्वम् । रङ्गमञ्चे विविधा: नटा: आत्मन: स्वभावं गोपयित्वा अन्यव्यक्तीनाम् अभिनयं कुर्वन्ति। तथैव नित्यजीवने जना: वास्तविकव्यवहारं गोपयित्वा भिन्नव्यवहारं प्रदर्शयन्ति। अत: विविधाभि: प्रक्षेपकाप्रक्षेपकपरीक्षाभि: व्यक्ते: गुढव्यवहारं ज्ञातुं प्रयत्न: क्रियते।

**व्यक्तित्वस्य परिभाषाः —**

1. गिल्फ़ोर्ड् महोदयः- व्यक्तित्वं गुणानां समष्टिस्वरूपं वर्तते।
2. वुड्वर्तमहोदयः - सामाजिकसमायोजनेन प्राप्तव्यवहारविशेषताः एव व्यक्तित्वम् इति कथ्यते।
3. अल्पोर्ट्महोदयः - व्यक्तित्वं कस्यचित् मनुष्यस्य मनोशारीरिकव्यवस्थानां गत्यात्मकसंघटनं वर्तते यत् परिवेषेण सह तस्य अपूर्वसमायोजनं निर्धारयति।

मनोविज्ञाने व्यक्तित्वस्य बहवः परिभाषा उपलभ्यन्ते । एताः परिभाषाः कस्यश्चित् व्यक्तिविशेषस्य शारीरिक– मानसिक –सांवेगिक –सामाजिक –आध्यात्मिकादि गुणान् द्योतयन्ति।

**व्यक्तित्वस्य सिद्धान्ताः**

व्यक्तित्वमेकः संकीर्णविषयः वर्तते । व्यक्तित्वस्य स्वरूपविषये मापने च बहवः मनोवैज्ञनिकाः प्रयत्नशीला आसन् । विशिष्य शिक्षामनोविज्ञाने व्यक्तित्वमापनं प्रधानांशः वर्तते । मापनात् पूर्वमेव व्यक्तित्वसिद्धान्तानां विषये ज्ञातव्यम् । सिद्धान्तानां बाहुल्यम् तेषां वर्गीकरणमनिवार्यं भवति ।

व्यक्तित्वस्य सिद्धान्ताः

- शरीराकृतिसिद्धान्ताः (Type theories)
  - हिप्पोक्रेट्स सिद्धान्तः
  - क्रेश्मर सिद्धान्तः
  - शेल्डन सिद्धान्तः
- लक्षणसिद्धान्ताः (Trait theories)
  - अल्पोर्टसिद्धान्तः
  - केटिलसिद्धान्तः
- मनोविश्लेषणसिद्धान्ताः (Structural theories)

**शरीराकृतिसिद्धान्ताः**

व्यक्तेः शरीराकृतिम् आश्रित्य व्यक्तित्वस्य व्याख्यानं कर्तुं बहवः प्रयत्नमकुर्वन् । अत्र व्यक्तित्वे जैविककारकाणां प्रभावः परिशील्यते। तत्रैते सिद्धान्ताः प्रमुखाःवर्तन्ते।

**(क) हिप्पोक्रेट्स महोदयस्य सिद्धान्तः -**

ग्रीसदेशीयः हिप्पोक्रेट्स नामकः वैद्यः शरीराकृतिम् आश्रित्य मनुष्याणां व्यक्तित्वस्य व्याख्यनमकोरत्। आकृतिसिद्धान्तप्रवर्तकेषु अयमाद्यः वर्तते।

1. पैत्तिकः(choleric) - अयं शरीराकृत्या दृढः, सांवेगिकरीत्या च दुर्बलः भवति।
   फलतः अयम् उत्साही, शीघ्रगामी कर्मठः, असहिष्णुः, क्रोधशीलश्च भवति।

2. श्यामपित्तीयः(Meloncholic) - अयं शरीराकृत्या सांवेगिकरीत्या च दुर्बलः भवति। अतः शक्तिहीनः, निराशावादी, दुःखी, विषादशीलश्च भवति।

3. पीतपित्तीयः (phlegmatic) - अयं शरीराकृत्या दुर्बलः सांवेगिकदृष्ट्या सशक्तः च भवति। अतः अयं अलसः, निद्रालुश्च भवति।

4. सुप्रत्याशी (Sanguine) - अयं शरीरकृत्या दृढः, संवेगात्मकदृष्ट्या स्थिरः च भवति। अतः अयं उत्साही ,आशावादी ,आत्मविश्वासी भवति।

**( ख) क्रेश्मर महोदयस्य सिद्धान्तः -**

क्रेश्मर महोदयः मानवानां शारीरिकसंरचनाम् ( Physiological structure ) आश्रित्य त्रिधा विभागमकोरत्। यथा –

1. तुन्दिलः - एते स्थूलाः, वामनाः, कुम्भोदराः, सामाजिकाः, विनोदप्रियाः लोकप्रियाश्च भवन्ति।
2. कृशकायाः - इमे उन्नताः, कृशकायाः, कृशोदराः, लज्जावन्तः, निराशावादिनः, एकान्तप्रियाः।
3. दृढकायाः - इमे सशक्ताः, स्वस्थशरीराः, सामाजिकाः, आशावादिनः, सुसमायोजिताश्च भवन्ति।

**(ग) शेल्डन (Sheldon) महोदयस्य वर्गीकरणम्।**

शेल्डन महोदयः शरीरसंरचनाव्यक्तित्वयोः सम्बन्धस्य विस्तृताध्ययनम् अकोरत्। सः शरीराकृतिम् आश्रित्य मनुष्याणां त्रिधा विभागमकोरत्। यथा –

1. स्थूलाकृतिः - एते स्थूलाः, कोमलशरीराः,शक्तिहीनाश्च भवन्ति। स्वभावतया भोजनप्रियाः, विश्रान्तिप्रियाः ,परंपरावादिनः, स्नेहशीलाः, सामाजिकाश्च भवन्ति।
2. मध्याकृतिः - शारीरिकदृष्ट्या एते दृढाः स्वस्थाश्च भवन्ति। स्वभावेन एते भयरहिताः साहसिकाः आशावादिनः , प्रभुत्ववादिनः ,उत्साहिनश्च भवन्ति।
3. लम्बाकृतिः - शारीरिकदृष्ट्या इमे कृशकायाः , दीर्घाश्च भवन्ति। एतेषां हस्तपादौ दीर्घौ भवतः, तथा कृशाः भवन्ति । स्वभावेनैते निराशवादिनः, एकान्तप्रियाः, अल्पनिद्रालवः, एकाकिनः, असामाजिकाः अल्पकाले श्रान्ताश्च भवन्ति। इत्थं शरीराकृतिम् आश्रित्य हिप्पोक्रेट्स, क्रेश्मर,शेल्डन् इत्यादयःमनोवैज्ञानिकाः व्यक्तित्वस्य वर्णनाय प्रयत्नमकुर्वन्।

**(घ). युंगमहोदयस्य वर्गीकरणम्**

युंगमहोदयःमनुष्यस्य सामाजिकगुणानामाधारेण अन्तर्मुखः, बहिर्मुखः इति द्विधा विभागमकोरत्।

1. अन्तर्मुखः – एते आत्मकेन्द्रिताः भवन्ति। सामाजिककार्यक्रमेषु भागं न गृह्णन्ति। एते एकान्तम् इच्छन्ति , इमे मितभाषिणः , चिन्तनशिलाः भवन्ति। सर्वदा पुस्तकपठने व्यस्ताः भवन्ति। यथा – कवयः, लेखकाः , दार्शनिकाः, सन्यासिनः योगिनः, मेधाविनश्च भवन्ति।

2. बहिर्मुखः - एते सामाजिकाः स्नेहशीलाश्चभवन्ति । सर्वदा परेषां साहाय्यमाचरन्ति । पुनश्चैते सरलस्वभाविनः, धैर्यशालिनः , उत्साहिनः, वाग्मिनश्च भवन्ति । प्रायः एतादृशाः नेतारः भवितुं योग्याः भवन्ति । यथा – समाजसेवकाः, नटाः , राजनीतिनेतारः, धर्मगुरवः इत्यादयः ।

परन्तु व्यक्तयः पूर्णतःअन्तर्मुखाः अथवा बर्हिर्मुखाश्च न भवन्ति। सामान्यतः अधिकांशव्यक्तिषु एतल्लक्षणद्वयमपि संगच्छते । केषुचित् सन्दर्भेषु अन्तर्मुख इव व्यवहरन्ति । केषुचित् बहिर्मुख इव व्यवहरन्ति ।

**लक्षणसिद्धान्ताः**

व्यक्तेः विविधलक्षणान्याश्रित्य व्यक्तित्वविषये व्याख्यानमत्र क्रियते । सामान्यजीवने अस्मन्मित्रेभ्यः कानिचन विशेषणानि योजयामः । यथा –अयम् अलसः, उत्साही, निष्कपटः, लज्जावान्, क्रोधस्वभावी, पराश्रितः इत्यादयः । विविधसन्दर्भेषु व्यक्तेः व्यवहारस्य निरीक्षणं कृत्वा सामान्यीकरणं कुर्मः । सामान्यीकृतलक्षणमेतत् तां व्यक्तिम् अन्येभ्यः पृथक्करोति । इत्थं लक्षणसिद्धान्ते व्यक्तेः लक्षणान्याश्रित्य तासां विभागः अथवा व्यवहारवर्णनं क्रियते । लक्षणसिद्धान्तेषु अल्पोर्ट- केटिलमहोदययोः सिद्धान्तौ प्रसिद्धौ स्तः ।

**अल्पोर्ट महोदयस्य व्यक्तित्वसिद्धान्तः**

गोर्डान् अल्पोर्ट (Gordon W.Allport) महोदयः लक्षणसिद्धान्तप्रवर्तकेषु प्रथमः वर्तते। सः मनुष्यस्य विभिन्नगुणानां लक्षणानाम् आधारेण व्यक्तित्वस्य व्याख्यानमकरोत् । तस्य मते व्यक्तित्वलक्षणं व्यक्तित्वसंरचनायाः मौलिकांशाः वर्तन्ते । अल्पोर्टमहोदयः मानवव्यक्तित्वस्य मौलिकांशानाम् अन्वेषणम् अकोरत् । सः स्वानुचराणां साहायेन विविधपदकोशेषु मानवव्यक्तित्वद्योतकानि 17,953 पदानि अभिज्ञातवान् । एतेषां पदानां विश्लेषणम् कृत्वा समानार्थकपदानि अनुचितपदानि च तिरस्कृत्य अन्ततः 4,541 पदानि अंगीचकार । एतेषां पदानां त्रिधा वर्गीकरणमकरोत् । यथा –

- **मुख्यलक्षणानि**— एतानि व्यक्तित्वस्य प्रबललक्षणानि भवन्ति । प्रत्येकं व्यक्तौ एतानि एकम् अथवा द्वे भवतः,परन्त्वेते संपूर्णव्यक्तित्वं प्रभावयन्ति । यथा- हास्यप्रियता,क्रोधता इत्यादयः। सर्वव्यक्तिषु मुख्यलक्षणानाम् उपस्थितिः अनिवार्या नास्ति। यस्य व्यक्तित्वे मुख्यलक्षणान्येतानि भवन्ति, सः एतैरेव लक्षणैः लोके बहुचर्चितः भवति। सर्वासु परिस्थितिषु मुख्यलक्षणानि अन्यान्यतिशाय्य प्रकटितानि भवन्ति।
- **केन्द्रीयलक्षणानि**— एते मनुष्यस्य तादृशगुणाः सन्ति ये तत्तन्मनुष्यस्य व्यक्तित्ववर्णने, अभिज्ञाने च अत्यन्तमुपकुर्वन्ति। यथा - निष्कापट्यम्, दयालुता, भीरूता, लज्जा, कठोरता, क्रूरत्वम्,परोपकारः,कामुकता,चाटुकारिता इत्यादयः। प्रायः प्रत्येकं मनुष्यस्य व्यक्तित्वे एतादृशाः 8 तः 10 गुणाः भवन्ति । अतः मनुष्याणाम् अभिज्ञानम् एतैरेव पदैः जनाः कुर्वन्ति ।

- **गौणलक्षणानि (Secondary traits)** - एतानि लक्षणानि प्रत्येकं मनुष्ये गौणरूपेण तिष्ठन्ति। एतानि कस्यचित् व्यक्तित्वस्य निर्णये अभिज्ञाने च प्रधानानि न भवन्ति। व्यक्तित्ववर्णनदृष्ट्या एतानि गौणानि भवन्ति। केषुचित् सन्दर्भेषु एतानि लक्षणानि प्रकटीभवन्ति। यथा- स्वार्थः लोभः कृपणता इत्यादीनि लक्षणानि परोपकारसमये अथवा दानादिकार्येषु प्रस्फुटानि भवन्ति।

अल्पोर्टमहोदयस्य मते कस्यचिन्मुष्यस्य व्यक्तित्वावबोधने, व्याख्याने अभिज्ञाने च मुख्यलक्षणानि, केन्द्रीयलक्षणानि च प्रधानभूमिकां वहन्ति। अतः मुख्यलक्षणानि व्यक्तित्वस्य निर्णायकाः इत्युच्यन्ते। शेषकेन्द्रीयलक्षणानि गौणलक्षणैः सह संयुज्य केषाञ्चन सामान्यव्यक्तित्वगुणानां निर्माणं भवति ये गुणाः जनेषु सामान्यतःभवन्ति। तादृशलक्षणानां सः सामान्यलक्षणानि इति नामकरणम् अकरोत्। अतः कस्यचिन्मनुष्यस्य व्यक्तित्वावबोधनाय व्याख्यानाय च मुख्य-केन्द्रीयलक्षणेषु अवधानं दातव्यम्। एतैरेव व्यक्तित्वस्य अभिज्ञानं संभवति। लक्षणान्येतानि व्यक्तेः व्यवहारे स्थिरत्वमानयन्ति। परन्तु सर्वासु परिस्थितिषु व्यक्तित्वलक्षणानि निश्चितानि, स्थिराणि न भवन्ति। सन्दर्भमाश्रित्य लक्षणान्येतानि व्यक्तिं प्रवर्तयन्ति। अर्थात् कदाचित् परिवेषः मनुष्यस्य व्यवहारं प्रबलतया प्रभावयति।

कार्यात्मकस्वातन्त्र्यम् (functional autonomy) व्यक्तित्वविकासे कार्यात्मकस्वातन्त्र्यम् इति नूतनभावनां प्रत्यपादयत्। अर्थात् परिपक्ववयस्काः (matured adults) पूर्वानुभवैः अप्रभाविताः सन्तः स्वतन्त्रतया कार्यं कुर्वन्ति। यद्यपि मानवः लक्ष्यप्राप्तये कार्यं करोति , लक्ष्यप्राप्तेः अनन्तरं स्वतन्त्रतां प्राप्नोति। येन व्यवहारेण विशिष्टावश्यकतायाः पूर्तिः जायते। कालान्तरेव्यवहारः आत्मनं तोषयति। यथा – कश्चन मनुष्यः बुभुक्षां निवारयितुं किञ्चित् कार्यं करोति , ततःपरं आत्मसंतृप्तये कार्यरतः भवति। व्याकुलता – तन्यतादिभिः विमुक्तये आरब्धं मद्यपानं ततः परमपि अनुवर्तते।

**वैय्यक्तिकोपागमः -**

मनुष्याणां व्यक्तित्वस्य अध्ययनाय सः वैयक्तिकोपागमम् आश्रयत्। बृहत्समूहानां निरीक्षणं कृत्वा व्यवहारस्य सामान्यसिद्धान्तानाम् अभिज्ञाने तस्य रुचिर्नास्ति। व्यक्तित्वस्याध्ययने सः सर्वेक्षणपद्धतिः परिणामविधिः इत्यादिसामूहिकोपायान् तिरस्करोति। परन्तु भावचित्रोपागमेन प्रत्येकं व्यक्तेःव्यवहारस्य अध्ययनं कर्तव्यम्। प्रत्येकं मनुष्यस्य व्यक्तित्वलक्षणानि , व्यक्तित्वव्यापाराश्च भिन्नाः भवन्ति।

**व्यक्तित्वविकासस्य अवस्थाः -**

अल्पोर्टमहोदयः व्यक्तित्वविकासस्य तिस्रः अवस्थाःप्रत्यपादयत्। ताः बाल्यावस्था, कौमारावस्था, प्रौढावस्था च बाल्यावस्थातः प्रौढावस्थापर्यन्तं व्यक्तित्वविकासः निरन्तरं समानतया न भवति। बाल्य-कौमार-प्रौढावस्थासु व्यक्तेः मूल्यानि ,आवश्यकताः अभिरूचयः इत्यादयः समानाः न सन्ति। परन्तु वर्तमाने जीवने व्यक्तेः पुनःस्मरणं विधाय व्यवहारपरिवर्तने गतानुभवान् प्रकटयन्ति। इत्थम् अल्पोर्टमहोदयः व्यक्तित्वस्य व्याख्यानं अकोरत्।

**केटिलमहोदयस्य लक्षणोपागमः -**

आर् .वि. केटिलमहोदयः अल्पोर्टमहोदयस्य सिद्धान्तमवलम्ब्य पुनः अनुसन्धानं कृत्वा स्वकीयमतं प्रत्यपादयत्। केटिलमहोदयः पूर्वोक्तलक्षणानां चर्तुर्षु विभागमकोरत्। ते यथा -

1. सामान्यलक्षणानि – वस्तुतः सामान्यतया एतानि लक्षणानि सर्वेभ्यः भवन्ति। अस्मिन् लक्षणे जनानां बुद्धिशक्तिः भिन्ना भवति। परन्तु एतानि लक्षणानि सर्वेषु मनुष्येषु भवन्ति। यथा – सहयोग , आक्रमकता , निष्कापट्यम् इति सामान्य लक्षणानि भवन्ति।
2. अद्वितीयलक्षणानि - प्रत्येकं मनुष्ये विद्यमानानि विशिष्टलक्षणानि अद्वितीयलक्षणानि इति कथ्यन्ते । एतानि प्रत्येकं मनुष्ये भिन्नानि भवन्ति । यथा – रूचिः ,अभिवृतिः स्वभाविकलक्षणानि , शक्तिः भिन्नाः भवन्ति।
3. बाह्यलक्षणानि - मनुष्यस्य व्यवहारस्यानुकूललक्षणानि सरलतया अभिज्ञातुं शक्यन्ते । सत्यनिष्ठता, उत्साह , निर्भयत्वम् इत्यादि।
4. मूललक्षणानि - एतानि विभिन्नानि भवन्ति। एतानि व्यक्तित्वस्य आधारभूतसंरचनाः भवन्ति। एतानि व्यक्तित्वस्य निर्धारकाणि भवन्ति। केटिलमहोदयः कारकविश्लेषणेन मूललक्षणानां 16 आधारभूतकारकाणि अभिज्ञातवान्।

**सिग्मण्ड फ्रायडमहोदयस्य मनोविश्लेषणसिद्धान्तः**

वियन्नादेशीयः सिग्मन् फ्रायड महोदयः वृत्तिरित्या वैद्य आसीत्। सः मानसिकरोगाणां चिकित्सां कुर्वन् रोगाणां कारणान्यन्विष्टवान् । सः मानसिकरूग्णानां विषये अनुसन्धानं कुर्वन् मनोविश्लेषणसिद्धान्तं प्रत्यपादयत् । सिद्धान्ते अस्मिन् मनसः अचैतन्यावस्थायां विद्यमानभावाः,अभिरूचयश्च व्यक्तित्वं प्रभावयन्तीति न्यरूपयत् । तस्य सिद्धान्तः विश्वप्रसिद्धिमाप्नोत् । तस्य शिष्याः,प्रशिष्याश्च अस्यां दिशि अनुसन्धानान्यकुर्वन्। फलतः मनोविज्ञाने मनोविश्लेषणम् इति नूतनसंप्रदायः बभूव।

**व्यक्तित्वसंरचना** – मानवमनसः संरचनां स्पष्टीकर्तुं एवं कार्यप्रणालीञ्च वर्णयितुं मनोविश्लेषणसिद्धान्तस्य जनक प्रसिद्धःमनोवैज्ञानिकः सिग्मन्ड फ्रायड् महोदयः मनुष्ये विद्यमानानां भावानां त्रिधा मतित्वेन विभागमकार्षीत् ताश्च इद् मतिः, अहंमतिः, परम् अहंमतिः इति ।

- **इद् मतिः Id** – इयं मानवः व्यक्तित्वव्यवहारस्य पाशविकप्रवृत्तीनाम् भवति । विशेषतः जन्तुवाञ्छानां निलयः भवति। मनुष्यः इन्द्रियसुखानि प्राप्तुं निरन्तरं चेष्टते। तदर्थं सः सामाजिक-सांस्कृतिक नियमान् नैतिकमूल्यानि च अविगणय्य प्रयत्नरतः भवति । अत्र लौकिकसामाजिक-नियमानां नैतिकतायाः अभावो भवति । हिंसा, कामेच्छा , पाशविकप्रवृत्तीनां उद्रेको विद्यते, विषयवासनापूर्त्यर्थम्, ऐन्द्रिकसुखेच्छया जनः लौकिकनैतिकनियमान् उज्झित्वा कामकारतः प्रवर्तते। अत्रत्या मतिः सुखसिद्धान्तमाश्रित्य कार्यं करोति। मतिरेषा सदसद्विवेकहीना पाशविकी भवति।

- **अहंमति: Ego** – इद् मतौ जायमानानाम् असामाजिक – अनैतिक इच्छानां नियन्त्रणं अहंमति करोति । एतद् यथार्थ सिद्धान्तम् अवलम्ब्य कार्यं करोति । मनुष्यः विविध परिवेशेषु किं कुर्यात् ? किं न कुर्यात् इत्यनेन निर्धारयते । एषा मति: यथार्थपरिस्थितिं परिगणय्य कार्यं करोति, इद् मतौ उत्पद्यमानानां भावानाम् अनैतिकेच्छानाम् असामाजिकभावानां संयमनमत्र विधीयते । सामाजिकनैतिकनियमान् परिपालयन् कामेच्छानां पूर्त्यर्थं चेष्टते जन: । सदसद्विवेकपुरस्सरम् अवसरं विचिन्त्य कामेच्छानां पूर्तिं करोति । एषा मति: यथार्थसामाजिकव्यक्तित्वं विकासयति ।
- **परम् अहंमति: Super Ego** – मतिरेषा अत्यन्तम् आदर्शे विश्वसिति, आदर्शसिद्धान्तमाश्रित्य (Ideal Principle) प्रवर्तते | कामेच्छानां दमनं विधाय वासनासुखापेक्षया नैतिकनियमानामनुपालनं श्रेय: मनुते । इयं व्यक्तित्वाय नैतिकस्वरूपं प्रयच्छति, आदर्शसिद्धान्तमाश्रित्य प्रवर्तते । सुखप्राप्तेः आनन्दप्राप्ते अपेक्षया नैतिकमूल्यानाम् आदर्शानाञ्च प्राप्तिः अस्याः मुख्योद्देश्यं भवति । धर्माधर्मयोः पापपुण्ययोः निश्चयः अनयैव क्रियते, सदसद्विवेक:, नैतिकनियम-आदर्श-सदाचारादय अस्या: प्रमुखलक्ष्यं भवति । एता: इतरेतरसहायेन समन्वयेन व्यक्तित्वस्य संघटनं, विकासञ्च सम्पादयन्ति इति

**2. मूर्तिमत्वगतिशीलता** — मानवव्यवहारे मनस: प्रधानभूमिका वर्तते । फ्राएड्महोदयस्य मते मनस: तिस्र: अवस्था: सन्ति । ता: यथा - चेतनमन:, अवचेतनमन:, अचेतनमन इति ।

- **चेतनमन:** - दैनन्दिनजीवने प्राप्ता: अनुभावा:, भावा:, विचारा:, ज्ञानञ्च चेतनमनसि तिष्ठन्ति यान् मनुष्यः झटिति स्मर्तुं शक्नोति। स्मृतौ विद्यमाना: अनुभावा: भावा: पूर्वज्ञानञ्च मनुष्यस्य व्यवहारं प्रभावयन्ति।
- **उपचेतनमन**: - एतत् किञ्चित् गम्भीरं वर्तते,मनुष्यस्य-विस्मृता: भावा:, अनुभावा:, विचाराश्च उपचेतनमनसि भवन्ति। परन्तु मनुष्य: स्वप्रयत्नेन चेतनावस्थायां आनेतुं शक्नोति। अत: एतेऽपि मनुष्यस्य व्यवहारं प्रभावयन्ति ।
- **अचेतनमन**:- बालस्य कटूवनुभवा: ,इच्छा:,अभिरुच्यादय: इत्यादय: अचेतनमनसि तिष्ठन्ति। वस्तुत: अचेतनमस: प्रभाव: व्यक्तित्वे अत्यधिकं भवतीति फ्राएड्महोदय: न्यरूपयत्।

अन्तन्त: मानवस्य संपूर्णव्यवहारे चेतनमन: केवलम् १०% व्यवहारं प्रभावयन्ति। मानवस्य ९०% व्यवहारा: उपचेतन-अचेतनमनोभि: प्रभाविता: भवन्ति। तत्रापि उपचेतनमनस: अपेक्षया अचेतनमनस: प्रभाव: अत्यधिक इति फ्राएड्वर्य: अभिप्रैति: ।

**मनोलैङ्गिकविकासः** –

मनुष्यस्य लैङ्गिकेच्छानां महत्वपूर्णभूमिका वर्तते । बालस्य जन्मतः कौमारावस्थापर्यन्तं कामेच्छानां पूर्त्या व्यक्तित्वविकासं वर्णयति ।

**पूर्वजननाङ्गावस्था -** जन्मतः पञ्च अथवा षड् वर्षाणि यावत् इयमवस्था भवति । जननाङ्गानां विकासात्पूर्वं मनुष्यस्य कामेच्छा शरीरस्य विविधाङ्गेषु भवति । इयमवस्था पुनस्त्रिधा विभज्यते ।

**क. मौखिकावस्था** – जन्मतः वर्षद्वयं यावत् इयमवस्था भवति । अस्मिन् वयसि शिशूनाम् इद् मतेः विकासः भवति । शिशुः मातु स्तन्यपानेन आनन्दमनुभवति , अस्यामवस्थायां शिशो: कामेच्छायाः पूर्तिः भवतीति फ्रायडमहोदयस्याभिप्रायः । अतः बालाः सर्वाणि वस्तुनि मुखे संस्थाप्य आनन्दमनुभवति ।

**ख. आसनावस्था** – द्वितीयवर्षादारभ्य चतुर्थवर्षपर्यन्तम् इयम्वस्था भवति । वयस्यस्मिन् कामेच्छायाः केन्द्राणि मलमूत्रविसर्जन स्थानानि भवन्ति । अतः शिशुः मलमूत्रविर्सजनेन आनन्दमनुभवति ।

**ग. लिंगवस्था** – चतुर्थवर्षात् षड्वर्षाणि यावत् बालानां जननेन्द्रियेषु आसक्तिः भवति । बालकः स्वयं कामेच्छाआत्मकेन्द्रितः भवतिः ततः परम् अन्येषु प्रसरति । सामान्यतः बालकाः मातुः सान्निध्यम् इच्छन्ति । अस्मिन् वयसि तेषाम् अध्यहंमतेः विकासः भवति ।

**घ. गुप्तावस्था** – इयमवस्था पञ्चवर्षेभ्यः किशोरावस्थापर्यन्तं भवति । अयं कामेच्छानां सुप्तकालःभवति । प्रायः अस्मिन् वयसि बालकाः बालकैःसह ,बालिकाः बालिकाभिः सह क्रीडादिषु भागं गृह्णन्ति । ते सामाजिकाचारान्, संप्रदायान् नीतिनियमान् जानन्ति । अतः बालकेषु सामाजिकविकासः जायते ।

**ङ. जननाङ्गावस्था** – कौमारावस्थायाम् अस्याः आरम्भः भवति । अत्र बाल-बालिकयोः जननेन्द्रियाणां विकासः भवति । गौणलैङ्गिकलक्षणानां विकासेन शरीराकृतिः सुन्दरी भवति । अतः बालक-बालिकाः स्वजननाङ्गेषु विचित्रानुभुतिं प्राप्नुवन्ति । एते भिन्नलिङ्गेषु आसक्तिं प्रदर्शयन्ति । अर्थात् युवकाः युवतिभिः सह ,युवत्यः युवकैः सह समयं यापयन्ति । इत्थं परस्परं आकृष्टाः सन्तः सृष्टि कार्येष्वासक्ताः भवन्ति । अस्यामवस्थायां युवतीयुवकाः परस्परं समयोजनं प्राप्य भाविजीवनाय संसिद्धाः भवन्ति ।।

**सन्दर्भग्रन्थाः -**


1. *उच्चतर शिक्षा मनोविज्ञान, एस-पी- गुप्ता, शारदापुस्तकभवनम्, इलाहाबाद-2004 ।*
2. *शिक्षायाः मनोवैज्ञानिकाधाराः, डा- बी- पद्ममित्रश्रीनिवासः, जगदीशसंस्कृतपुस्तकालय, जयपुर - 2012 ।*
3. *अर्वाचीनं मनोविज्ञानम्, ले मामराजदत्तकपिला, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी - 2002 ।*
4. *शिक्षामनोविज्ञानम्, पि- नागमुनिरेड्डी, राष्ट्रियसंस्कृतविद्यापीठ, तिरुपति - 2008 ।*
5. *मनोविज्ञानमीमांसा, आचार्य विश्वेश्वर, आत्माराम अण्ड सन्स, दिल्ली - 1959 ।*
6. *प्राचीनभारतीयमनोविज्ञानम्, दिनेशचन्द्र भट्टाचार्यः, कलकत्ता, 1972 ।*

# पर्यावरणपरिरक्षणे विविधाऽभिकरणानां भूमिका

**परियोजनाकार्यस्य मार्गदर्शकः**

**डॉ. वि एस् वि भास्कर रेड्डि**

**परियोजनाकार्यस्य सदस्याः**

**भर्तृहरिवर्गः**

1. शकुन्तला पण्डा
2. फिरोजकुमार साहु
3. सीमाराणी हबोडा
4. ज्योतिर्मयी साहु
5. अलोककुमार सेनापति
6. रबिन्द्र प्रधान
7. रश्मिरेखा बेहेरा
8. बिष्णुप्रिया बिश्वाल

परितः आवरणं नाम पर्यावरणम् । कस्य परितः? इति चेत् अस्माकं परितः यानि तत्वानि विराजन्ते तानि सर्वाणि पर्यावरणमिति नाम्नाऽभिधीयते । यथा - वायुः जलम् भूमिः वनश्पतयः पादपाः वृक्षाः पशवः पक्षिणः जन्तवः मनुष्याः चेत्यादयः। एतेषां तत्वानां समाहार एव पर्यावरणम् । एतेषां तत्वानाम् एतादृशं सन्तुलनं संसारे अस्ति येन प्रकृतिः अद्यावधि संरक्षिता अस्ति, अर्थात् एषु तत्त्वेष्वेव कश्चन उत्पादकः उपभोक्ता, उपभोज्यः, उपभोज्योपभोक्ता च भवति येन कस्यामपि तत्वानां बाहुल्यं न भवति न च न्यूनत्वं भवति । फलतः प्रकृतेः सन्तुलनं भवति । प्रकृतेः सन्तुलनेनैव अस्माकं पर्यावरणं सुरक्षितं भवति।

यद्यपि पर्यावरणस्य एतादृशी व्यवस्था अनादिकालादेवासीत् परं कालान्तरे जनसंख्याविस्फोटनेन अस्माकम् आवश्यकताः अपि वर्धिताः । फलतः अस्माकं कृते भूमेः , ईन्धनस्य च आवश्यकता जाता । खाद्यसामग्रीणां, साधनोपसाधनप्रसाधनसामग्रीणाञ्च आवश्यकता जाता । अतः संसारे औद्योगिकः विस्तारः संजातः प्राकृतिकतत्त्वानां क्षयः जातः । यतः काननस्य क्षय जातः प्राकृतिकसाधनानामभावः जातः । फलतः अनादिकालात् स्वतः सन्तुलिता प्रकृतिः असंतुलिता सञ्जाता । येन पर्यावरणीयसमस्याः समुत्पन्नाः । येषां समाधानार्थम् आधुनिकाः पर्यावरणस्याध्ययनं कृतवन्तः । तथा पर्यावरणशिक्षां कल्पितवन्तः । समस्येयं सार्वभौमिकी अस्ति । यतः पर्यावरणं समग्रसंसारे प्रदूषितं संजातम् । अतः पर्यावरणस्याध्ययनं न केवलं कस्मिंश्चिदेकस्मिन् देशे संजातम् अपितु समग्रे विश्वे अस्याध्ययनं विगतशताब्द्यां समारब्धम् ।

**पर्यावरणशिक्षायाः अर्थः**

प्रथमतः निकल्सनमहोदयः 21 जून 1971 वर्षे फिनलैण्ड-देशे सम्पन्ने पर्यावरणीय-भविष्यमिति अन्ताराष्ट्रियसम्मेलने स्वकीये पत्रे पर्यावरणशिक्षायाः आधारं प्रस्तुतवान् । अस्यानुसारेण तथ्यानां ज्ञानम्, अभिवृत्तिषु परिवर्तनमेवाधारः भवितुमर्हतीति प्रतिपादितम् , यतः सर्वप्रथमं तथ्यानां ज्ञानमावश्यकं पुनः तेषां समस्यानां समाधानार्थं जनानाम् अभिवृत्तिषु परिवर्तनमानयनम् । येन जनाः अनुसन्धानाय प्रवृत्ताः भवेयुः । अस्याः अवधारणायाः आधारेण एव IUCN इत्यस्य सम्मेलने अन्ताराष्ट्रियस्तरे पर्यावरणशिक्षायाः अर्थं प्रातिपादितवन्तः पर्यावरणवैज्ञानिकाः ।

पर्यावरणशिक्षा पर्यावरणस्य ज्ञानं सम्प्राप्य स्वकीयेन कौशलेन पर्यावरणस्य (वनस्पतीनां, वृक्षाणां, वन्यजीवानां, पशु-पक्षीनां, लता-पत्रादीनां, वन्यौषधीनां) संरक्षणं कुर्वन्ति स्म । इदं न केवलं पुरुषाः एव अपितु स्त्रियः कर्तुमर्हन्ति । अभिज्ञानशाकुन्तले वर्णनमायाति यत्- शकुन्तला वृक्षसेचनं करोति स्म । पशुपक्षिभिः सह क्रीडति स्म । गुरुकुल-अधिकृतेषु वनेषु उपवनेष्वाखेटं वर्णितमासीत् । महाराजः दुष्यन्तः यदा आश्रमं प्रति आगतवान् । येन जन्तवः भीताः न भवेयुः । अनन्तरमपि यदि येन केन च प्रकारेण पर्यावरणं प्रदूषितं भवति स्म तर्हि तं निवाराणार्थमपि उपायान् कुर्वन्ति स्म । अतः पर्यावरणशिक्षायाः अध्ययनव्यवस्था भवेत्चेत् अस्माकं पर्यावरणं सुरक्षितं भविष्यति ।

**पर्यावरणसंरक्षणे विभिन्नानामभिकरणानां योगदानम्**

सम्प्रति पर्यावरणं पूर्णत असन्तुलितं जातमस्ति । अस्य संरक्षणमावश्यकमस्ति । परं किम् एकवारं यदि पर्यावरणं सुरक्षितं भविष्यति तर्हि सर्वासां पर्यावरणीयसमस्यानां समाधानं भविष्यति इति । अतः आवश्यकं भवति यत्- पर्यावरणस्य शिक्षा सर्वेभ्यः सामाजिकेभ्यः बाल-युवा-वृद्धेभ्यश्च दातव्या । अस्याः शिक्षायाः प्रसारः विविधेषु अभिकरणेष्वेव आधारितोऽस्ति । अत्र तेषामभिकारणानां विषये चिन्तयामः ।

1.**गृहस्य भूमिका-** बालकानां प्रारम्भिकी शिक्षा गृहेषु एव भवति । अपि च पितरौ एव तान् पाठयतः । अर्थात् एवमपि कथयितुं शक्यते यत् गृहे निवस्यामानाः सर्वे ज्येष्ठाः बालकानामध्यापकाः भवन्ति । ज्येष्ठानां व्यवहारः तेषां पाठयक्रमः भवति । आदर्शव्यवहार-संहितायाः निर्माणं गृहे एव भवति । उदाहरणं तु गृहेषु द्रष्टुं शक्यते यत् सभ्य-शिक्षितपरिवाणां बालकाः सदाचरणं कुर्वन्ति तथा निम्नपरिवाराणां बालकाः एतन्न कुर्वन्ति । अर्थात् यदि गृहे ज्येष्ठाः पर्यावरणं न प्रदूषयन्ति तर्हि तेषां कनिष्ठाः अपि तथा न कुर्वन्ति । यथा- संसाधानानां समुचितोपयोगः, जल-भू-वायु-ध्वनीनां वा प्रदूषणनियन्त्रणं करिष्यन्ति । अतः पर्यावरणीयसंरक्षणं तदैव सुनिश्चितं भविष्यति । यदा गृहे स्थिताः जनाः पर्यावरण संरक्षणे तत्पराः भविष्यन्ति प्रारम्भत एव बालकेभ्यः पर्यावरणस्य, प्रदूषणस्य, नियन्त्रणस्य ज्ञानं प्रदास्यन्ति । अतः गृहं भवति मुख्यमभिकरणं येन पर्यावरणं संरक्षितं भविष्यति ।

**2. विद्यालय-महाविद्यालयानां भूमिका -** गृहात्परं बालकेभ्यः पर्यावरणीयज्ञानस्यकौशलस्य, मूल्यस्य, अभिवृत्तेश्च शिक्षा विद्यालयेषु महाविद्यालयेषु एव प्रदीयते । अत्राध्यापकाः छात्रेभ्यः सर्वविध-ज्ञानं प्रदाय पर्यावरणं प्रति रुच्युत्पादनं कुर्वन्ति । परमेतदर्थमावश्यकमस्ति यत् ते अध्यापकाः पर्यावरणस्य, प्रदूषणस्य प्रदूषणनियन्त्रणस्य च विषये पण्डिताः स्यु । अस्याः शिक्षायाः उपयोगः ते सर्वासु परिस्थितिषु च कुर्युः । प्रत्यक्षाप्रत्यक्षरूपेण च इदं ज्ञानं प्रयच्छेयुः । यदि अध्यापकाः कुशलिनः योग्याः प्रबुद्धाः पर्यावरणवेत्तारः प्रबोधकाः सन्ति, तर्हि पर्यावरण संरक्षणे विद्यालस्य भूमिका वर्धिता भविष्यति ।

**3. सामाजिकसंस्थानां भूमिका -** सर्वेषु स्तरेषु जनाः गृहात् विद्यालयात् वा परं स्वकीयं समयं समाजे पारस्परिकसम्बद्धनिर्माणाय ददति । यथा ते क्रीडाक्षेत्रं मनोरञ्जनस्थलं, सभास्थलं , मन्दिरं, धर्मस्थलम्, आपणमित्यादीनि स्थलानि तु गच्छन्ति एव । तत्र गत्वा विभिन्नेषु सामाजिककार्यक्रमेषु भागमपि गृह्णन्ति ।

तत्र काश्चनः पर्यावरणसम्बन्धिताः परिस्थितयः अपि आगच्छन्ति एव । तासां परिस्थितीनां समाधानं ते स्वविवेकेन वयस्कानां सहयोगेन च कुर्वन्ति । फलतः अनया प्रक्रियया ते पर्यावरणस्य पर्यावरणीय-समस्यानां, तासा समाधानानाञ्च ज्ञानमर्जयन्ति । एवं प्राप्तस्य पर्यावरणविषयकज्ञानस्य कथमुपयोगः भवति इति प्रायोगिकं ज्ञानं ते प्राप्नुवनन्ति । यथा- जलानां समुचितोमुपयोगः, ग्राम्यस्वच्छता इत्यादयः।

**4. सञ्चारमाध्यमस्य भूमिका**— सर्वविधकार्यक्रमाणां प्रचारकः भवति सञ्चारमाध्यमः। अनेन अशिक्षिताः, शिक्षिताः, छात्राः, कर्मचारीणः, अधिकारिणश्च पर्यावरणसम्बधितं ज्ञानं प्राप्नुवन्ति । संञ्चारस्य साधनानि भवन्ति यत्—समाचारपत्रं, पत्र-पत्रिकाः, आकाशवाणी, दूरदर्शनं, वार्ता, भाषणानि, चलचित्रादीनि । सेवाकालिकस्य प्रशिक्षणस्य कृते संचारसाधनानि महत्वपूर्णानि भवन्ति।

**5. शोधसंस्थानां भूमिका**— पर्यावरणक्षेत्रे उपलब्धानामेकत्रितानां वा सामग्रीणां जनेभ्यः केवलं वितरणेमव शोधसंस्थायाः दायित्वं न भवति अपितु स्वदेशस्य स्थित्यनुसारेण पर्यावरणस्य विशिष्टज्ञानामन्वेषणं, समस्यामधीत्य समाधानान्वेषणं, तस्य प्रसारणं चास्याः संस्थायाः दायित्वं भवति । अतः राष्ट्रस्तरे, प्रान्तीयस्तरे, क्षेत्रस्तरे च शोधस्यावश्यकता वर्तते ।

**6. विभिन्नानां विशिष्टसंस्थानां भूमिका**— समग्रविश्वे काश्चन संस्थाः सन्ति, याः पर्यावरणशिक्षाञ्च प्राणौकशरीरद्वयं मत्वा कार्यं कुर्वन्ति । इमाः पर्यावरणस्य विविधाङ्गानां ज्ञानप्रदानस्य नूतनसूचनाप्रदानस्य च कार्यं कुर्वन्ति । आभिः संस्थाभिः जनाः विविध पर्यावरणीयसमस्यानां समाधानानाश्च ज्ञानं प्राप्नुवन्ति।

**7. पर्यावरणसंरक्षणार्थं सामान्यजनानां भूमिका-**

1. सम्प्रति विश्वस्य जनसंख्या प्रायः षट् अरबतः अधिका वर्तते। सर्वेषां कृते निवासाय, कार्याय, कृष्यै, उद्योगाय च पर्याप्तभूमिः अपेक्षिता भवति । परन्तु उपयोगाय विविधानां प्राकृतिक-संसाधानानामावश्यकता अस्ति, येषां मात्रा सीमिता एव अस्ति ।
2. इयं हि निरन्तरं वर्धमाना जनसंख्या प्राकृतिकसंसाधानानामुपयोगं कृत्वा न केवलं शेषं कृतम्, अपि च अवशेषं संसाधानं प्रदूषितञ्च । येन प्राणिमात्रस्य जीवनं संकटापन्नं संजातम् ।
3. सस्यानामुत्पादनमधिकाधिकं भवेत् इति लोलुपता सस्येषु रासायानिकोर्वरकानां कीटनाशकौषधीनां प्रयोगं वर्धितम् । फलतः सस्योत्पादनं तु वर्धितं, परन्तु सस्यानि विषयुक्तानि जातानि । अनेन मानवानां भोजनशृंखला विशृंखलिता जाता ।
4. मानवस्य मनोरञ्जनेन व्यवसायिकवृत्या च वन्यजीवानां जीवनं संकटापन्नं जातम् । चित्रकाणां(चीता) हस्तीनां मकरादिविविधानां प्रजातीनां विलोपः सम्प्रति दृश्यते । जनाः मनोरंजनाय धनाय च एतेषां वन्यजीवानाम् आखेटं कृत्वा व्यापारं कुर्वन्ति ।
5. अधिकाधिकवनकर्तनेन अस्माकं जलच्रक्रं प्रभावितं जातम् । वर्षायाः अभावः संजातः । वृक्षाणां कर्तनेन भूक्षरणे वृद्धिरागता, पेयजलस्याभावः अपि संजातः ।
6. सम्प्रति विविधप्रकारकाणां जन-जागरण-कार्यक्रमायोजनं भवति । परं नैताः कार्यक्रमाः पर्याप्ताः ।

पर्यावरणं प्रतिं जनजागरणे आत्मबुद्धया एव जागृतिकरणमावश्यकं भवति ।

7. प्रकृतेः क्रियाकलापेभ्यः सर्वेजनाः सुपरिचिताः न भवन्ति । फलतः ते अनभिज्ञावस्थायामेव प्रकृतिं नाशयन्ति। प्रकृतिचक्रं खण्डयन्ति। अनेन अनासायेन जीवनस्य गुणवत्ता नष्टा भवति।

8. महासागरेषु सर्वाधिकं संसाधनमुपलब्धं वर्तते। अतोऽस्य संरक्षणं मनुष्यानां परमं कर्त्तव्यं भवति।

**पर्यावरणसंरक्षणाय एकः हरितपरिवारः**

पर्यावरणसंरक्षणाय अत्र एकस्य हरितपरिवारस्य कल्पना क्रियते। तस्य परिवारस्य कानि कर्तव्यानि, कानि च तस्य दायित्वानि इति विचार्यते। यथा —

- स्वं परिवारं नियोजनीयम्। परिवारनियोजनं कृत्वा राष्ट्रियययोजनायां सहयोगः दातव्यः।
- जलस्य बुद्धिमतापूर्णप्रयोगः करणीयः। जलनाशः तस्य दुष्प्रयोगश्च अवरोधनीयः।

गृहेषु निरन्तर – निस्सृता जलनालिका संरक्षणीया। जलस्त्रोतांसि प्रदूषणेभ्यः संरक्षितव्यानि।

- प्रत्येकस्मिन् वर्षे स्वगृहस्य पार्श्वे न्यूनातन्यूनं वृक्षद्वयं आरोपणीयम्। वृक्षाणां संपोषणं करणीयम्। वनस्पतिकर्तनं निराकरणीयम्। सर्वविधवृक्षपादपानां संरक्षणं कर्तव्यम्।
- अनावश्यकं विद्युतोपकरणानां चालनं न कर्तव्यम्। अधिकाधिकः सौरशक्ते उपयोगः करणीयः।।
- गृहापशिष्टानां संग्रहणं कृत्वा उपयोगदृष्टया निस्तारणं कर्तव्यम्।
- नातिदूरगमनार्थं द्विचक्रिकायाः उपयोगः करणीयः। वाहेनेषु अक्षतेन्धनस्य प्रयोगः करणीयः।
- पशुपक्षिषु अत्याचारः न करणीयः। प्राकृतिक-पर्यावरणेन सह तदविपरीतं कार्यं न करणीयम्।

**उपसंहारः-**

अतः पर्यावरण-रक्षणार्थ बहुविधं वर्णनं प्राप्यते। वातावरणस्य शुद्धीकरणाय अस्माकं पूर्वजाः यज्ञानाम् अनुष्ठानमपि क्रियन्ते स्म। अतः अस्माभिः अपि ताः एव सरणिः स्वीकरणीया। वृक्षाणाम् अभावे अपेक्षिता वृष्टिः न भवति। अनेन अनावृष्टिः जायते, या सर्वेषां कृते हानिप्रदा अस्ति। यतोहि अनावृष्ट्या कृषिकार्यं बाधते। अस्माभिः तैलचलितानां यानानां प्रयोगः अल्पाल्परुपेण कर्तव्यः, यतोहि तैः प्रदूषणं सर्वाधिकं वर्धते। वायोः शुद्ध्यर्थ सर्वैः जनैः हवनादिकम् अपि प्रातः सायंतने च काले करणीयम्। अस्माकं सर्वेषां समीपे यदपि प्रदूषणं तत् प्रयत्नपूर्वकं दूरीकर्तव्यम्। अनेन प्रकारेणैव अस्माकं पर्यावरणस्य शुद्धिः भविष्यति, वयं च सर्वे स्वस्थाः भविष्यामः।

**अनुशीलितग्रन्थाः —**


1. *एम् के गोयल, पर्यावरण अध्ययन , विनोद पुस्तक मन्दिर, आगरा।*
2. *डॉ. एम के गोयस, अपना पर्यावरण, विनोद पुस्तक मन्दिर, आगरा।*
3. *https://en.wikipedia.org/wiki/Environmental_education.*

# संस्कृतभाषाशिक्षणकौशलानि तत्संवर्धनोपायाश्च

**परियोजनाकार्यस्य मार्गदर्शकः**

**डॉ. कुमारः**

**परियोजनाकार्यस्य सदस्याः**

**कात्यायनवर्गः**

1. शशिप्रकाशतिवारी
2. गोविन्दकुमारझाः
3. संसिता महापात्र
4. सन्तोषकुमारसाहुः
5. ऋतुपर्णा जेना
6. चारुलता राउत
7. अनन्तकुमारत्रिपाठी
8. चित्तरञ्जनप्रधानः

**पीठिका –**

विभागीयवार्षिकशोधपत्रिका इत्याख्यस्य व्यावसायिकक्षमतोन्नयनकार्यस्य प्रशिक्षणं दातुं विभागेऽस्माभिः विविधान् विषयान् दत्वा सामूहिकरूपेण लेखनकार्यं कार्यते । अस्मन्निर्देशनेन शिक्षाशास्त्रिप्रथमवर्षीयः अष्टसंख्यायुतछात्रसमूहः उपर्युक्तविषयमाधारीकृत्य स्वप्रयत्नेन स्वभाषया च निबन्धमेकं विलिख्यात्र प्रस्तौति । एतस्य गणस्य कार्यं श्लाघ्यं प्रशंसनीयं पत्रिकायां प्रकाशनयोग्यञ्च वर्तते ।

**भाषायाः अर्थः -**

मानवजीवने अभिव्यक्तेः मुख्यसाधनं भाषा । भाषां विना न कोऽपि व्यवहर्तुं शक्नुयात् । मानवसभ्यतायाः संस्कृतेश्च विकासे भाषायाः स्थानं महत्वपुर्णं वर्तते । भाषामाध्यमेन वयं स्वविचाराणां, भावानां, सन्देहानां, संवेगानाम्, अभिप्रायाणां च प्रकटीकरणं कुर्मः । भाषा इति पदं भाष् – व्यक्तायां वाचि इति धातोः स्त्रीत्वे टाप्प्रत्यये कृते निष्पन्नम् । भाष्यते व्यक्तवाग्रूपेणाभिव्यज्यते इति भाषा । भाषणाद्धि भाषा इत्युच्यते । मानवः स्वमनसि विद्यमानाः आलोचनाः, भावनाः, अनुभूतीश्च अर्थयुक्तैः ध्वनिभिः संकेतैश्च व्यक्तीकरोति । कदाचिल्लिखितमाध्यमेनापि अभिप्रायान् व्यक्तीकरोति । वस्तुतः लोके द्वयोर्मनुष्ययोर्मध्ये परस्परमवगाहनाय भावग्रहणाय भावविनिमयाय च भाषां विना नान्यत् साधनमस्ति । अतः भाषा नाम एकं साधनम् अथवा माध्यमः भवति द्वयोर्मध्ये सम्पर्कसाधनस्येति स्पष्टम् । भाषायाः अर्थकथनसन्दर्भे बहवः विषयविज्ञाः स्वमतानि प्रस्तुतवन्तः एव । अमरकोशकारेणापि भाषायाः अर्थस्पष्टीकरणाय पर्यायपदानि बहूनि प्रादर्शिषत । तद्यथा -

ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।
व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥ इति ।

एवमेव वाचः प्राधान्यं प्रकटयन्तः मन्त्रा अपि उपनिषत्सु दृश्यन्ते । तद्यथा बृहदारण्यकोपनिषदि प्रादर्शि – वाग्वै सम्राट् परमं ब्रह्म । इति । एतस्मिन् सन्दर्भे महाकविना दण्डिना उक्तं स्मर्यते यत् – वाचामेव प्रसादेन लोकयात्रा प्रवर्तते । इति ।

एवं रीत्या अभिप्रायप्रकटनाय विभिन्नप्रदेशानुगुणं विभिन्नाः भाषा लोके दृश्यन्ते । सतीषु बह्वीषु भाषासु विशिष्टा प्राचीना सर्वभाषापोषिका भवति संस्कृतभाषा ।

**संस्कृतभाषायाः वैशिष्ट्यम् –**

संस्कृतं नाम दैवीवाग् अन्वाख्याता महर्षिभिः इति कवेः दण्डिनः बहुप्रसिद्धा उक्तिः। कदाचित् संस्कृतस्य विकासाय प्रतिरोधः यथा न भवेत् तथा एतस्या महाप्रसिद्धिः व्याप्ता खलु। न केवलं दैवीवाणी मानुषी अपि एषा इति प्रत्यभिज्ञानमावश्यकमस्माकम्। अत एव अस्याः महत्त्वविषये विशेषचिन्तनं कार्यम्। सम् इत्युपसर्गपूर्वक – कृञ् - धातुतः क्त प्रत्ययं विधाय संस्कृतम् इति पदं निष्पादितम् । दैवीवागेव प्रकृतिप्रत्ययविभागाख्यसंस्काररुपेण संस्कृतम् इति उच्यते। इयं सर्वश्रेष्ठा भाषा इति भाषाकोविदाः वदन्ति। सर्वासां भाषाणां जननीति अस्या अन्वर्थसंज्ञा। सर्वा अपि भाषाः अस्याः जाताः। अनया एव पोषिताश्च वर्तन्ते। प्राचीनकाले लोके सर्वत्र जनविभागे, धर्मविषये संस्कृतिविषये च एकत्वमसीत्। अत एव प्रत्येकनामकरणेन विना सनातनधर्मः सनातनसंस्कृतिः इत्यादयः सनातनशब्देन व्यवहृताः। एवं चिरपुरातनी चेदपि नित्यनूतनास्ति एषा भाषा । अस्याः भाषायाः शिक्षणाय कानिचन प्रसिद्धानि कौशलानि आवश्यकानि सन्ति। तान्यत्र प्रधानतया चर्चयामः।

**संस्कृत शिक्षणे भाषाकौशलानि –**

भाषा या कापि भवतु, तस्याः अध्यापनाय सामान्योद्देश्यानि अवश्यं भवन्ति। उद्येश्यं विना कोपि किमपि न करोति। भाषाध्ययनाय अध्यापनाय च उद्देश्यानि आवश्यकानि भवन्ति। सामान्योद्देश्यानि, विशिष्टोद्येश्यानीति द्विधा विभक्तानि सन्ति। संस्कृतभाषायाः अध्यापनाय अपेक्षिताः लक्षिताधिगमविशेषाः स्पष्टिकरणानि चात्र विविच्यन्ते। प्रायः छात्राणां कृते श्रवणं - भाषणं – पठनं – लेखनमिति चतुर्विधेषु कौशलेषु दक्षतायाः सम्पादनमेव भाषायाः प्रधानानि उद्देश्यानि सन्ति। एतैर्लक्षिताधिगमविशेषैः भाषायाम् अधिकारं सम्पादयितुं तस्यां सम्यक्तया व्यवहर्तुञ्च प्रयत्नः विधेयः। अध्यापकेन चैवं चतुर्विधेषु कौशलेषु नैपुण्य-संपादय भाषायाः बोधनोपायाः अन्वेषणीयाः। संस्कृतभाषायाः प्रधानानि भाषाकौशलानि प्रधानाः लक्षिताधिगमविशेषाः वा, तेषां स्पष्टीकरणानि च अत्र प्रस्तूयन्ते । यथा – 1. श्रवणकौशलम् 2.भाषणकौशलम् 3.पठनकौशलम् 4.लेखनकौशलम्।

मूलतः विचारग्रहणं विचाराभिव्यक्तिरित्येतद्द्वयं कस्यापि भाषायाः शिक्षणस्य प्रधानमुद्देश्यं भवति । भाषितस्य श्रवणेन, लिखितस्य वाचनेन, विचारग्रहणं सिध्यति । तथैव भाषणेन लेखनेन च विचारग्रहणं सिध्यति। एवमेतेषां चतुर्णामुद्देश्यानां साधनाय विभिन्नाः क्रियाः भवन्ति। यथा -

**श्रवणकौशलम् —**

बालकः शब्दान् श्रृणोति। बुद्धौ स्थाप्य तस्य अनुकरणं कत्वा शब्दानामुच्चारणं करोति। भाषायाः अभ्यासं करोति। भाषयापि व्यवहरति। इतराणि कौशलानि श्रवणकौशलाधारितानि भवन्ति। श्रवणशक्तेः पटुत्वेन भावस्पष्टत्वं ग्रहीतुं शक्यते। अतः सम्यक् श्रवणं समीचीनभाषणे, निर्दिष्टपठने, उत्तमलेखने च उपकरोति।

**श्रवणकौशलसम्पादनोपायाः –**

- अन्ये यदा भाषन्ते तदा सावधानेन ध्वनीनां श्रवणं करणीयम्।
- ध्वनीन् सम्यक् श्रुत्वा पुनः स्पष्टं वक्तव्यम्।
- विभिन्नध्वनीनामुच्चारणसमये ते ध्वनयः कथं निस्सरन्तीति ज्ञातव्यम्।
- वादविवादसमये कोलाहलसमयेऽपि आवश्यकतानां ध्वनीनां श्रवणं करणीयम्।
- ह्रस्व-दीर्घ-प्लुतस्वरान् अभिज्ञाय कथनस्य अन्तरार्थः ज्ञातव्यः।

**श्रवणकौशलस्य साधनानि -**

गुरुमखम्, परिवारसदस्याः, आकाशवाणी, दूरदर्शनम्, दूरवाणी, ध्वनिमुद्रणयन्त्रम्, संगणकयन्त्रम्, ध्वनिविस्तारकयन्त्रम्, सान्द्रमुद्रिकाः, दूरवाणी, संगोष्ठ्यः, समावेशाः, सम्मेलनानि, चलचित्राणि इत्यादीनि साधनानि सन्ति।

**श्रवणकौशलस्य आवश्यकता –**

- शब्दानां साधूच्चारणाय। श्रुत्वा पुनः कथनाय च।
- शब्दानाम् अर्थाभिव्यञ्जनाय। शुद्धज्ञानाय च।
- भाषणसामर्थ्योपार्जनाय इत्यादि।

अध्यापकः यत्किमपि कार्यं स्वीकरोति तत्र छात्राणां वयसः, मानसिकस्तरस्य च अनुरूपं भवति। अतः स्तरानुगुणं कौशलवर्धनाय चिन्तयति।

**प्राथमिकस्तरे श्रवण कौशलस्य साधनानि –**

- छात्रेषु श्रवणकौशलवर्धनाय शिशुगीतानि, बालगीतानि, अभिनयगीतानि च शिक्षकः श्रावयति
- शिक्षकः हास्य-वीर-अद्भुतादिरसात्मकाः कथाश्च कथयति।
- छात्रान् वृत्ताकारे उपावेश्य कर्णे वचनमिति क्रीडयितुं शक्नोति।

**माध्यमिकस्तरे श्रवणकौशलस्य साधनानि –**

- श्रवणकौशलसम्पादकाः पदक्रीडाः अस्मिन् स्तरे भवन्ति।
- पाठ्यपुस्तकीय पाठ्यांशानां प्रकाशपठनेन छात्राः श्रवणकौशलं सम्पादयितुं शक्नुवन्ति।

**उच्चस्तरे श्रवणकौशलस्य साधनानि –**

- नवरसोपेतनां गीतानां, कथानां, श्लोकानां च श्रवणं करणीयम्।
- सारस्वतसभासु कविसम्मेलनेषु, चर्चायां, कार्यशालासु च यथा भागग्रहिणो भवेयुः तथा छात्रेभ्यः अभिप्रेरणं दातव्यम्।
- चलचित्राणि, ध्वनिमुद्रिकाः, सान्द्रमुद्रिकाः, सङ्गणकम्, दूरवाणी इत्यादीनामुपयोगः।

**संस्कृतभाषायां श्रवणकौशलस्य संवर्धनोपायाः–**

- शिक्षकः संस्कृतसम्भाषणशीलः भवेत्।
- शिक्षकः कक्ष्यायाम् अन्यत्र चापि संस्कृतभाषया एव वदेत्।
- शिक्षकः कक्ष्यायामपि मध्ये मध्ये लघून् विनोदप्रसङ्गान् विनोदकणिकाः महात्मनां जीवनघटनाः वा सरलसंस्कृतभाषया श्रावयेत्।
- छात्राः यदि तत्र कस्यचिदपि शब्दस्य अर्थं नावगतवन्तः तर्हि शब्दान्तरेण अभिनयेन वा शिक्षकेण सः अर्थः ज्ञापनीयः।
- पद्यपाठनावसरे आदौ शिक्षकः तत् पद्यं द्विवारं रागसहितं गायेत्। यदि सः गानं न जानाति तर्हि गेयं यथा स्यात् तथा वा पठेत्।
- तस्मिन् समये छात्राः पुस्तकानि पिधाय एकाग्रचित्ततया तदेव श्रुणुयुः। तेन कक्ष्यायाम् उत्तमं वातावरणं निर्मितं भवति।
- आकाशवाण्याः उपयोगः – आकाशवाण्याः केभ्यश्चित् प्रादेशिककेन्द्रेभ्यः तदा-तदा संस्कृतपाठः, संस्कृतनाटकम् इत्यादयः कार्यक्रमाः प्रसार्यन्ते। शिक्षकः तान् पूर्वमेव ज्ञात्वा कक्ष्यायाम् आकाशवाणीयन्त्रस्य उपयोगेन छात्रेभ्यः तान् कार्यक्रमान् श्रावयेत्।
- ध्वनिमुद्रिकाणां सान्द्रमुद्रिकाणां च उपयोगः अधुना तु प्रायः सर्वेषु अपि विद्यालयेषु ध्वनिमुद्रणयन्त्रं, दूरदर्शनं, संगणकम् इत्यादीनां यन्त्राणाम् उपयोगः क्रियमाणः दृश्यते। यत्र तत् सौविध्यमस्ति तत्र संस्कृतशिक्षणाय अपि तस्य पूर्णः लाभः स्वीकर्तव्यः। एवं विविधोपायाः श्रवणसंवर्धनाय सन्ति।

**भाषणकौशलम् –**

स्वकीयभावप्रकाशनाय वाग्रूपव्यवहारं कथनं वा मनुष्यः स्वान्तरे यत् भावविचारचिन्तनं च करोति तत् भावप्रकाशनाय वाग्रूपव्यवहारः भाषणमिति कथ्यते। भाषणं विना व्यक्तिषु परस्परं भावविनिमयो न भवति। यदि भावविनिमयो नास्ति तर्हि समाजः पुरोगतिं न प्राप्नोति। पठनं, लेखनं च विहायापि निरक्षराः भाषणेनैव स्वकार्याणि साधयन्ति किल। अतः जीवने भाषणं बहुप्रधानम्। तच्च भाषणं द्वाभ्यां अनुकरणाऽभ्यास-साधनाभ्यां सिद्ध्यति।

**भाषणकौशलस्य साधनानि –**

वादविवादः, आशुभाषणम्, भाषणम्, प्रतियोगिता, अन्ताक्षरी, भाषात्मकक्रीडा, समस्यापूर्तिः, गानम्, कथाकथनम्, प्रदर्शनी च बालकस्य भाषणकौषलविकासे प्रधानानि साधनानि भवन्ति। आचार्याः भाषाभ्यासे सम्यक् पटुत्वसम्पादनाय विविधोपायान् प्रतिपादयन्ति। यदि छात्रस्य भाषणकौशले वृद्धिः भवति तर्हि तस्य उच्चारणं शुद्धं भविष्यति, भाषाज्ञानं भविष्यति एवं चिन्तनशक्तेः विकासो भविष्यति। एवमनेके उपयोगाः भाषणात् सम्भवन्ति।

**भाषणकौशलसंवर्धनोपायाः –**

- वादविवादः – विषयं निर्धार्य अभ्यासस्य कृते छात्रेभ्यः पर्याप्तः समयः प्रदातव्यः । विषयस्य पक्षविपक्षयोः विचारान् प्रकटयितुं छात्राः प्रेरणीयाः कुशलनिर्णायकैः । विषयवस्तुप्रतिपादनशैली भाषादीनामाधारेण मूल्यांकनं क्रियते ।
- शिबिरम् – स्वविद्यालये सम्भाषणशिविराणामायोजनं कृत्वा संस्कृतभाषणसंवर्धनं करणीयम् ।
- आशुभाषणम् – छात्रेभ्यः भाषणविषयं भाषणस्थाने झटिति क्रमशः चीटिकाधारेण दत्वा भाषणस्य आयोजनं करणीयम् । छात्रैः भाषणस्य कण्ठस्थीकरणापेक्षया स्वभाषायां झटित्यभिव्यक्तीकरणेन भाषणकौशलवर्धनं करणीयम् ।
- प्रतियोगिता – विद्यालये राष्ट्रिय - अन्ताराष्ट्रियमहत्त्वस्य विषयेषु निबन्धस्य वादविवादस्य सामान्यज्ञानस्य प्रतियोगिताः आयोजनीयाः ।
- अन्त्याक्षरी – छात्रान् संस्कृतगीत – श्लोक - सुभाषितादीनि कण्ठस्थीकरणाय प्रेरयति । छात्राः एकस्य श्लोकस्य अन्तिमपादे विद्यमानमन्तिमवर्णं स्वीकृत्य अन्यं श्लोकं वदन्ति । अनया क्रीडया छात्रेषु संस्कृतसाहित्यं प्रति रुचेः वृद्धिर्भवति ।
- भाषात्मकक्रीडा – वर्तमानकाले अध्यापने क्रीडापि प्रमुखं स्थानं निर्वहति । क्रीडाभिः छात्रजीवने समूलतया परिवर्तनमानेतुं शक्यते । भाषाक्षेत्रेऽपि अनन्तकथारचनम्, अपूर्णकथापूरणम् इत्यादीनां क्रीडानां माध्यमेन भाषणाभ्यासः कारयितुं शक्यते ।
- गानम् – अध्यापकैः छात्राः गीतं कण्ठस्थीकरणाय प्रेरणीयाः । विद्यालये संस्कृतगीतानां प्रतियोगितायाः आयोजनमपि करणीयम् । संस्कृतगीतानां गायनेन छात्राः लय – यति – गतिभिः परिचिताः भवन्ति । एवं प्रकारेण छात्राणां भाषणकौशले विकासं करिष्यामः ।

**पठनकौशलम् –**

संस्कृताध्यापकेन दृष्टौ स्थापनीयं अन्यत् कौशलमस्ति पठनमिति । पठ् - व्यक्तायां वाचि इत्यस्मात् धातोः निष्पन्नस्य पठन इति शब्दस्य अर्थग्रहणपूर्वकं स्पष्टरुपं वाचनम् इत्यर्थः ।

लौकिकानां हि साधूनामर्थं वागनुवर्तते ।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥ इति।

उत्तररामचरिते कथितश्लोकेन ज्ञायते यत् पठने प्रथमं तस्मात् अर्थः अन्वेष्यो भवति । छात्राः श्रवणापेक्षया पठनेन अधिकं ज्ञानं समुपार्जयन्ति । सस्वरवाचने स्वरयन्त्रस्य मुखस्य उपयोगात् परिश्रमः अधिको भवति । मौनवाचनस्याभ्यासः छात्राणामत्यन्तमावश्यकम् । तेन च निष्प्रयासं दीर्घकालं विस्तृतवाचनं कर्तुं शक्यते । प्रारम्भिकस्तरे शुध्दवाचनस्य महत्त्वमधिकं भवति । मौखिकभावाभिव्यक्तेः साधनत्वेन वाचनस्य मूल्यं भवति । सभायां भाषणस्याभ्यासः सस्वरवाचनद्वारा प्राप्तुं शक्यते ।

**श्रवणपठनयोः ग्रहणशीलता –**

अखिलभूमण्डले यत्र कुत्रापि निवसन्तः जनाः राजनेतारः शिक्षकाः वा शिक्षा इति शब्दस्य प्रयोगं कुर्वन्ति । कौशले कुशलता भवति । शिक्षणक्षेत्रे पठनस्य महत्वम् अधिकं वर्तते । यस्य सम्पादनं विभिन्नकौशलैः क्रियते । एतैः कौशलैः शिक्षणस्य विकासः भवति । कौशलसम्पन्नाध्यापकः छात्रेषु कुशलताम् उत्पादयितुं समर्थो भवति । पठनकौशलस्य ग्रहणशीलता अधोलिखिताः सन्ति । यथा -

- ध्वनिलिप्योः स्पष्टः सम्बन्धः यथा स्यात् तथा पठनम् ।
- अर्थावगाहनपूर्वकं पठनाय अवकाश - प्रकल्पनम् ।
- कक्षोचितस्वरेण अविच्छिन्नतया च पठनम् । गद्यपद्ययोर्गतिमनुसृत्य पठनम् ।
- विविधभाषागतचिह्नानि उदात्तानुदात्तस्वरितानुगुणं पठनकौशलसम्पादनम् ।
- आङ्गिकाभिनयस्यापेक्षया वाचिकाभिनयस्य प्राधान्यं प्रदाय पठनम् ।
- " व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् । भीतापतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ।" अर्थात् येन प्रकारेण पठनभेदाभ्यां भीता व्याघ्री सावधानतया स्वपुत्रान् दंष्ट्राभ्यां धृत्वान्यत्र नयति तथैव वर्णानामुच्चारणे जागरुकतया भाव्यम् । न च तत्र शैथिल्यं व्याघातं वा कुर्यात् ।

एतानि स्पष्टीकरणानि मनसि निधाय यः पठति सः पठनकौशले दक्षो भवेत् । एवं सः श्रोत्राकृष्टः भवेत् ।

**पठन (वाचन) शिक्षणविधिः**— वाचनशिक्षणे प्रधानतः त्रयो विधयः सन्ति । ते च –

- वर्णमालाविधिः - विधावस्मिन् वर्णमालायां स्वराः व्यञ्जनानि च तेषां बोधनानन्तरं संयुक्ताक्षराणां पदानां वाक्यानाञ्च शिक्षणं क्रमशः क्रियते । संस्कृतवर्णानां वैज्ञानिकता भवति ।
- शब्दशिक्षणविधिः - सार्थकशब्दानां शिक्षणं क्रियते । छात्रः प्रथमं शब्दानेव उच्चरति ।
- वाक्यशिक्षण विधिः - भाषायां वाक्यमेव अर्थबोधकमन्वितिः, शब्दाः वर्णाश्च घटकाः भवन्ति । वैय्याकरणाः अपि अखण्डवाक्यस्फोटमेव अर्थबोधकं मन्यते । विधिरयं छात्राणामासक्तिकरो भवति ।

**लेखनकौशलम् –**

चतुर्विधकौशलेषु अन्तिमं कौशलं वर्तते लेखनम् । वाचिकक्रियायाः वर्णरुपमेव लेखनम् । ध्वनिरुपे विद्यमानभाषांशानां लिपिरुपेणावतारणमेव लेखनमित्युच्यते । प्राचीनभारतीयशिक्षापध्दतेरनुसारं प्रथमं मुख्यतः शब्दाः, गद्यानि, पद्यानि च कण्ठस्थीक्रियन्ते स्म । ततः लेखनस्यारम्भो भवति स्म । लिप्यते अनेन इति लिपिः । लोके भाषायाः उद्गमः पूर्वमेव जातः । लिपेराविष्कारस्त्वनन्तरमेव । अधीतस्य विषयस्य लेखनेन दीर्घकालं यावत्स्मरणे स्थापयितुं शक्नुम इति भाषाविद्भिः लेखनमिति कौशलस्यान्वेषणं कृतम् । लेखनेन अन्तर्निहितानामभिप्रायाणां सम्यक्प्रकटीकरणं भवितुमर्हति । स्वातन्त्र्येण स्वविचारान् प्रकटयितुं इतरेषामभिप्रायान् ज्ञातुं च लेखनमप्युत्तममाध्यमो भवति । भाषाधिगमे तु लेखनकौशलं बहुप्रधानं भवति ।

**सुन्दरलेखनस्य महत्त्वम् –**

लेखनमेका कला भवति । अन्याः कला इव अत्रापि नैपुण्यसम्पादनाय श्रध्दा परिश्रमश्चावश्यको भवति । सुन्दरमाकर्षकलेखनं प्रभावशालि भवति । तेन बालके सौन्दर्यप्रियतायाः प्रवृत्तिरुत्पद्यते । जीवने सुन्दरतया सुवाच्यस्य लेखनस्यावश्यकता पदे पदे अनुभूयते । लेखनं कार्यालयेषु लिपिकानां नियुक्तौ अभ्यर्थिनां विशेष योग्यतारुपेण मन्यते ।

**लेखनकौशलस्य आवश्यकता उद्देश्यानि च -**

- छात्राणां लेखनशक्तेः भावाविष्कारणशक्तेश्च वर्धनम् ।
- संस्कृतभाषायां शुद्धस्पष्टसुन्दरलेखनाभ्यासः, पद्यानि समुचितरीत्या लेखितुमवकाशप्रकल्पनञ्च ।
- सूक्तीनाम्, प्रहेलिकानाम्, सुभाषितानाम्, न्यायानां च सन्दर्भानुगुणं लेखनम् ।
- संक्षेपकरणे सक्षिप्य विस्तारकरणसमये विस्तृततया च लेखनम् ।
- छात्राणां क्रमपद्धत्यां गतौ च वेगस्य वर्धनम्, पठनशक्तेः एकाग्रतायाः स्मरणशक्तेश्च विकासश्च ।
- विमर्शनात्मकरचनायाः वाक्यनिर्माणकौशलवर्धनम् ।
- विविधभावगतचिन्हानां लेखनाभ्यासः, विरामादिचिन्हानां प्रयोगज्ञानञ्च ।

**लेखनकौशलस्य संवर्धनोपायाः –**

बालकानां स्थिरं सुखञ्च उपवेशनस्य अभ्यासः तथैव लेखनीग्रहणमप्यङ्गुलीनां प्रशिक्षणम् आवश्यकम् । तदा लेखनं सुन्दरं सौष्ठवं च भविष्यति । पूर्वकाले लेखनाभ्यासः बालकानां लेखनफलके अध्यापकेन लिखितानां बृहदाकारवर्णानामावर्तनपद्धतिः इदानीमुपेक्षिता दृश्यते । लेखनशिक्षणे अक्षराणाम् आकृतिविषये प्रारम्भे एव श्रद्धातव्यम् । अक्षराणां लेखनं स्पष्टं सुन्दरं शिरोरेखायुक्तञ्च स्यात् । अध्यापकस्य लेखनं छात्राणां कृते आदर्शपूर्णं भवति । ततः छात्राः वैय्यक्तिकरूपेण परोक्षे सुन्दरलेखनाय प्रोत्साहनीयाः । पत्रेषु कलात्मकरीत्या लिखितानि आदर्शवाक्यानि सुभाषितानि च कक्ष्यायाः भित्तिषु स्थापनीयानि । तेनाकृष्टाः छात्राः सुन्दरलेखनमभ्यस्येयुः । अभ्यासेनैव कलायां कौशलं सिध्यति । सुनियोजिताः प्रतियोगिताः बालकानां प्रेरिकाः भवन्ति । कक्ष्यायां बालकाः प्रतियोगिताभावेन पूर्णकौशलमाप्तुं सावधानेन लेखनकार्यं कुर्वन्ति । एवमनेकैरुपायैः लेखनकौशलवर्धनं कारयितुं शक्नुमः । एतानि चत्वारि कौशलानि परस्पराश्रितानि । भावविनिमयात्मकभाषायाः प्रधानोद्देश्यस्य प्राप्तये श्रवण-भाषण-पठन-लेखनकौशलानि अत्यावश्यकानि । संस्कृतभाषाविकासे त्वेतानि कौशलान्यनिवार्याणि सन्ति

**अनुशीलिताः —**

*1. डॉ. उदयशंकरझा, संस्कृतशिक्षणम्, चौखाम्बासुरभारतीप्रकाशनम्, वाराणसी ।*

*2. डॉ. च. ल. न. शर्मा, डा. पतेहसिंहः, संस्कृतशिक्षणंनूतनप्रवृत्तयश्च,भारतमुद्राप्रकाशनम्, केरलम् ।*

*3. डॉ. सन्तोषमित्तलः, संस्कृतशिक्षण, आर् लाल बुक डिपो, मीरठ ।*

# भाषाशिक्षणे अन्तर्जालस्य प्रयोगः शैक्षिकोपग्रहश्च

परियोजनाकार्यस्य मार्गदर्शकः

**डॉ. विनोदकुमारशर्मा**

परियोजनाकार्यस्य सदस्याः
पतञ्जलिवर्गः

1. कल्पना धन 2. तृप्तिराणी दाश
3. सरोजकुमार पढिआरी 4. लाबोणी सिन्हा
5. सुश्री संगीता माहान्ति 6. उषाराणी शतपथी
7. चिन्मयी बारिक 8. सुबोधकुमारपाण्डेय

आधुनिकयुगेऽस्मिन् प्रायः सर्वे अन्तर्जाल (internet) विषये अवगतास्सन्ति । जालानां जालम् (network of networks) अन्तरजालमित्यभिधीयते। अन्तर्जालस्य प्राक् जालस्य ज्ञानं प्राप्तव्यम्।

## 1 . अन्तर्जालम् (Internet)

डॉ. विण्टन् जी. सर्फ् अन्तर्जालस्य आविष्कर्ता इत्युच्यते । अन्तर्जालम् अन्ताराष्ट्रियस्य जालबन्धनस्य (networks) संक्षिप्तरूपम् अन्तर्जालं सम्पूर्णे विश्वे प्रसारितानामसंख्यसङ्गणकानां जालबन्धनस्य जालबन्धः भवति । यदा द्वे द्वयाधिकानि वा सङ्गणकानि तथैव संयोज्यन्ते, येन तानि सङ्गणकानि एकमन्येन सह परस्परं सम्पर्कस्थापनं कर्तुं शक्नुयुः, यदा ईदृशतया निर्मितसंरचना, जालबन्धः (network) इत्युच्यते । अन्तर्जालि विश्वे प्रसारिताभिः लक्षशः सङ्गणकप्रणालिभिः निर्मिता एका संयुक्तसृष्टिः। अद्य अन्तर्जालं कोट्यधिकान् जनान् उपयोगकर्तॄन परस्परं संयोजयति । क्षणाभ्यन्तरे वाञ्छितसूचनाप्राप्तेः 'अधिपङ्क्तिः' (online) इत्यनेन सौविध्येन शिक्षणाधिगमप्रक्रियायाः नूतनमार्गः उन्मोचितः। अन्तर्जालं संक्षेपेण जालम् (net, web) इत्यादिनामभिः उच्यते। 1969तमे वर्षे अमेरिकायाः रक्षाविभागपक्षतः अरपानेट् (ARPANET) 'Advanced Research Project Agency Network' इत्यस्य स्थापना कृता । अस्य उद्देश्यमासीत् यत् एकस्मात् सङ्गणकात् बहुदूरं विद्यमानान् अन्यान् सङ्गणकान् प्रति रक्षासम्बद्धानां सूचनानांसम्प्रेषणम्। एतदेव अरपानेट् सम्प्रति अन्तर्जालरुपेण कार्यं करोति । रक्षाक्षेत्रमतिरिच्य अन्येष्वपि विविधेषु क्षेत्रेषु अस्य प्रयोगः विधियते विश्वे विद्यमानानि लक्षाधिकं सङ्गणकयन्त्राणि अन्तर्जालेन सह संयोजितानि सन्तः सूचनानाम् आदानप्रदानं कुर्वन्ति । तस्मात् अन्तर्जालमेतत् Super Highway इति कथ्यते।

अन्तर्जालेन संयोजितस्य प्रत्येकं सङ्गणकस्य भिन्नः सङ्केतः वर्तते। यदा एकस्मात् सङ्गणकात् सूचनाः अन्तर्जालमाध्यमेन अपरं प्रति प्रेष्यन्ते, तदानीं ताः लघुखण्डं (Packet)भूत्वा गन्तव्यस्थलं प्रति गच्छति। पुनः तत्रैव सम्मिलिताः सत्यः अपेक्षितसूचनीरूपेण उपस्थितः। अत्र प्रोटोकल् प्रमुखरुपेण कार्यं करोति । अन्तर्जालमध्यै निर्दिष्टनियमानामाधारेण विविधक्षमताविशिष्टसङ्गणके सुनिश्चितक्रमेण सूचनादानप्रदानाय यः अंशः कार्यं करोति सः प्रोटोकल् इति ज्ञायते। प्रोटोकल् भागद्वयेन विभज्यते।

## 2. जालम् ( Networking )

किं नाम जालम् इत्यत्र एकाधिकानां सङ्गणकानाम् आन्तरिकसंयोजनस्य प्रक्रिया जालम् इति कथ्यते। अनेन सङ्गणकेषु विद्यमानानां तथ्यानाम् आदानप्रदानं सरलतया भवितुमर्हति । अस्य जालस्य प्रकारचतुष्टयं विद्यते ।

- लॉन् LAN – लोकल एरिया नेटवर्क - एकस्मिन् प्रकोष्ठे विद्यमानानां सङ्गणकानां संयोजनप्रक्रिया LAN इति कथ्यते ।
- केन् CAN– कैम्पस् एरिया नेटवर्क – एकाधिकं LAN मध्ये विद्यमानानां सङ्गणकानां संयोजनप्रक्रिया अर्थात् एकस्मिन् परिसरे विद्यमाना LAN संयोजनप्रक्रिया CAN इति कथ्यते ।
- मेन् MAN – मेट्रोपोलियन् एरिया नेटवर्क – विविधेषु नगरेषु विद्यमानानां LAN, CAN इत्येतेषां संयोजनप्रक्रिया MAN इति कथ्यते ।
- वेन् WAN – वाइड् एरिया नेटवर्क – विविधेषु राष्ट्रेषु विद्यमानानां LAN, CAN, MAN प्रभृतीनां संयोजनप्रक्रिया WAN इति कथ्यते ।

## 3. ट्रासमिशन् – कण्ट्रोल् – प्रोटोकोल् ( TCP – Transmission Control Protocol ) –

उपरि वर्णितानां सूचनानां स्थानान्तरणं, लघुखण्डनिर्माणं, लघुखण्डतः पुनः सूचनानिर्माणं येन सम्भवति तत् ट्रसमिसन् – कण्ट्रोल् – प्रोटोकोल् (TCP) भवति ।

## 4. इण्टरनेट् – प्रोटोकल् ( IP – Internet Protocol ) –

ट्रंसमिशन् – कण्ट्रोल् – प्रोटोकोल् इत्यनेन निर्मितस्य लघुखण्डस्योपरि सङ्केतः निर्धारितः भवति निर्दिष्टं सङ्केतं प्रति सूचनायाः स्थानान्तरणं अनेन भवति । अन्तर्जालक्षेत्रे 1990 तमे वर्षे विश्वविस्तारजालम् (WWW) जालपुटम् ( Website ) इत्यस्य आविष्कारः शिक्षाक्षेत्रे नवीनक्रान्तिम् अजनयत् । अनेन माध्यमेन प्रतिक्षेत्रं जायमानं विषयवस्तु विश्वे एकस्मिन् कोणे स्थित्वाऽपि ज्ञातुं शक्यते । जनसंख्यायाः निरन्तरं वृध्दिकारणात् पारम्परिकविश्वविद्यालयाः महाविद्यालयाः सर्वान् जनान् प्रवेशयितुं समर्थाः न भवन्ति । अतः अस्याः समस्यायाः समाधानार्थम् अन्तर्जाले आभासीयविश्वविद्यालयाः उद्घाट्यन्ते । Web आधारितशिक्षामाध्यमेन आभासीयविश्वविद्यालयाः उच्चशिक्षाप्रदानार्थं सङ्कल्पिताः वर्तन्ते । जिज्ञासवः अन्तर्जालमाध्यमेन स्वेच्छानुसारं विषयं, ग्रन्थं, भाषां वा चित्वा अध्येतुमर्हन्ति । कः ग्रन्थः केन लिखितः कीदृशं विनूतनं तत्त्वं कः आविष्कृतवान् इति ज्ञातुं शक्यते । स्वीयः अभिनवः अनुभवः विश्वे प्रतिकोणं प्रापयितुं शक्यते । सम्प्रति संस्कृतक्षेत्रेऽपि तिरुपतिविद्यापीठं मेलकोटस्थं संशोधनकेन्द्रं , पॉण्डिचेरीस्था फ्रेञ्च संस्था, पुणे, हैद्राबाद, कानपुरम्, इलाहाबाद इत्यादिनगरेषु विद्यमानशिक्षासंस्थाः शास्त्रसंरक्षणं शास्त्राध्यापनं, संस्कृतभाषाप्रसारणम्, इत्याद्यनेकानि महत्त्वपूर्णकार्याणि कुर्वत्यः सन्ति । अतः संक्षेपेण वक्तुं शक्यते, यत् अन्तर्जालमाध्यमेन ज्ञानस्य सञ्चयः, प्रसारः विकासश्च कर्तुं शक्यते ।

**5. अन्तर्जालस्य स्वरूपम् –**

दूरसंचारक्षेत्रे संगणकानां प्रयोगेन सकृत्परिवर्तनं संलक्ष्यते । सम्प्रति सर्वाऽपि टेलिफोन–एक्सचेंज व्यवस्था संगणकानां माध्यमेनैव विधीयते । इन्टरनेट ई – मेल, ई-कामर्स प्रभृतयः संगणकस्य प्रयोगेण नूतनां क्रान्तिं विदधति । संगणक – संबध्दा कार्यजातं च वर्तते, तत् सर्वम् एकत्रैव प्राप्तुं शक्यते । संसारे लघु-दीर्घ संगणकाणाम् एकः विराट नेटवर्क ( Network ) इत्यस्य जालः वर्तन्ते । जगतः कोटि-अधिकजनाः अन्तर्जालस्य लाभान्वितो भवन्ति । अन्तर्जाले मुख्यतः ई-मेल (E-Mail)वर्ल्ड वाइड वेब, एफ.टी.पी, ई-कॉमर्स इत्यादयः सौविध्यमुपलभ्यन्ते । अन्तरजालम् इत्यस्य लोकप्रियतायाः कारणं तस्या सुगमता-सरलतायाश्च विद्यते । येषु अन्तर्जालेषु जगति कस्याऽपि कम्पूटर साइट इत्यनेन संयोगः तद्वदेव सरलः स्यात् यथा चलभाषितयन्त्रं दूरभाषोपरि नम्बर डायल-कारणं वर्तते ।

6 .**अन्तरजालस्य महत्वम्**

अन्तरजालस्य एका शाखा वर्तते वर्ल्ड् वाइड् वेव्  ‘WWW’ । विश्वे विस्तारजालं तेन माध्यमेन विभिन्नविषयेषु सूचना-प्राप्तिकरणमेव । अन्तर्जालं सङ्गणकान् योजयति एवं वर्ल्ड् वाइड् वेव् तैः सम्बन्धैः संगणकान् सूचना वेबजनानां माध्यमेन उपलभ्यते । अस्मिन् कार्ये Internet Explorer (अन्तर्जाल अवेषक ) ब्राउजर् (browser) प्रागमस्य साहायेन गृह्यते । यथा - google, yahoo  इत्यादयः ।

World Wide Web (WWW) अन्तर्जालस्य अतिदीर्घः प्रमुखः भागः वर्तते । अन्तर्जालमाध्यमेन व्यक्तिः स्व  स्थाने उपविश्य सम्पूर्णसंसारस्य सूचना क्षणमेवप्राप्तुं शक्यते । E-mail (Electronic Mail) माध्यमेन क्षणाभ्यन्तरे अन्तर्जालं संयोजितजनान् प्रति सूचना प्रेषयितुं शक्यते । एकस्मिन् समये एका सूचना संख्याधिकजनान् प्रति प्रेषयितुं शक्यते । अन्तर्जालसम्बद्ध सङ्गणकोपरि कार्यरताः जनाः अपरसम्बद्धः सङ्गणकोपरि कार्यरतैः जनैः सह परस्परवार्तालापं कर्तुं शक्यते । शिक्षाक्षेत्रे नवीनक्रान्तिम् उदपायत् एतस्य अन्तर्जालस्य माध्यमेन प्रतिक्षेत्रे जायमान विषयवस्तु विश्वे एकस्मिन् केणे स्थितोऽपि ज्ञातुं शक्यते । Internet मध्ये अगणितपुस्तकानि ‘Online Helpcentre’ विशेषज्ञानां मतं ज्ञात्वादयः भिन्न विषयाणां कृते भिन्न-भिन्न वेब्साइट् अपि अस्ति । Internet मध्ये स्थितं विभिन्न ट्युटोरियल्स् माध्यमेन अनेकाः शिक्षा प्राप्तुं शक्नुमः ।

**7 . भाषाशिक्षणे अन्तर्जालस्य अनुप्रयोगः**

अन्तर्जालमाध्यमेन भाषाशिक्षणं सौविध्ययुक्तं भवति, अत्र अन्तर्जालमाध्यमेन भाषाशिक्षणम् अधिकृत्य विचारः प्रस्तूयते ।

- 7A. ई-लर्निंग (E- Learning) - इत्यस्य सहायेन भाषाशिक्षणं भवितुमर्हति । उत्तमविदुषामध्यापनं Video shooting कृत्वा Website निर्माय अन्तर्जाले Upload कृत्वा परदर्शनं चेत् यः कोऽपि पठनार्थमन्तर्जालमुद्घाट्य You tube मध्ये भाषां सौविध्यानुसारं पठति ।

- 7B. फेसबुक, व्हाट्सप् (Facebook,Whatsapp) - माध्यमेनापि भाषाशिक्षणं प्रवर्तते Whatsapp, Facebook मध्ये आगतानां Video तथा भाषा सम्बन्धितलेखाः Share कृत्वा अपि भाषाशिक्षणं कर्तुं शक्नुमः ।
- 7C. मोबाइल एप (Mobile app) - इत्यादि साधनैः भाषाशिक्षणं व्यापकं कर्तुं शक्नुमः Mobile मध्ये Google Translate App Download कृत्वाऽपि बह्व्यः भाषाया अनुवादं कृत्वा भिन्न भिन्न भाषाशिक्षणं कर्तुं शक्नुमः ।

**8. अन्तर्जालस्योपयोगः लाभाश्च**

1) ई-पत्रम् — ई-पत्रमाध्यमेन क्षणाभ्यन्तरे अन्तर्जाले संयोजितान् प्रति सूचना प्रेषयितुं शक्यते । एकस्मिन् समये एका सूचना संख्याधिक जनान् प्रति प्रेषयितुं शक्यते । अनेन छायाचित्र-ध्वनि-श्वरादीनि विविधानि तथ्यानि संयोज्यनानि । निः शुल्कसूचनासम्प्रेषणव्यवस्था ई-पत्रद्वारा सम्भवति ।

2. संलाप (Chat) - अनेन तन्त्रांशविशेषेण ग्राहकाः स्वसंगणकेन परस्परवार्तालापं कर्तुं शक्नुवन्ति ।

3. दृश्यपरिषद (video conferencing) - अनेन एकाधिकं जनैः सह गोष्ठ्यात्मकभाषायां कर्त्तुं शक्यते । वार्तालापेन सह जनाः तान् द्रष्टुं श्रौतुञ्च शक्नुवन्ति ।

4. जालवाणिज्यम् ( E-Comerce) - अनेन गृहे उपविश्य अपेक्षितद्रव्याणां क्रयविक्रयणादिकार्य कर्त्तुं शक्यते । क्रेता माध्यमेन धनं ददाति । विक्रेतापि विक्रीतद्रव्याणि क्रेतुः गृहपर्यन्तं प्रेष्ययन्ति ।

5. ई-शिक्षा (E-Education) - गृहे उपविश्य अन्तर्जालसहायेन अङ्कीयपुस्तकानि ( E-books)पठितुं शक्यन्ते, न केवलं पठनम् अपितु अनेन अधुना परीक्षादपि सम्भवति परीक्षापरिणामम् अपि यथासमय शीघ्रतया प्राप्यते ।

6. अङ्कीयपुस्तकम् (E-Book) - अत्र अत्यन्तं महत्त्वपूर्णानि पुस्तकानि विद्यन्ते । अन्तर्जालमुपयुज्य एतेषाम् अध्ययनं कर्त्तुं शक्यते । अपेक्षितस्थले एतेषां पुस्तकानामवारोहणं मुद्रणं वा स्वीकर्तुमर्हति ।

7. ई-पुस्तकालयः (E-Library) - अन्तर्जाले बहवः पुस्तकालयाः सन्ति येषां जालस्थलानि उद्घाट्य तत्र सम्प्रवेशं कृत्वा पुस्तकालयस्य पुस्तकानि पठितुं शक्यते ।

8. ई-पत्रिकाः— विविधाः ई-पत्रिकाः अन्तर्जाले विद्यन्ते । नैके महत्त्वपूर्णाः लेखा एतासु पत्रिकासु प्राप्यन्ते । अत एव तत्र प्रदत्तनिर्देशानुसारं विलिख्य स्वीयलेखाः अपि प्रकाशयितुं शक्यन्ते । किञ्च पत्रिकासु विद्यमानानां विषये स्वाभिमतमपि दातुं शक्यते ।

9. अनुसन्धानम् (Research) - अनुसन्धाता स्वगृहे उपविश्य अन्तर्जालमाध्यमेन स्वानुसन्धानसम्बद्धाः सूचनाः क्षणाभ्यन्तरे प्राप्तुं शक्नोति । किञ्च विदेशेषु क्रियमाणानां स्वसमस्यासम्बद्धाम् अनुसन्धानानां विषये ज्ञानं प्राप्नोति ।

**9. अन्वेषणयन्त्रम् (Search Engine)**

अन्तर्जालं सूचनानां सागरः भवति, अत्र प्रत्येकमपि सूचना निवृतसङ्केतेन सङ्केतितो भवति। अस्मात् सागरात् यत् जालस्थलं (Website) सूचनान्वेषणार्थं कार्यं करोति तत् अन्वेषणयन्त्रमिति कथ्यते। yahoo.com, google.com, answer.com, ask.com इत्यादीनि प्रमुखानि अन्वेषणयन्त्राणि भवन्ति जालपृष्ठे सूचनान्वेषणाय निर्दिष्टं स्थानं विद्यते। तत्र अपेक्षितसूचनाविषयं विलिख्य पृष्ठे विद्यमानम् अन्वेषणपिञ्ज (Research bottom) इत्यस्योपरि नुदनमात्रेण अन्वेषणयन्त्रम् अन्वेषणं कृत्वा विषयसम्बद्धसूचना ददाति स्थानेऽस्मिन् अपेक्षितसूचनाविषयकं निर्दिष्टं तथ्यं (Hints) दातव्यं भवति येन विद्यमानाम् उद्देश्यानुकूलसूचनानां प्राप्तिः स्यात्। पुनः तत्र शुद्धसूचनानिमित्तम् उच्चस्तरीयम् अन्वेषणम् (Advanced Search) इति अन्वेषणव्यवस्था अस्ति। सङ्गणकस्य पटलस्योपरि (Connection Brod-band) भवति। तस्योपरि नुद्यते चेत् आरोहणस्य अवरोहणस्थिते संयोजनस्य जालतीव्रतायाश्च (Download, Downloading, Status, Connection Net Speed) सूचना लभ्यन्ते।

**अन्तर्जालस्य सौविध्यानि (Advantages of internet)**

- स्वल्पसमयाभ्यन्तरे विश्वब्रह्माण्डविषये सूचनाः प्राप्तुं शक्यते।
- क्षणाभ्यन्तरे सूचनानां स्थानान्तरणं भवति।
- ई-मेल माध्यमेन सूचनाप्राप्तिः।
- देशविदेशीयसमाचारप्राप्तिः।
- उद्योगविषयकसमाचारप्राप्तिः।
- वान्धवजनैः सह आलापः।
- विविधप्रतियोगितासु भागग्रहणम्।
- नवीनोपयोगतन्त्रानाम् अवरोहण (Download) प्रक्रियाकरणम्।
- विविधसंस्थानां प्रतिष्ठानाञ्च विज्ञापनम्।

**शैक्षिकोपग्रहः ( एजुसेट्)**

GSAT- 3यः एजुसेट् नाम्ना परिचितः। पाठशालास्तरात् उच्चशिक्षां यावत् प्रस्तुतं भवति। एतद् प्रथमः समर्पित 'शिक्षा उपग्रह' भवति। यः देशस्य शैक्षणिकसामाग्र्या- संवितरण निमित्तं कक्षां उपग्रह आधारित पार्श्वद्वयं संचारं उपलब्धिं करोति। अयं भू-तुल्यकालिक उपग्रह आई-2 इति नाम्ना विकसितः भवति। GSAT-374 पूर्णरिखांशे (कल्पना-1) मेट्साट् एवं इन्साट् 3 E साकं स्थितः भवति। भारते भू-तुल्यकालो उपग्रह प्रमोचन वाहन GSLV-F1 द्वारा एडासुट् प्रक्षेपणस्य प्रस्तुतिः (SPCC) धवन अन्तरिक्ष केन्द्रसार श्रीहरिकोटास्थले सन्तोषजनकभावेन प्रस्तुतिं कृत्वा समाप्तं कृतवान्। अधुना प्रगत्यनुसारेण सोमवासरः, विंशति सेप्टेम्बर चत्वारोत्तरः विंशतितमे दिनाङ्के प्रातः चतुर्वादने प्रमोचनस्य सम्भावना

आसीत् । परन्तु द्वाविंशति सेप्टेम्बर 2004 तमे दिनाङ्के प्रातः सार्द्धनववादने 1st द्वारा आयोजित द्वितीयकक्ष्या उत्थानकौशले. MCF इत्यस्य मुख्य नियन्त्रणसुविधा, हासने उपग्रहं आदेशं दत्त्वा द्विचत्वारिंशत् निमेषं यावत् एजुसाटस्य इत्यस्य ऑनवर्ड द्रवस्य एपोजी मोटर् (लैम) इत्यस्य प्रज्वलनमभवत् । लैम प्रज्वलनेन साकं एजुसाट इत्यस्य उपभूः 8800 किमी यावत् वृद्धिः भूत्वा 32800 किमी अभवत् । अपभूः इत्यस्य उच्चता 3600 किमी एवं भूमध्यरेखा सम्बन्धे कक्षायां सपाद सप्तवादन डिग्री पुनः वृद्धि भूत्वा 0.25 डिग्री अभवत् । अधुना एड्यूयाट् इत्यस्य कक्षोय अवधिः 22.40 निमेषाः । एड्यूयाट् इत्यस्य प्रथम उत्थान प्रचलनम् अभवत् ।

- GSLV-F-01 उत्थापनस्य निकषा दृश्यं द्वयवारम् ।
- GSLV-F-01 उत्थापनस्य निकषा दृश्यम् एकवारम् अभवत् ।
- GSLV-F-01 उत्थापनस्य दृश्यं त्रिवारम् अभवत् ।
- GSLV-F-01 उत्थापनस्य दृश्यं द्वयवारम् अभवत् ।
- प्रमोचनात् प्राक् भू-तुल्यकाली उपग्रहवाहनस्य दृश्यं त्रिवारम्, द्विवारम्, एकवारमभवत्।
- एड्यूशाट् अधुना GTO मध्ये भू-परिक्रमां करोति । यः भूमध्यरेखा सम्बद्धः भवति ।

**शैक्षिकोपग्रहस्य विशेषताः**

अस्य स्थान भवति भू-स्थिरकक्षा । अस्य शक्तिः 2.3 Watt ऊर्जा उपलब्धः निमित्तं GOAS सौरपैनल । द्वयः 24 AH NICD बॅटरी प्रयोग निमित्तं ग्रहणं सहायता । अस्य विशेषलक्षणम् भवति ।

- शैक्षणिक उपयोग निमित्तं समर्पित उपग्रह ।
- 140 Watt विकीरणीय शीतलित हेतु यू-बैण्ड TWTAS ।
- सौरव्यूहे उच्चदक्षता बहुसन्धिः सौरसेल् इत्यस्य उपयोगः ।
- तस्य प्रमोचन GSLV –F-01 द्वारेण सेप्टेम्बर विंशति चत्वारोत्तरः विंशतिः दिवसे अभवत् । अस्य वर्तमान स्थितिः आयुपूर्णः भवति।

**अनुशीलिताः—**

*1. प्रो सन्तोषमित्तल, शैक्षिक तकनीकी एवं कक्षाकक्षप्रबन्ध ।*
*2. डॉ. रमाकान्तमिश्रः, शैक्षिकप्रविधिः ।*
*3. एस पी कुलश्रेष्ठ, शैक्षिकप्रद्योगिकी ।*

# भारतीयसंविधाने निहितानां शिक्षासम्बद्धानाम् अनुसूचीनाम् अधिनियमानाञ्च संग्रहणम्


**परियोजनाकार्यस्य मार्गदर्शकः**

**डॉ. सचिनकुमारः**

**परियोजनाकार्यस्य सदस्याः**

**जयादित्यवर्गः**

1. बिजयकुमारपण्डा 2. सुश्री पल्लिश्री परिडा
3. रमाकान्तशर्मा 4. राघवेन्द्रझाः
5. श्रद्धाश्री दाश 6. देशमाने वर्धमान रविन्द्र
7. संजीबकुमारसाहु 8. कल्पना धल


**प्रस्तावना**

प्राचीनकालादारभ्य भारतीयसमाजे शिक्षाव्यवस्था सुदृढा वर्तते । पुराकाले गुरुकुलशिक्षापद्धतिः प्रचलिता आसीत् । तत्र स्थित्वा शिष्याः गुरोः पार्श्वे शिक्षाग्रहणं कुर्वन्ति स्म । तस्मिन् समये शिक्षा सर्वेषां कृते नोपलभ्यते स्म । शिक्षाग्रहणे स्त्रीणामपि अधिकारः नासीत् । राजवंशीयाः अथवा केचन प्रतिभाशालिनः एव शिक्षां प्राप्नुवन्ति स्म । पुनश्च नार्यः शिक्षाग्रहणे असमर्थाः आसन् । समयक्रमेण आङ्लजनाः यदा भारतवर्षम् आगतवन्तः तस्मिन् काले नारीशिक्षायाः प्रचारः प्रसारश्च अभवत् । येन भारते शिक्षायाः विकासः अभवत् ।

स्वतन्त्रतायाः परं भारतीयसंविधानं प्रणीतमभूत् । तत्र नागरिकाणां कृते केचन मौलिक-अधिकाराः दत्ताः । तेषु अधिकारेषु शिक्षाधिकारः अपि अन्यतमः अस्ति । जाति-धर्म-वर्ण-लिङ्गनिर्विशेषेण सर्वेषां कृते शिक्षाक्षेत्रे समानाधिकारः अस्माकं संविधाने दत्तमस्ति। एतदर्थं संविधाने शिक्षाधिकाराय अनुसूचयः अधिनियमाश्च समाविशन्ति । अपि च संसदेन विविधेषु कालेषु शिक्षानीततिः अधिनियमादीनां प्रणयनं विधीयते ।

शिक्षाधिकारः(RTE), सर्वशिक्षाभियानम्, प्रौढशिक्षा, नारीशिक्षा, अल्पसंख्यकशिक्षा, जनजातीयशिक्षादिविषये भारतीयसंविधाने नीतिनियमाश्च सम्बलिताः सन्ति । प्राथमिक-माध्यमिक-उच्चमाध्यमिक-उच्चशिक्षादिस्तरेषु शिक्षाक्षेत्रे कानि सौविध्यानि छात्राणां कृते वर्तन्ते तत्सर्वं संविधाने अधिनियमेषु च लिखितानि वर्तन्ति । शिक्षासम्बधि-अनुसूचयः तथा अधिनियमाः बाध्यतामूलकशिक्षा, व्यावसायिकशिक्षा, प्राविधिकशिक्षा, प्रौढशिक्षादीनां विकासाय विविधान् विषयान् प्रतिपादयति । अस्माकं भारतीयसंविधाने शिक्षाविषयकाः के के अधिनिमाः काश्च अनुसूचयः भवन्ति, तदधः आलोचनं क्रियते । संविधानस्य एतेषाम् अनुसूचीनाम् अधिनियमानाञ्च आधारेण कथं शिक्षायाः सम्यक् व्यवस्था भवति तदग्रे वर्ण्यते ।

## भारतीयसंविधाने शिक्षासम्बद्धप्रावधानानि

भारतीयसंविधाने शिक्षाव्यवस्थायाः कृते शिक्षासम्बन्धिन्यः काश्चन अनुसूचयः वर्णिताः सन्ति। अस्माकं भारते शिक्षाक्षेत्रे बह्व्यः समस्याः सन्ति, परन्तु शिक्षायाः प्रसारार्थं तथा सार्वजनीकरणार्थं विविधाः शिक्षाधिकाराः भारतीयसंविधाने दृश्यन्ते। भारतीयसंविधाने शिक्षानीतेनिर्धारकप्रमुखाः अनुच्छेदाः निबद्धाः वर्तन्ते। ते अधोनिर्दिष्टाः वर्तन्ते।

### 2.1. अनुच्छेदीयप्रावधानानि —

- **अनुच्छेदः 28** – राज्यसर्वकारेण पूर्णरुपेण पोषिताषु संस्थासु धार्मिकशिक्षा न भविष्यति किन्तु तादृशवैयत्तिकसंस्थासु धार्मिकशिक्षा भवितुमर्हति, याः सर्वकारेण अङ्गीकृताः अथवा सर्वकारात् आर्थिकसहायतां प्राप्नुवन्ति, तथा सर्वकारस्य प्रबन्धने विद्यमानाः तदितरार्थिकस्त्रोतोभिः संस्थापिताः प्रचाल्यमानाश्च संस्थाः, यासां निर्मातृभिः दातृभिर्वा धार्मिकशिक्षानियमेन स्यादिति अभिसन्धिः प्रकटितः। तथापि नियमः एतादृशः भवेत् यत् तादृशसंस्थासु पठन्तः बालाः धार्मिकशिक्षायाम्, धार्मिकोपासनायाम् धार्मिकस्थानेषु च उपस्थातुं बलात् न अनुरुध्येरन्, यावत् ते प्रौढाः न भवन्ति तथा संरक्षकैः पितृभिः वा तदर्थं नानुमन्यन्ते।
- **अनुच्छेदः 29 (1)** - भारतस्य कस्यापि प्रान्तस्य जनाः स्वभाषालिपेः संस्कृतेश्च संरक्षणायाधिकारिणो भविष्यन्ति। अत्र देवनागरीलिप्यां हिन्दीभाषायामधिकारत्वनिर्देशकः 343 इत्याख्यानुच्छेदस्य प्रभावो न भविष्यति।
- **अनुच्छेदः 29 (2)** - राज्यद्वारा सञ्चालिते साहाय्यभूते वा कस्मिन्नपि विद्यालये कोऽपि छात्रः जातिधर्मलिङ्ग-भाषाभेदेन प्रवेशात् वञ्चितो न भविष्यति।
- **अनुच्छेदः 30** - धर्मस्याधारेण भाषाधारेण वा निर्धारिताल्पसंख्यकाः स्वरुच्यनुकूलं शिक्षणसंस्थाः स्थापयितुमधिकारिणो भविष्यन्ति। उत्तमशिक्षासंस्थानां कृते राज्यसर्वकारोऽपि धर्मभाषादिभेदेन साहाय्यं कर्तुं भेदो न करिष्यति।

### २.२. राज्यस्य नीतिनिरर्देशकतत्वानि

- **अनुच्छेदः 41** – राज्ये नागरिकाः स्वसामर्थ्यानुगुणं यथाशक्तिकार्यं प्राप्तुं, शिक्षामध्येतुं, वार्धक्ये, अङ्गहीनतायां वान्यार्हतानामभावे सार्वजनिकसाहाय्यमाचरितुं प्रबन्धानां संसाधनानां वा प्राप्तिः कारयिष्यन्ति।
- **अनुच्छेदः 45** – संविधानस्य क्रियान्वयात् दशवर्षाभ्यन्तरे सर्वेषां बालाकानाम् आचतुर्दशवर्षम् अनिवार्यनिश्शुल्कशिक्षाप्रदानाय राष्ट्रं यत्नशीलं भवेत्।
- **अनुच्छेदः 46** - राज्यं समाजस्य अनुसूचितजाति-जनजाति इत्याख्येनाभिधीयमानानां वर्गाणां शैक्षिक-आर्थिक-सामाजिक-राजनैतिकसंरक्षणाय तेषामुत्तरोत्तरमुन्नतये च प्रयासं करिष्यति।

**२.३. अनुसूचयः -**

संविधानस्य सप्तमी सूचिका (धारा 246)- भारतीयसंविधानं संघीय(federal)राष्ट्रेषु दृश्यमानवत् शासनाधिकारं केन्द्रराज्यसर्वकारयोः वितरति। तदर्थं शासनविषयाः त्रिविधसूचीषु विभाजिताः। तद्यथा – संघसूची, राज्यसूची, समवर्तीसूचीति। साम्प्रतम् एतासु सूचीषु शिक्षा समवर्तीसूचीमध्ये वर्तते। अपि च शिक्षासम्बद्धानां केषाञ्चन विषयाणां शासनस्य नीतिनिर्माणस्य वा अधिकारः केन्द्र-राज्ययोः कृते पृथक् पृथक् सुरक्षिताः। तदधः विलिख्यते –

- **संघसूची अनुच्छेदः 63-66** – काशीहिन्दूविश्वविद्यालय-अलिगढमुस्लिम्विश्वविद्यालय-दिल्लीविश्वविद्यालयाः तथा अन्याः संसदधिकारेण पोषितास्संस्थाः केन्द्रसर्वकारस्याधीनाः राष्ट्रियमहत्वस्य संस्थाश्च केन्द्रसर्वकारेणैव शासिताः भवन्ति ।
- **राज्यसूची** (१) अनुच्छेदः 11 – केन्द्रसूच्याः 63, 64, 65, 66 इति पूर्वोक्तानुच्छेदानां तथा समवर्तीसूच्याः 25–अनुच्छेदस्य विषयान् विहाय अन्यविषयाणां शासनाधिकारः राज्यसर्वकारस्यैव भवति । (२) अनुच्छेदः 12 – राज्यसर्वकारेण नियन्त्रिताः अथवा आर्थिकसाहाय्येन पोषिताः ग्रन्थालयाः, संग्रहालयाः, इतरसंस्थाः, संसत्पोषणरहिताः प्राचीनैतिहासिकस्मारकसंस्थाश्च राज्यसर्वकारस्याधिकारे समायान्ति।
- **समवर्तीसूची** (१) अनुच्छेदः 20 – आर्थिक-सामाजिकयोजनाः। अनुच्छेदः 25 – श्रमिकाणां व्यावसायिकं प्राविधिकञ्च प्रशिक्षणम्।

**भारतीयसंविधाने शिक्षासम्बन्धि-अधिनियमाः**

भारतसर्वकारेण समये समये संविधानानुसारं विविधविषयाणां सन्दर्भे अधिनियमाः निर्मीयन्ते, ये हि संविधानस्यैव अङ्गभूताः भवन्ति। तेषु शिक्षाविषये अपि केचन अधिनियमाः सन्ति। भारतीयसंविधाने शिक्षासम्बधिनः के के नियमाः सन्ति, तदधः प्रस्तूयते –

**शिक्षाधिकाराधिनियमः (RTE-2009) -**

भारतीयसंविधाने सर्वेषां छात्राणां कृते निश्शुल्कं तथा अनिवार्यरूपेण शिक्षाप्रदानाय 2009 तमे वर्षे RTE तथा शिक्षाधिकारः नियमः कृतः। अनेन नियमेन 6 वर्षात् 14 वर्षपर्यन्तं सर्वेषां बालकबालिकानां कृते बाध्यतामूलकशिक्षा निशुल्करूपेण दातव्या इति निश्चयं कृतम्।

समग्रे भारते शिक्षायाः प्रचारं प्रसारञ्च कर्तुं शिक्षाधिकाराधिनियमः (RTE) जम्मूकाश्मीरराज्यं विहाय सर्वेषु प्रदेशेषु अधिनियमितः जातः। अनेन अधिकारेण भारतस्य दलित-वंचितवर्गस्य छात्राः उपकृताः अभूवन्।

**सर्वशिक्षाभियानम् (2002)**

शिक्षाक्षेत्रे सर्वशिक्षाभियानम् इति कार्यक्रमः भारतसर्वकारस्य एकः प्रमुखः कार्यक्रमः वर्तते। भारतीयसंविधानस्य 86 तमसंशोधनेन निर्देशितं यत् 6 वर्षतः 14 वर्षपर्यन्तं सर्वे छात्राः निःशुल्कं तथा अनिवार्यरुपेण शिक्षाग्रहणं करिष्यन्ति इति। एतद् मौलिकाधिकारत्वेनापि समागतः। SSA (SARVA SHIKSHA ABHIYAN) इति कार्यक्रमस्य मुख्योद्देश्य शिक्षायाः सार्वजनीकरणमेव आसीत्। 2001-02 तमे वर्षे अस्य कार्यान्वयनम् अभवत् अनेन सार्वभौमिकसुलभता एवं प्रतिधारणं, प्रारम्भिकशिक्षायां बालकबालिकानां तथा सार्वभौमिक-सामाजिकश्रेण्याः विविधता दूरीकरणाय प्रयासः कृतः। विद्यालयस्थापना, वैकल्पिकविद्यालयस्य सुविधाप्रदानम्, कक्षानिर्माणम्, पेयजलसुविधा, अध्यापकनियुक्तिः, अकादमिकसंसाधनसहायता, निःशुल्कपाठ्यपुस्तकवितरणमित्यादीनि कार्याणि अस्मिन् अन्तर्भवन्ति।

अयं कार्यक्रमः पाठ्यक्रम-शिक्षकशिक्षा-शैक्षिकयोजना तथा शिक्षाप्रणाल्याः क्रमबद्धरीत्या पुनरुद्धाराय विहितः। अनुसूचितजातिजनजाति-अल्पसंख्यक-मुस्लिम-भूमिहीन-कृषकपुत्राणां कृते अवसरस्य लाभः भविष्यति। विशेषतः समाजेन उपेक्षितबालिकानां कृते समावेशीपरिवेशस्य निर्माणार्थं सर्वशिक्षाभियानकार्यक्रमः कृतः।

**राष्ट्रियाल्पसंख्यकायोगाधिनियमः (1992)**

यस्मिन् धर्मे सम्प्रदाये वा अधिकजनाः वर्तन्ते, ते बहुसंख्यकाः तदतिरिक्तधर्मसम्प्रदायानुयायिनः अल्पसंख्यकाः इत्युच्यन्ते। भारते अल्पसंख्यककानां शिक्षादिव्यवस्थायै अल्पसंख्यकायोगः घटितोऽस्ति। अयम् आयोगः अल्पसंख्यकानां शिक्षायै मन्त्रालयं विविधयोजनानां निर्माणे साहाय्यं प्रददाति। अल्पसंख्यकशिक्षायाः विकासाय द्वे योजने स्तः। अस्याः शिक्षायाः विविधानि शैक्षिकसौविध्यानि अपि लभ्यन्ते, यथा-

- अल्पसंख्यकानां भाषायाः लिपेश्च संरक्षणम्।
- तेषां संस्कृतेः सम्माननम्।
- तेषां भाषालिपिसंस्कृतीनां संरक्षणे प्रतिकूलावस्थायाः मान्यता न देया।
- तेभ्यः शिक्षणसंस्थासु जाति-धर्म-भाषाधारेण प्रवेशः देयः।
- ते स्वेच्छया स्वीयशिक्षणसंस्थाः स्थापयितुं शक्यन्ते।
- भारतीयसंविधाने अल्पसंख्यकहितरक्षणाय सामान्यजनसदृशशिक्षाव्यवस्था वर्णिता भवति।

राष्ट्रीय-अल्पसंख्यकायोगः (1997) तथा च राष्ट्रीय-अल्पसंख्यकायोगाधिनियमः एतेषां हिताय तथा शिक्षाक्षेत्रे विकासार्थं कार्यं कुरुतः। केन्द्रसर्वकारस्य संशोधितकार्ययोजनायाः (1992) अनुसारम् अल्पसंख्यकेभ्यः केन्द्रसर्वकारैः 1993-94 तमे वर्षे निम्नलिखिताः योजनाः प्रारब्धाः। तद्यथा-

**क्षेत्रगहनकार्यक्रयोजना** — अस्याः योजनायाः माध्यमेन केन्द्रसर्वकारेण अल्पसंख्यकच्छात्राणां कृते शिक्षासम्बद्धानि अधोलिखितानि सौविध्यानि प्रदीयन्ते।

- नवीनप्राथमिकानौपचारिकशिक्षाकेन्द्राणां स्थापनम्।
- प्राथमिकविद्यालयेषु भौतिकसंसाधनानां सुदृढीकरणम्।
- शैक्षिकानग्रसराल्पसंख्यकान् विज्ञानं, वाणिज्यं, मानविकीव्यावसायिकपाठ्यक्रमञ्च पाठ्यते।

**मदरसाशिक्षायाः आधुनिकीकरणाय वित्तीयसहायतायोजना** — अनया योजनया मदरसा इत्यादीनां पाठ्यचर्यासु विज्ञान-गणित-सामाजिकाध्ययन-हिन्दी-आङ्ग्लादीनामध्ययनाय वित्तीयसहायता दीयते । शिक्षकाणां नियुक्तये सहायता दीयते।

**प्रतियोगीपरीक्षायै अनुवर्गकक्षयोजना** — विश्वविद्यालयानुदानायोगेन 1984 तमे वर्षे एका अनुवर्गकक्षायोजना प्रारभत, यया अल्पसंख्यकछात्राः प्रतियोगीपरीक्षायां भागं नेतुं शक्नुयुः। सहैव ट्ङ्कण-आशुलिपि-संगणक-चिकित्सा-कृषि-प्रबन्धनपाठ्यक्रमेषु च प्रवेशाय तत्परान् कर्तुं शक्नुयुः।

**अनुसूचितजातिजनजातिसंशोधन-अधिनियमः (1956)**

अस्माकं भारते अनुसूचितजातिजनजातीनां कृते स्वतन्त्रतया शिक्षाव्यवस्था कृता अस्ति। एते आर्थिकक्षेत्रे तथा सामाजिकक्षेत्रे अनग्रसराः भवन्ति, इत्यतः केन्द्रराज्यसर्वकारयोः एतेषां शिक्षाव्यवस्थायै विविधाः योजनाः प्रारब्धाः। एतेषां शिक्षाक्षेत्रे उन्नत्यर्थं शिक्षासहायता उपलभ्यते। शिक्षाक्षेत्रे एतेषां वर्गाणां छात्राणां विकासाय निम्ननिखिताः योजनाः कार्यक्रमाश्च विहिताः।

- आश्रमविद्यालयस्थापना (1999-2000)
- छात्राणां कृते छात्रवृत्तिव्यवस्था (1944-45)
- छात्रेभ्यः विदेशच्छात्रवृत्तिः (1954-55)
- राष्ट्रीयसमुद्रपारीयच्छात्रवृत्तियोजना (1998-99)
- राजीवगान्धी- राष्ट्रीय-अध्येतावृत्तियोजना (2005-06)

1960 तमे वर्षे प्रप्रथमतया एतासां जातीनां स्थितिविषये सर्वेक्षणाय अध्ययनाय च यु.एन्.ढेवरमहोदयानामाध्यक्ष्ये एका समितिः संस्थापिताः। सा 'ढेवरसमितिः' इति नाम्ना प्रसिद्धा अस्ति। अनुसूचितजातिजनजातीनां शिक्षाक्षेत्रे विकासाय कानिचन उद्देश्यानि भवन्ति। किमर्थमेतेषां कृते शिक्षायाः व्यवस्था सम्यक् कृता इति चेत् एतेषां सामाजिकार्थिकविकासः मुख्योद्देश्यं भवति। एतेषां कृते केचन संस्तुतयः प्रदत्ताः सन्ति। ताः अधोनिर्दिश्यन्ते –

- एतेषां क्षेत्रेषु विशेषविद्यालयस्थापना करणीया।
- एतेभ्यः शिक्षा, पुस्तकानि, मध्याह्नभोजनम्, वस्त्राणि, लेखनसामग्र्यश्च निःशुल्कमेव प्रदातव्या।

- एतेषां शिक्षाव्यवस्थानाम् उद्योगव्यवस्था अवश्यं भवेत्।
- शिक्षकानां कृते आवासव्यवस्था करणीया।
- पाठ्यक्रमे एतेषां जनानां भाषायाः संस्कृतेश्च स्थानं नूनं प्रदेयम्।

**विकलाङ्गव्यकृति-अधिनियमः(1995)**

शारीरिकमानसिकदृष्ट्या ये विकृताः सन्ति, तादृशानां कृते अपि भारते विकलाङ्गव्यक्ति-अधिनियमस्य माध्यमेन शिक्षाव्यवस्था विहिता। एते यद्यपि शारीरिकदृष्ट्या विकलाङ्गाः भवन्ति, चेदपि अन्यस्वस्थबालकैः सह एतेषां सहभागित्वं भवति इत्यतः एते दिव्याङ्गः इत्युच्यते। एतेषां कृते केचन अधिनियमाः भवन्ति। तद्यथा-

- राष्ट्रीयकल्याणप्रन्यासाधिनियमः (1999)
- भारतीय-पुनर्वास-परिषदधिनियमः (1992)
- 1995-96 तमे वर्षे विकलाङ्गव्यक्ति-अधिनियमाधारेण 18 वर्षपर्यन्तं सर्वेषां विकलाङ्गच्छात्राणां कृते निःशुल्कशिक्षा दातव्या इति योजना कृता।

राष्ट्रीयशिक्षानीतौ (1986) अपि एतेषां कृते निम्नप्रदत्तानि कार्याणि निर्धार्यन्ते। यथा-

- यथासम्भवसाधारणरूपेण विकलाङ्गच्छात्रेभ्यः साधारणबालकैः सह शिक्षाव्यवस्था करणीया।
- विकलाङ्गच्छात्राणां कृते छात्रावासव्यवस्था विद्यालयव्यवस्था च भवितव्या।
- तेषां कृते व्यावसायिकशिक्षायाः व्यवस्था कुर्यात्।
- विकलाङ्गच्छात्राणां समस्या समाधानाय प्रशिक्षणसंस्थाभिः शिक्षकप्रशिक्षणकार्यक्रमाणाम् आयोजनं करणीयम्।

**दिव्याङ्गजनाधिकारविधेयकः (2016)**

लोकसभायां 2016 डिसेम्बरमासे अयमधिकारः आगतः। विधेयकोऽयं अधिनियमः 1995 इत्यस्य स्थानमगृह्णात्। अत्र 6-18 वर्षपर्यन्तं दिव्याङ्गानां छात्राणां कृते निःशुल्कतया शिक्षाग्रहणाय अधिकारः दत्तः। अस्य पूर्तये सर्वकारेण 2001 तमे वर्षे सर्वशिक्षाभियानकार्यक्रमः प्रारब्धः। अनेन केचन गुरूत्वपूर्णशिक्षाधिकारः दिव्याङ्गछात्राणां कृते दत्तः। यथा - शिक्षकमञ्चः, ऑनलाइन-मूल्याङ्कनम्, कोरियर्-मार्गदर्शनम्, कम्पुटरशिक्षा, संसाधनलिङ्क, चर्चामञ्चः इत्यादयः।

**राष्ट्रियमहिलायोगाधिनियमः (1990)**

राष्ट्रस्य विकासस्याधारः शिक्षा वर्तते। देशस्य विकासे समाजस्य उभयोः वर्गयोः महत् अवदानं भवति। अतः भारते पुरुषमिव स्त्रीणां शिक्षायाः अपि आवश्यकता दृश्यते। स्त्रीणां समानतायै

समुचितन्यायाय च भारतसर्वकारेण 1990 तमे वर्षे राष्ट्रीयमहिलायोगाधिनियमः कृतः। अयमायोगः 1992 वर्षस्य जानुआरी मासे स्वायत्तीसंस्था अभूत्। एतेन आयोगाधिनियमेन महिलानां विविधानां समस्यानां समाधानमपि क्रियते। आधुनिककाले स्त्रीशिक्षायाः महती आवश्यकता वर्तते। किमर्थं स्त्रीशिक्षायाः आवश्यकता भवति इति चेत् तत्र निम्नकारणानि भवितुमर्हन्ति। तद्यथा-

- लोकतन्त्रस्य साफल्याय भाविनागरिकाणां समुन्नतये च स्त्रीशिक्षा आवश्यकी।
- सार्वभौमिकशिक्षायाः उद्येश्य प्राप्तये स्त्रीशिक्षा।
- पुरुषाणामिव स्त्रीणां कृते अपि शिक्षाधिकारः भवति।
- सुखमयजीवनयापनाय तथा गृहस्थजीवनं सुखमयं शान्तिमयं च कर्तुं स्त्रीशिक्षा आवश्यकी।

**उपसंहारः-**

अस्माकं भारतीयसंविधाने शिक्षासम्बन्धी-अनुसूचयः अधिनियमाश्च विहिताः सन्ति। शिक्षायाः प्रसाराय प्रचाराय च विविधेषु संस्करणेषु विविधाः नियमाः अधिनियमाश्च संविधाने प्रणीताः। संविधानस्य धारा 28, 29(1), 30, 41, 45, 46, 63, 11, 12, 20 तथा 25 इत्यादिषु शिक्षायाः अधिकारः तथा योजनादिकं प्रतिपादयन्ति। पुनश्च शिक्षाधिकारः(2009), सर्वशिक्षाभियानम्(2002), राष्ट्रिय-अल्पसंख्यकाधिनियमः(1992), अनुसूचितजातिजनजातिसंशोधनाधिनियमः (1956), विकलाङ्गव्यक्ति-अधिनियमः(2016) तथा राष्ट्रियमहिलायोगाधिनियमः(1990) आदि अधिनियमेषु शिक्षाव्यवस्था तथा शिक्षाक्षेत्रे तेषामधिनियमानां कार्याणि सम्यक् प्रतिपादितानि। भारतवर्षे शिक्षायाः समुचितरुपेण प्रसारः प्रचारश्च कर्तुं संविधाने विहितानां नियमानामधिनियमानाञ्च प्रणयनं तथा क्रियान्वयनम् उपयुक्ततया भवितव्या। यदि शिक्षासम्बन्धीनां नियमानुगुणं शिक्षाव्यवस्था प्रचलति चेदेव शिक्षायाः विकासः भविष्यति। यदि शिक्षायाः विकासः भविष्यति तर्हि नूनं राष्ट्रस्य विकासः सम्भविष्यति।

**सन्दर्भग्रन्थाः**


1. *डा. जितेन्द्रकुमाररायगुरुः, समानतायैशिक्षा, ओम् प्रकाशन, पुरी – 2012,*
2. *डा. सरोजशर्मा, शिक्षा एवं भारतीय समाज, श्यामप्रकाशन, चौडारास्ता, जयपुरम् - 2005*
3. *डा. रामशकल पाण्डेय, उदीयमान भारतीय समाज में शिक्षक, श्री विनोद पुस्तक मन्दिर, आगरा-2*
4. *www.mhrd.gov.in*
5. *www.wikipedia.org*
6. *www.Hi.vikaspedia.in*
7. *www.ssgcp.com*
8. *www.https.//m.jagran.com*

## विभागीयप्राध्यापका:



प्रो. सुदेशकुमारशर्मा
प्राचार्य:



प्रो. मदनमोहनझा:,
विभागाध्यक्ष:



डॉ.देवदत्तसरोदे



डॉ.वि.एस्.वि.भास्कररेड्डि



डॉ.कुमार:



डॉ.सुनीलकुमारशर्मा



डॉ.विनोदकुमारशर्मा



डॉ.सचिनकुमार:



शिक्षाशास्त्रिविभागीयद्वितीयवर्षस्य छात्रा: